# 11 Shrimaddevibhagavatamahapurane Ekadashah Skandhah

# ૧૧ શ્રીમદ્દેવીભાગવતમહાપુરાણે એકાદશઃ સ્કન્ધઃ

## Document Information

Text title : Devi Bhagavata Mahapurana Skandha 11

File name : devIbhAgavatam11.itx

Category : purana, devI, devii, devibhagavatam

Location : doc_purana

Transliterated by : Vishwas Bhide, satsangdhara.net

Proofread by : Vishwas Bhide, satsangdhara.net

Latest update : March 30, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

March 31, 2024

*sanskritdocuments.org*

# ૧૧ શ્રીમદ્દેવીભાગવતમહાપુરાણે એકાદશઃ સ્કન્ધઃ

## ૧૧.૧ પ્રથમોઽધ્યાયઃ । મનુકૃતં દેવીસ્તવનમ્ ।

નારદ ઉવાચ ।
ભગવન્ ભૂતભવ્યેશ નારાયણ સનાતન ।
આખ્યાતં પરમાશ્ચર્યં દેવીચારિત્રમુત્તમમ્ ॥ ૧॥

પ્રાદુર્ભાવઃ પરો માતુઃ કાર્યાર્થમસુરદ્રુહામ્ ।
અધિકારાપ્તિરુક્તાત્ર દેવીપૂર્ણકૃપાવશાત્ ॥ ૨॥

અધુના શ્રોતુમિચ્છામિ યેન પ્રીણાતિ સર્વદા ।
સ્વભક્તાન્પરિપુષ્ણાતિ તમાચારં વદ પ્રભો ॥ ૩॥

શ્રીનારાયણ ઉવાચ ।
શ્ૃણુ નારદ તત્ત્વજ્ઞ સદાચારવિધિક્રમમ્ ।
યદનુષ્ઠાનમાત્રેણ દેવી પ્રીણાતિ સર્વદા ॥ ૪॥

પ્રાતરુત્થાય કર્તવ્યં યદ્ દ્વિજેન દિને દિને ।
તદહં સમ્પ્રવક્ષ્યામિ દ્વિજાનામુપકારકમ્ ॥ ૫॥

ઉદયાસ્તમયં યાવદ્ દ્વિજઃ સત્કર્મકૃદ્ભવેત્ ।
નિત્યનૈમિત્તિકૈર્યુક્તઃ કામ્યૈશ્ચાન્યૈરગર્હિતૈઃ ॥ ૬॥

આત્મનશ્ચ સહાયાર્થં પિતા માતા ન તિષ્ઠતિ ।
ન પુત્રદારા ન જ્ઞાતિર્ધર્મસ્તિષ્ઠતિ કેવલમ્ ॥ ૭॥

તસ્માદ્ધર્મં સહાયાર્થં નિત્યં સઞ્ચિનુ સાધનૈઃ ।
ધર્મેણૈવ સહાયાત્તુ તમસ્તરતિ દુસ્તરમ્ ॥ ૮॥

આચારઃ પ્રથમો ધર્મઃ શ્રુત્યુક્તઃ સ્માર્ત એવ ચ ।
તસ્માદસ્મિન્સમાયુક્તો નિત્યં સ્યાદાત્મનો દ્વિજઃ ॥ ૯॥

આચારાલ્લભતે ચાયુરાચારાલ્લભતે પ્રજાઃ ।

આચારાદન્નમક્ષય્યમાચારો હન્તિ પાતકમ્ ॥ ૧૦॥

આચારઃ પરમો ધર્મો નૃણાં કલ્યાણકારકઃ ।
ઇહ લોકે સુખી ભૂત્વા પરત્ર લભતે સુખમ્ ॥ ૧૧॥

અજ્ઞાનાન્ધજનાનાં તુ મોહિતૈર્ભ્રામિતાત્મનામ્ ।
ધર્મરૂપો મહાદીપો મુક્તિમાર્ગપ્રદર્શકઃ ॥ ૧૨॥

આચારાત્પ્રાપ્યતે શ્રૈષ્ઠ્યમાચારાત્કર્મ લભ્યતે ।
કર્મણો જાયતે જ્ઞાનમિતિ વાક્યં મનોઃ સ્મૃતમ્ ॥ ૧૩॥

સર્વધર્મવરિષ્ઠોઽયમાચારઃ પરમં તપઃ ।
તદેવ જ્ઞાનમુદ્દિષ્ટં તેન સર્વં પ્રસાધ્યતે ॥ ૧૪॥

યસ્ત્વાચારવિહીનોઽત્ર વર્તતે દ્વિજસત્તમઃ ।
સ શૂદ્રવદ્ બહિષ્કાર્યો યથા શૂદ્રસ્તથૈવ સઃ ॥ ૧૫॥

આચારો દ્વિવિધઃ પ્રોક્તઃ શાસ્ત્રીયો લૌકિકસ્તથા ।
ઉભાવપિ પ્રકર્તવ્યૌ ન ત્યાજ્યૌ શુભમિચ્છતા ॥ ૧૬॥

ગ્રામધર્મા જાતિધર્મા દેશધર્માઃ કુલોદ્ભવાઃ ।
પરિગ્રાહ્યા નૃભિઃ સર્વૈર્નૈવ તાઁલ્લઙ્ઘયેન્મુને ॥ ૧૭॥

દુરાચારો હિ પુરુષો લોકે ભવતિ નિન્દિતઃ ।
દુઃખભાગી ચ સતતં વ્યાધિના વ્યાપ્ત એવ ચ ॥ ૧૮॥

પરિત્યજેદર્થકામૌ યૌ સ્યાતાં ધર્મવર્જિતૌ ।
ધર્મમપ્યસુખોદર્કં લોકવિદ્વિષ્ટમેવ ચ ॥ ૧૯॥

નારદ ઉવાચ ।
બહુત્વાદિહ શાસ્ત્રાણાં નિશ્ચયઃ સ્યાત્કથં મુને ।
કિયત્પ્રમાણં તદ્ બ્રૂહિ ધર્મમાર્ગવિનિર્ણયે ॥ ૨૦॥

શ્રીનારાયણ ઉવાચ ।
શ્રુતિસ્મૃતી ઉભે નેત્રે પુરાણં હૃદયં સ્મૃતમ્ ।
એતત્ત્રયોક્ત એવ સ્યાદ્ધર્મો નાન્યત્ર કુત્રચિત્ ॥ ૨૧॥

વિરોધો યત્ર તુ ભવેત્ત્રયાણાં ચ પરસ્પરમ્ ।
શ્રુતિસ્તત્ર પ્રમાણં સ્યાદ્ દ્વયોર્દ્વૈધે સ્મૃતિર્વરા ॥ ૨૨॥

શ્રુતિદ્વૈધં ભવેદ્યત્ર તત્ર ધર્માવુભૌ સ્મૃતૌ ।

સ્મૃતિદ્વૈધં તુ યત્ર સ્યાદ્વિષયઃ કલ્પ્યતાં પૃથક્ ॥ ૨૩॥

પુરાણેષુ ક્વચિચ્ચૈવ તન્ત્રદૃષ્ટં યથાતથમ્ ।
ધર્મં વદન્તિ તં ધર્મં ગૃહ્ણીયાન્ન કથઞ્ચન ॥ ૨૪॥

વેદાવિરોધિ ચેત્તન્ત્રં તત્પ્રમાણં ન સંશયઃ ।
પ્રત્યક્ષશ્રુતિરુદ્ધં યત્તત્પ્રમાણં ભવેન્ન ચ ॥ ૨૫॥

સર્વથા વેદ એવાસૌ ધર્મમાર્ગપ્રમાણકઃ ।
તેનાવિરુદ્ધં યત્કિઞ્ચિત્તત્પ્રમાણં ન ચાન્યથા ॥ ૨૬॥

યો વેદધર્મમુજ્ઝિત્ય વર્તતેઽન્યપ્રમાણતઃ ।
કુણ્ડાનિ તસ્ય શિક્ષાર્થં યમલોકે વસન્તિ હિ ॥ ૨૭॥

તસ્માત્સર્વપ્રયત્નેન વેદોક્તં ધર્મમાશ્રયેત્ ।
સ્મૃતિઃ પુરાણમન્યદ્વા તન્ત્રં વા શાસ્ત્રમેવ ચ ॥ ૨૮॥

તન્મૂલત્વે પ્રમાણં સ્યાન્નાન્યથા તુ કદાચન ।
યે કુશાસ્ત્રાભિયોગેન વર્તયન્તીહ માનવાન્ ॥ ૨૯॥

અધોમુખોર્ધ્વપાદાસ્તે યાસ્યન્તિ નરકાર્ણવમ્ ।
કામાચારાઃ પાશુપતાસ્તથા વૈ લિઙ્ગધારિણઃ ॥ ૩૦॥

તપ્તમુદ્રાઙ્કિતા યે ચ વૈખાનસમતાનુગાઃ ।
તે સર્વે નિરયં યાન્તિ વેદમાર્ગબહિષ્કૃતાઃ ॥ ૩૧॥

વેદોક્તમેવ સદ્ધર્મં તસ્માત્કુર્યાન્નરઃ સદા ।
ઉત્થાયોત્થાય બોદ્ધવ્યં કિં મયાદ્ય કૃતં કૃતમ્ ॥ ૩૨॥

દત્તં વા દાપિતં વાપિ વાક્યેનાપિ ચ ભાષિતમ્ ।
ઉપપાપેષુ સર્વેષુ પાતકેષુ મહત્સ્વપિ ॥ ૩૩॥

અવાપ્ય રજનીયામં બ્રહ્મધ્યાનં સમાચરેત્ ।
ઊરુસ્થોત્તાનચરણઃ સવ્યે ચોરૌ તથોત્તરમ્ ॥ ૩૪॥

ઉત્તાનં કિઞ્ચિદુત્તાનં મુખમવષ્ટભ્ય ચોરસા ।
નિમીલિતાક્ષઃ સત્ત્વસ્થો દન્તૈર્દન્તાન્ન સંસ્પૃશેત્ ॥ ૩૫॥

તાલુસ્થાચલજિહ્વશ્ચ સંવૃતાસ્યઃ સુનિશ્ચલઃ ।
સન્નિરુદ્ધેન્દ્રિયગ્રામો નાતિનિમ્નસ્થિતાસનઃ ॥ ૩૬॥

દ્વિગુણં ત્રિગુણં વાપિ પ્રાણાયામમુપક્રમેત્ ।
તતો ધ્યેયઃ સ્થિતો યોઽસૌ હૃદયે દીપવત્પ્રભુઃ ॥ ૩૭॥

ધારયેત્તત્ર ચાત્માનં ધારણાં ધારયેદ્બુધઃ ।
સધૂમશ્ચ વિધૂમશ્ચ સગર્ભશ્ચાપ્યગર્ભકઃ ॥ ૩૮॥

સલક્ષ્યશ્ચાપ્યલક્ષ્યશ્ચ પ્રાણાયામસ્તુ ષડ્વિધઃ ।
પ્રાણાયામસમો યોગઃ પ્રાણાયામ ઇતીરિતઃ ॥ ૩૯॥

પ્રાણાયામ ઇતિ પ્રોક્તો રેચપૂરકકુમ્ભકૈઃ ।
વર્ણત્રયાત્મકા હ્યેતે રેચપૂરકકુમ્ભકાઃ ॥ ૪૦॥

સ એવ પ્રણવઃ પ્રોક્તઃ પ્રાણાયામશ્ચ તન્મયઃ ।
ઇડયા વાયુમારોપ્ય પૂરયિત્વોદરે સ્થિતમ્ ॥ ૪૧॥

શનૈઃ ષોડશમાત્રાભિરન્યયા તં વિરેચયેત્ ।
એવં સધૂમઃ પ્રાણાનામાયામઃ કથિતો મુને ॥ ૪૨॥

આધારેલિઙ્ગનાભિપ્રકટિતહૃદયે તાલુમૂલે લલાટે
દ્વે પત્રે ષોડશારે દ્વિદશદશદલદ્વાદશાર્ધે ચતુષ્કે ।
વાસાન્તે બાલમધ્યે ડફકતસહિતે કણ્ઠદેશે સ્વરાણાં
હક્ષાન્તત્ત્વાર્થયુક્તં સકલદલગતં વર્ણરૂપં નમામિ ॥ ૪૩॥

અરુણકમલસંસ્થા તદ્રજઃપુઞ્જવર્ણા
હરનિયમિતચિહ્ના પદ્મતન્તુસ્વરૂપા ।
રવિહુતવહરાકાનાયકાસ્યસ્તનાઢ્યા
સકૃદપિ યદિ ચિત્તે સંવસેત્સ્યાત્સ ભુક્તઃ ॥ ૪૪॥

સ્થિતિઃ સૈવ ગતિર્યાત્રા મતિશ્ચિન્તા સ્તુતિર્વચઃ ।
અહં સર્વાત્મકો દેવઃ સ્તુતિઃ સર્વં ત્વદર્ચનમ્ ॥ ૪૫॥

અહં દેવી ન ચાન્યોઽસ્મિ બ્રહ્મૈવાહં ન શોકભાક્ ।
સચ્ચિદાનન્દરૂપોઽહં સ્વાત્માનમિતિ ચિન્તયેત્ ॥ ૪૬॥

પ્રકાશમાનાં પ્રથમે પ્રયાણે
પ્રતિપ્રયાણેઽપ્યમૃતાયમાનામ્ ।
અન્તઃપદવ્યામનુસઞ્ચરન્તી-
માનન્દરૂપામબલાં પ્રપદ્યે ॥ ૪૭॥

તતો નિજબ્રહ્મરન્ધ્રે ધ્યાયેત્તં ગુરુમીશ્વરમ્ ।
ઉપચારૈર્માનસૈશ્ચ પૂજયેત્તુ યથાવિધિ ॥ ૪૮॥

સ્તુવીતાનેન મન્ત્રેણ સાધકો નિયતાત્મવાન્ ।
ગુરુર્બ્રહ્મા ગુરુર્વિષ્ણુર્ગુરુર્દેવો મહેશ્વરઃ ।
ગુરુરેવ પરં બ્રહ્મ તસ્મૈ શ્રીગુરવે નમઃ ॥ ૪૯॥

ઇતિ શ્રીમદ્દેવીભાગવતે મહાપુરાણેઽષ્ટાદશસાહસ્ર્યાં સંહિતાયામેકાદશસ્કન્ધે
મનુકૃતંદેવીસ્તવનં નામ પ્રથમોઽધ્યાયઃ ॥ ૧૧.૧॥

## ૧૧.૨ દ્વિતીયોઽધ્યાયઃ । શૌચવિધિવર્ણનમ્ ।

શ્રીનારાયણ ઉવાચ ।
આચારહીનં ન પુનન્તિ વેદા
યદપ્યધીતાઃ સહ ષડ્ભિરઙ્ગૈઃ ।
છન્દાંસ્યેનં મૃત્યુકાલે ત્યજન્તિ
નીડં શકુન્તા ઇવ જાતપક્ષાઃ ॥ ૧॥

બ્રાહ્મે મુહૂર્તે ચોત્થાય તત્સર્વં સમ્યગાચરેત્ ।
રાત્રેરન્તિમયામે તુ વેદાભ્યાસં ચરેદ્ બુધઃ ॥ ૨॥

કિઞ્ચિત્કાલં તતઃ કુર્યાદિષ્ટદેવાનુચિન્તનમ્ ।
યોગી તુ પૂર્વમાર્ગેણ બ્રહ્મધ્યાનં સમાચરેત્ ॥ ૩॥

જીવબ્રહ્મૈક્યતા યેન જાયતે તુ નિરન્તરમ્ ।
જીવન્મુક્તશ્ચ ભવતિ તત્ક્ષણાદેવ નારદ ॥ ૪॥

પઞ્ચપઞ્ચ ઉષઃકાલઃ સપ્તપઞ્ચારુણોદયઃ ।
અષ્ટપઞ્ચભવેત્પ્રાતઃ શેષઃ સૂર્યોદયઃ સ્મૃતઃ ॥ ૫॥

પ્રાતરુત્થાય યઃ કુર્યાદ્વિણ્મૂત્રં દ્વિજસત્તમઃ ।
નૈરૃત્યામિષુવિક્ષેપમતીત્યાભ્યધિકં ભુવઃ ॥ ૬॥

વિણ્મૂત્રેઽપિ ચ કર્ણસ્થ આશ્રમે પ્રથમે દ્વિજઃ ।
નિવીતં પૃષ્ઠતઃ કુર્યાદ્વાનપ્રસ્થગૃહસ્થયોઃ ॥ ૭॥

કૃત્વા યજ્ઞોપવીતં તુ પૃષ્ઠતઃ કણ્ઠલમ્બિતમ્ ।
વિણ્મૂત્રં તુ ગૃહી કુર્યાત્કર્ણસ્થં પ્રથમાશ્રમી ॥ ૮॥

અન્તર્ધાય તૃણૈર્ભૂમિં શિરઃ પ્રાવૃત્ય વાસસા ।
વાચં નિયમ્ય યત્નેન ષ્ઠીવનશ્વાસવર્જિતઃ ॥ ૯॥

ન ફાલકૃષ્ટે ન જલે ન ચિતાયાં ન પર્વતે ।
જીર્ણદેવાલયે કુર્યાન્ન વલ્મીકે ન શાદ્વલે ॥ ૧૦॥

ન સસત્ત્વેષુ ગર્તેષુ ન ગચ્છન્ન પથિ સ્થિતઃ ।
સન્ધ્યયોરુભયોર્જપ્યે ભોજને દન્તધાવને ॥ ૧૧॥

પિતૃકાર્યે ચ દૈવે ચ તથા મૂત્રપુરીષયોઃ ।
ઉત્સાહે મૈથુને વાપિ તથા વૈ ગુરુસન્નિધૌ ॥ ૧૨॥

યાગે દાને બ્રહ્મયજ્ઞે દ્વિજો મૌનં સમાચરેત્ ।
દેવતા ઋષયઃ સર્વે પિશાચોરગરાક્ષસાઃ ॥ ૧૩॥

ઇતો ગચ્છન્તુ ભૂતાનિ બહિર્ભૂમિં કરોમ્યહમ્ ।
ઇતિ સમ્પ્રાર્થ્ય પશ્ચાત્તુ કુર્યાચ્છૌચં યથાવિધિ ॥ ૧૪॥

વાય્વગ્ની વિપ્રમાદિત્યમાપઃ પશ્યંસ્તથૈવ ગાઃ ।
ન કદાચન કુર્વીત વિણ્મૂત્રસ્ય વિસર્જનમ્ ॥ ૧૫॥

ઉદઙ્મુખો દિવા કુર્યાદ્રાત્રૌ ચેદ્દક્ષિણામુખઃ ।
તત આચ્છાદ્ય વિણ્મૂત્રં લોષ્ઠપર્ણતૃણાદિભિઃ ॥ ૧૬॥

ગૃહીતલિઙ્ગ ઉત્થાય સ ગચ્છેદ્વારિસન્નિધૌ ।
પાત્રે જલં ગહીત્વા તુ ગચ્છેદન્યત્ર ચૈવ હિ ॥ ૧૭॥

ગૃહીત્વા મૃત્તિકાં કૂલાચ્છ્વેતાં બ્રાહ્મણસત્તમઃ ।
રક્તાં પીતાં તથા કૃષ્ણાં ગૃહ્ણીયુશ્ચાન્યવર્ણકાઃ ॥ ૧૮॥

અથવા યા યત્ર દેશે સૈવ ગ્રાહ્યા દ્વિજોત્તમૈઃ ।
અન્તર્જલાદ્દેવગૃહાદ્વલ્મીકાન્મૂષકોત્કરાત્ ॥ ૧૯॥

કૃતશૌચાવશિષ્ટાશ્ચ ન ગ્રાહ્યાઃ પઞ્ચમૃત્તિકાઃ ।
મૂત્રાત્તુ દ્વિગુણં શૌચે મૈથુને ત્રિગુણં સ્મૃતમ્ ॥ ૨૦॥

એકા લિઙ્ગે કરે તિસ્ર ઉભયોર્મૃદ્દ્વયં સ્મૃતમ્ ।
મૂત્રશૌચં સમાખ્યાતં શૌચે તદ્ દ્વિગુણં સ્મૃતમ્ ॥ ૨૧॥

વિટ્શૌચે લિઙ્ગદેશે તુ પ્રદદ્યાન્મૃત્તિકાદ્વયમ્ ।
પઞ્ચાપાને દશૈકસ્મિન્નુભયોઃ સપ્ત મૃત્તિકાઃ ॥ ૨૨॥

વામપાદં પુરસ્કૃત્ય પશ્ચાદ્દક્ષિણમેવ ચ ।
પ્રત્યેકં ચ ચતુર્વારં મૃત્તિકાં લેપયેત્સુધીઃ ॥ ૨૩॥

એવં શૌચં ગૃહસ્થસ્ય દ્વિગુણં બ્રહ્મચારિણઃ ।
ત્રિગુણં વાનપ્રસ્થસ્ય યતીનાં ચ ચતુર્ગુણમ્ ॥ ૨૪॥

આર્દ્રામલકમાના તુ મૃત્તિકા શૌચકર્મણિ ।
પ્રત્યેકં તુ સદા ગ્રાહ્યા નાતો ન્યૂના કદાચન ॥ ૨૫॥

એતદ્દિવા સ્યાદ્વિટ્શૌચં તદર્ધં નિશિ કીર્તિતમ્ ।
આતુરસ્ય તદર્ધં તુ માર્ગસ્થસ્ય તદર્ધકમ્ ॥ ૨૬॥

સ્ત્રીશૂદ્રાણામશક્તાનાં બાલાનાં શૌચકર્મણિ ।
યથા ગન્ધક્ષયઃ સ્યાત્તુ તથા કુર્યાદસઙ્ખ્યકમ્ ॥ ૨૭॥

ગન્ધલેપક્ષયો યાવત્તાવચ્છૌચં વિધીયતે ।
સર્વેષામેવ વર્ણાનામિત્યાહ ભગવાન્મનુઃ ॥ ૨૮॥

વામહસ્તેન શૌચં તુ કુર્યાદ્વૈ દક્ષિણેન ન ।
નાભેરધો વામહસ્તો નાભેરૂર્ધ્વં તુ દક્ષિણઃ ॥ ૨૯॥

શૌચકર્મણિ વિજ્ઞેયો નાન્યથા દ્વિજપુઙ્ગવૈઃ ।
જલપાત્રં ન ગૃહ્ણીયાદ્વિણ્મૂત્રોત્સર્જને બુધઃ ॥ ૩૦॥

ગૃહ્ણીયાદ્યદિ મોહેન પ્રાયશ્ચિત્તં ચરેત્તતઃ ।
મોહાદ્વાપ્યથવાઽઽલસ્યાન્ન કુર્યાચ્છૌચમાત્મનઃ ॥ ૩૧॥

જલાહારસ્ત્રિરાત્રઃ સ્યાત્તતો જાપાચ્ચ શુધ્યતિ ।
દેશકાલદ્રવ્યશક્તિસ્વોપપત્તીશ્ચ સર્વશઃ ॥ ૩૨॥

જ્ઞાત્વા શૌચં પ્રકર્તવ્યમાલસ્યં નાત્ર ધારયેત્ ।
પુરીષોત્સર્જને કુર્યાદ્ ગણ્ડૂષાન્દ્વાદશૈવ તુ ॥ ૩૩॥

ચતુરો મૂત્રવિક્ષેપે નાતો ન્યૂનાન્કદાચન ।
અધોમુખં નરઃ કૃત્વા ત્યજેત્તં વામતઃ શનૈઃ ॥ ૩૪॥

આચમ્ય ચ તતઃ કુર્યાદ્દન્તધાવનમાદરાત્ ।
કણ્ટકિક્ષીરવૃક્ષોત્થં દ્વાદશાઙ્ગુલમવ્રણમ્ ॥ ૩૫॥

કનિષ્ઠિકાગ્રવત્સ્થૂલં પૂર્વાર્ધે કૃતકૂર્ચકમ્ ।

કરઞ્જોદુમ્બરૌ ચૂતઃ કદમ્બો લોધ્રચમ્પકૌ ।
બદરીતિ દ્રુમાશ્ચેતિ પ્રોક્તા દન્તપ્રધાવને ॥ ૩૬॥

અન્નાદ્યાય વ્યૂહધ્વંસે સોમો રાજાયમાગમત્ ।
સ મે મુખં પ્રક્ષાલ્ય તેજસા ચ ભગેન ચ ॥ ૩૭॥

આયુર્બલં યશો વર્ચઃ પ્રજાઃ પશુવસૂનિ ચ ।
બ્રહ્મપ્રજ્ઞાં ચ મેધાં ચ ત્વન્નો દેહિ વનસ્પતે ॥ ૩૮॥

અભાવે દન્તકાષ્ઠસ્ય પ્રતિષિદ્ધદિનેષુ ચ ।
અપાં દ્વાદશગણ્ડૂષૈર્વિદધ્યાદ્દન્તધાવનમ્ ॥ ૩૯॥

રવેર્દિને યઃ કુરુતે પ્રાણી દન્તસ્ય ધાવનમ્ ।
સવિતા ભક્ષિતસ્તેન સ્વકુલં તેન ઘાતિતમ્ ॥ ૪૦॥

પ્રતિપદ્દર્શષષ્ઠીષુ નવમ્યેકાદશીરવૌ ।
દન્તાનાં કાષ્ઠસંયોગાદ્દહત્યાસપ્તમં કુલમ્ ॥ ૪૧॥

કૃત્વાલં પાદશૌચં હ્યમલમથ જલં
ત્રિઃપિબેદ્ દ્વિર્વિમૃજ્ય
તર્જન્યાઙ્ગુષ્ઠવત્યા સજલમભિમૃશે-
ન્નાસિકારન્ધ્રયુગ્મમ્ ।
અઙ્ગુષ્ઠાનામિકાભ્યાં નયનયુગયુતં
કર્ણયુગ્મં કનિષ્ઠા-
ઙ્ગુષ્ઠાભ્યાં નાભિદેશે હૃદયમથ તલે-
નાઙ્ગુલીભિઃ શિરાંસિ ॥ ૪૨॥

ઇતિ શ્રીમદ્દેવીભાગવતે મહાપુરાણેઽષ્ટાદશસાહસ્ર્યાં સંહિતાયાં
એકાદશસ્કન્ધે શૌચવિધિવર્ણનં નામ દ્વિતીયોઽધ્યાયઃ ॥ ૧૧.૨॥

## ૧૧.૩ તૃતીયોઽધ્યાયઃ । રુદ્રાક્ષમાહાત્મ્યવર્ણનમ્ ।

શ્રીનારાયણ ઉવાચ ।
(શુદ્ધં સ્માર્તં ચાચમનં પૌરાણં વૈદિકં તથા ।
તાન્ત્રિકં શ્રૌતમિત્યાહુઃ ષડ્વિધં શ્રુતિચોદિતમ્ ॥

વિણ્મૂત્રાદિકશૌચં ચ શુદ્ધં ચ પરિકીર્તિતમ્ ।

સ્માર્તં પૌરાણિકં કર્મ આચાન્તે વિધિપૂર્વકમ્ ॥

વૈદિકં શ્રૌત્રમિત્યાદિ બ્રહ્મયજ્ઞાદિપૂર્વકમ્ ।
અસ્ત્રવિદ્યાદિકં કર્મ તાન્ત્રિકો વિધિરુચ્યતે ॥)
સ્મૃત્વા ચોઙ્કારગાયત્રીં નિબધ્નીયાચ્છિખાં તથા ।
પુનરાચમ્ય હૃદયં બાહૂ સ્કન્ધૌ ચ સંસ્પૃશેત્ ॥ ૧॥

ક્ષુતે નિષ્ઠીવને ચૈવ દન્તોચ્છિષ્ટે તથાનૃતે ।
પતિતાનાં ચ સમ્ભાષે દક્ષિણં શ્રવણં સ્પૃશેત્ ॥ ૨॥

અગ્નિરાપશ્ચ વેદાશ્ચ સોમઃ સૂર્યોઽનિલસ્તથા ।
સર્વે નારદ વિપ્રસ્ય કર્ણે તિષ્ઠન્તિ દક્ષિણે ॥ ૩॥

તતસ્તુ ગત્વા નદ્યાદૌ પ્રાતઃસ્નાનં વિશોધનમ્ ।
સમાચરેન્મુનિશ્રેષ્ઠ દેહસંશુદ્ધિહેતવે ॥ ૪॥

અત્યન્તમલિનો દેહો નવદ્વારૈર્મલં વહન્ ।
સદાઽઽસ્તે તચ્છોધનાય પ્રાતઃસ્નાનં વિધીયતે ॥ ૫॥

અગમ્યાગમનાત્પાપં યચ્ચ પાપં પ્રતિગ્રહાત્ ।
રહસ્યાચરિતં પાપં મુચ્યતે સ્નાનકર્મણા ॥ ૬॥

અસ્નાતસ્ય ક્રિયાઃ સર્વા ભવન્તિ વિફલા યતઃ ।
તસ્માત્પ્રાતશ્ચરેત્સ્નાનં નિત્યમેવ દિને દિને ॥ ૭॥

દર્ભયુક્તશ્ચરેત્સ્નાનં તથા સન્ધ્યાભિવન્દનમ્ ।
સપ્તાહં પ્રાતરસ્નાયી સન્ધ્યાહીનસ્ત્રિભિર્દિનૈઃ ॥ ૮॥

દ્વાદશાહમનગ્નિઃ સન્દ્વિજઃ શૂદ્રત્વમાપ્નુયાત્ ।
અલ્પત્વાદ્ધોમકાલસ્ય બહુત્વાત્સ્નાનકર્મણઃ ॥ ૯॥

પ્રાતર્ન તુ તથા સ્નાયાદ્ધોમકાલે વિગર્હિતઃ ।
ગાયત્ર્યાસ્તુ પરં નાસ્તિ ઇહ લોકે પરત્ર ચ ॥ ૧૦॥

ગાયન્તં ત્રાયતે યસ્માદ્ગાયત્રીત્યભિધીયતે ।
પ્રણવેન તુ સંયુક્તાં વ્યાહૃતિત્રયસંયુતામ્ ॥ ૧૧॥

વાયું વાયૌ જયેદ્વિપ્રઃ પ્રાણસંયમનત્રયાત્ ।
બ્રાહ્મણઃ શ્રુતિસમ્પન્નઃ સ્વધર્મનિરતઃ સદા ॥ ૧૨॥

સ વૈદિકં જપેન્મન્ત્રં લૌકિકં ન કદાચન ।

ગૌશૃઙ્ગે સર્ષપો યાવત્ તાવદ્યેષાં ન સ સ્થિરઃ ॥ ૧૩॥

ન તારયન્ત્યુભૌ પક્ષૌ પિતૄનેકોત્તરં શતમ્ ।
સગર્ભો જપસંયુક્તસ્ત્વગર્ભો ધ્યાનમાત્રકઃ ॥ ૧૪॥

સ્નાનાઙ્ગતર્પણં કૃત્વા દેવર્ષિપિતૃતોષકમ્ ।
શુદ્ધે વસ્ત્રે પરીધાય જલાદ્બહિરુપાગતઃ ॥ ૧૫॥

વિભૂતિધારણં કાર્યં રુદ્રાક્ષાણાં ચ ધારણમ્ ।
ક્રમયોગેન કર્તવ્યં સર્વદા જપસાધકૈઃ ॥ ૧૬॥

રુદ્રાક્ષાન્કણ્ઠદેશે દશનપરિમિતા-
ન્મસ્તકે વિંશતી દ્વે
ષટ્ ષટ્ કર્ણપ્રદેશે કરયુગલકૃતે
દ્વાદશ દ્વાદશૈવ ।
બાહ્વોરિન્દોઃ કલાભિર્નયનયુગકૃતે
ત્વેકમેકં શિખાયાં
વક્ષસ્યષ્ટાધિકં યઃ કલયતિ શતકં
સ સ્વયં નીલકણ્ઠઃ ॥ ૧૭॥

બદ્ધ્વા સ્વર્ણેન રુદ્રાક્ષં રજતેનાથવા મુને ।
શિખાયાં ધારયેન્નિત્યં કર્ણયોર્વા સમાહિતઃ ॥ ૧૮॥

યજ્ઞોપવીતે હસ્તે વા કણ્ઠે તુન્દેઽથવા નરઃ ।
શ્રીમત્પઞ્ચાક્ષરેણૈવ પ્રણવેન તથાપિ વા ॥ ૧૯॥

નિર્વ્યાજભક્ત્યા મેધાવી રુદ્રાક્ષં ધારયેન્મુદા ।
રુદ્રાક્ષધારણં સાક્ષાચ્છિવજ્ઞાનસ્ય સાધનમ્ ॥ ૨૦॥

રુદ્રાક્ષં યચ્છિખાયાં તત્તારતત્ત્વમિતિ સ્મરેત્ ।
કર્ણયોરુભયોર્બ્રહ્મન્ દેવં દેવીં ચ ભાવયેત્ ॥ ૨૧॥

યજ્ઞોપવીતે વેદાંશ્ચ તથા હસ્તે દિશઃ સ્મરેત્ ।
કણ્ઠે સરસ્વતીં દેવીં પાવકં ચાપિ ભાવયેત્ ॥ ૨૨॥

સર્વાશ્રમાણાં વર્ણાનાં રુદ્રાક્ષાણાં ચ ધારણમ્ ।
કર્તવ્યં મન્ત્રતઃ પ્રોક્તં દ્વિજાનાં નાન્યવર્ણિનામ્ ॥ ૨૩॥

રુદ્રાક્ષધારણાદ્રુદ્રો ભવત્યેવ ન સંશયઃ ।

પશ્યન્નપિ નિષિદ્ધાંશ્ચ તથા શ‍ૃણ્વન્નપિ સ્મરન્ ॥ ૨૪॥

જિઘ્રન્નપિ તથા ચાશ્નન્ પ્રલપન્નપિ સન્તતમ્ ।
કુર્વન્નપિ સદા ગચ્છન્વિસૃજન્નપિ માનવઃ ॥ ૨૫॥

રુદ્રાક્ષધારણાદેવ સર્વપાપૈર્ન લિપ્યતે ।
અનેન ભુક્તં દેવેન ભુક્તં યત્તુ તથા ભવેત્ ॥ ૨૬॥

પીતં રુદ્રેણ તત્પીતં ઘ્રાતં ઘ્રાતં શિવેન તત્ ।
રુદ્રાક્ષધારણે લજ્જા યેષામસ્તિ મહામુને ॥ ૨૭॥

તેષાં નાસ્તિ વિનિર્મોક્ષઃ સંસારાજ્જન્મકોટિભિઃ ।
રુદ્રાક્ષધારિણં દૃષ્ટ્વા પરિવાદં કરોતિ યઃ ॥ ૨૮॥

ઉત્પત્તૌ તસ્ય સાઙ્કર્યમસ્ત્વેવેતિ વિનિશ્ચયઃ ।
રુદ્રાક્ષધારણાદેવ રુદ્રો રુદ્રત્વમાપ્નુયાત્ ॥ ૨૯॥

મુનયઃ સત્યસઙ્કલ્પા બ્રહ્મા બ્રહ્મત્વમાગતઃ ।
રુદ્રાક્ષધારણાચ્છ્રેષ્ઠં ન કિઞ્ચિદપિ વિદ્યતે ॥ ૩૦॥

રુદ્રાક્ષધારિણે ભક્ત્યા વસ્ત્રં ધાન્યં દદાતિ યઃ ।
સર્વપાપવિનિર્મુક્તઃ શિવલોકં સ ગચ્છતિ ॥ ૩૧॥

રુદ્રાક્ષધારિણં શ્રાદ્ધે ભોજયેત વિમોદતઃ ।
પિતૃલોકમવાપ્નોતિ નાત્ર કાર્યા વિચારણા ॥ ૩૨॥

રુદ્રાક્ષધારિણઃ પાદૌ પ્રક્ષાલ્યાદ્ભિઃ પિબેન્નરઃ ।
સર્વપાપવિનિર્મુક્તઃ શિવલોકે મહીયતે ॥ ૩૩॥

હારં વા કટકં વાપિ સુવર્ણં વા દ્વિજોત્તમઃ ।
રુદ્રાક્ષસહિતં ભક્ત્યા ધારયન્ રુદ્રતામિયાત્ ॥ ૩૪॥

રુદ્રાક્ષં કેવલં વાપિ યત્ર કુત્ર મહામતે ।
સમન્ત્રકં વા મન્ત્રેણ રહિતં ભાવવર્જિતમ્ ॥ ૩૫॥

યો વા કો વા નરો ભક્ત્યા ધારયેલ્લજ્જયાપિ વા ।
સર્વપાપવિનિર્મુક્તઃ સમ્યગ્જ્ઞાનમવાપ્નુયાત્ ॥ ૩૬॥

અહો રુદ્રાક્ષમાહાત્મ્યં મયા વક્તું ન શક્યતે ।
તસ્માત્સર્વપ્રયત્નેન કુર્યાદ્રુદ્રાક્ષધારણમ્ ॥ ૩૭॥

ઇતિ શ્રીમદ્દેવીભાગવતે મહાપુરાણેઽષ્ટાદશસાહસ્ર્યાં સંહિતાયામેકાદશસ્કન્ધે
સદાચારનિરૂપણે રુદ્રાક્ષમાહાત્મ્યવર્ણનં નામ તૃતીયોઽધ્યાયઃ ॥ ૧૧.૩॥

## ૧૧.૪ ચતુર્થોઽધ્યાયઃ । રુદ્રાક્ષમાહાત્મ્યવર્ણનમ્ ।

નારદ ઉવાચ ।
એવમ્ભૂતાનુભાવોઽયં રુદ્રાક્ષો ભવતાનઘ ।
વર્ણિતો મહતાં પૂજ્યઃ કારણં તત્ર કિં વદ ॥ ૧॥

શ્રીનારાયણ ઉવાચ ।
એવમેવ પુરા પૃષ્ટો ભગવાન્ ગિરિશઃ પ્રભુઃ ।
ષણ્મુખેન ચ રુદ્રસ્તં યદુવાચ શ‍ૃણુષ્વ તત્ ॥ ૨॥

ઈશ્વર ઉવાચ ।
શ‍ૃણુ ષણ્મુખ તત્ત્વેન કથયામિ સમાસતઃ ।
ત્રિપુરો નામ દૈત્યસ્તુ પુરાઽઽસીત્સર્વદુર્જયઃ ॥ ૩॥

જિતાસ્તેન સુરાઃ સર્વે બ્રહ્મવિષ્ણ્વાદિદેવતાઃ ।
સર્વૈસ્તુ કથિતે તસ્મિંસ્તદાહં ત્રિપુરં પ્રતિ ॥ ૪॥

અચિન્તયં મહાશસ્ત્રમઘોરાખ્યં મનોહરમ્ ।
સર્વદેવમયં દિવ્યં જ્વલન્તં ઘોરરૂપિ યત્ ॥ ૫॥

ત્રિપુરસ્ય વધાર્થાય દેવાનાં તારણાય ચ ।
સર્વવિઘ્નોપશમનમઘોરાસ્ત્રમચિન્તયમ્ ॥ ૬॥

દિવ્યવર્ષસહસ્રં તુ ચક્ષુરુન્મીલિતં મયા ।
પશ્ચાન્મમાકુલાક્ષિભ્યઃ પતિતા જલબિન્દવઃ ॥ ૭॥

તત્રાશ્રુબિન્દુતો જાતા મહારુદ્રાક્ષવૃક્ષકાઃ ।
મમાજ્ઞયા મહાસેન સર્વેષાં હિતકામ્યયા ॥ ૮॥

બભૂવુસ્તે ચ રુદ્રાક્ષા અષ્ટત્રિંશત્પ્રભેદતઃ ।
સૂર્યનેત્રસમુદ્ભૂતાઃ કપિલા દ્વાદશ સ્મૃતાઃ ॥ ૯॥

સોમનેત્રોત્થિતાઃ શ્વેતાસ્તે ષોડશવિધાઃ ક્રમાત્ ।
વહ્નિનેત્રોદ્ભવાઃ કૃષ્ણા દશ ભેદા ભવન્તિ હિ ॥ ૧૦॥

શ્વેતવર્ણશ્ચ રુદ્રાક્ષો જાતિતો બ્રાહ્મ ઉચ્યતે ।

ક્ષાત્રો રક્તસ્તથા મિશ્રો વૈશ્યઃ કૃષ્ણસ્તુ શૂદ્રકઃ ॥ ૧૧॥

એકવક્ત્રઃ શિવઃ સાક્ષાદ્બ્રહ્મહત્યાં વ્યપોહતિ ।
દ્વિવક્ત્રો દેવદેવ્યો સ્યાદ્વિવિધં નાશયેદઘમ્ ॥ ૧૨॥

ત્રિવક્ત્રસ્ત્વનલઃ સાક્ષાત્સ્ત્રીહત્યાં દહતિ ક્ષણાત્ ।
ચતુર્વક્ત્રઃ સ્વયં બ્રહ્મા નરહત્યાં વ્યપોહતિ ॥ ૧૩॥

પઞ્ચવક્ત્રઃ સ્વયં રુદ્રઃ કાલાગ્નિર્નામ નામતઃ ।
અભક્ષ્યભક્ષણોદ્ભૂતૈરગમ્યાગમનોદ્ભવૈઃ ॥ ૧૪॥

મુચ્યતે સર્વપાપૈસ્તુ પઞ્ચવક્ત્રસ્ય ધારણાત્ ।
ષડ્વક્ત્રઃ કાર્તિકેયસ્તુ સ ધાર્યો દક્ષિણે કરે ॥ ૧૫॥

બ્રહ્મહત્યાદિભિઃ પાપૈર્મુચ્યતે નાત્ર સંશયઃ ।
સપ્તવક્ત્રો મહાભાગો હ્યનઙ્ગો નામ નામતઃ ॥ ૧૬॥

તદ્ધારણાન્મુચ્યતે હિ સ્વર્ણસ્તેયાદિપાતકૈઃ ।
અષ્ટવક્ત્રો મહાસેન સાક્ષાદ્દેવો વિનાયકઃ ॥ ૧૭॥

અન્તકૂટં તૂલકૂટં સ્વર્ણકૂટં તથૈવ ચ ।
દુષ્ટાન્વયસ્ત્રિયં વાથ સંસ્પૃશંશ્ચ ગુરુસ્ત્રિયમ્ ॥ ૧૮॥

એવમાદીનિ પાપાનિ હન્તિ સર્વાણિ ધારણાત્ ।
વિઘ્નાસ્તસ્ય પ્રણશ્યન્તિ યાતિ ચાન્તે પરં પદમ્ ॥ ૧૯॥

ભવન્ત્યેતે ગુણાઃ સર્વે હ્યષ્ટવક્ત્રસ્ય ધારણાત્ ।
નવવક્ત્રો ભૈરવસ્તુ ધારયેદ્વામબાહુકે ॥ ૨૦॥

ભુક્તિમુક્તિપ્રદઃ પ્રોક્તો મમ તુલ્યબલો ભવેત્ ।
ભ્રૂણહત્યાસહસ્રાણિ બ્રહ્મહત્યાશતાનિ ચ ॥ ૨૧॥

સદ્યઃ પ્રલયમાયાન્તિ નવવક્ત્રસ્ય ધારણાત્ ।
દશવક્ત્રસ્તુ દેવેશઃ સાક્ષાદ્દેવો જનાર્દનઃ ॥ ૨૨॥

ગ્રહાશ્ચૈવ પિશાચાશ્ચ વેતાલા બ્રહ્મરાક્ષસાઃ ।
પન્નગાશ્ચોપશામ્યન્તિ દશવક્ત્રસ્ય ધારણાત્ ॥ ૨૩॥

વક્ત્રૈકાદશરુદ્રાક્ષો રુદ્રૈકાદશકં સ્મૃતમ્ ।
શિખાયાં ધારયેદ્યો વૈ તસ્ય પુણ્યફલં શૃણુ ॥ ૨૪॥

અશ્વમેધસહસ્રસ્ય વાજપેયશતસ્ય ચ ।
ગવાં શતસહસ્રસ્ય સમ્યગ્દત્તસ્ય યત્ફલમ્ ॥ ૨૫॥

તત્ફલં લભતે શીઘ્રં વક્ત્રૈકાદશધારણાત્ ।
દ્વાદશાસ્યસ્ય રુદ્રાક્ષસ્યૈવ કર્ણે તુ ધારણાત્ ॥ ૨૬॥

આદિત્યાસ્તોષિતા નિત્યં દ્વાદશાસ્યે વ્યવસ્થિતાઃ ।
ગોભેધે ચાશ્વમેધે ચ યત્ફલં તદવાપ્નુયાત્ ॥ ૨૭॥

શ‍ૃઙ્ગિણાં શસ્ત્રિણાં ચૈવ વ્યાઘ્રાદીનાં ભયં ન હિ ।
ન ચ વ્યાધિભયં તસ્ય નૈવ ચાધિઃ પ્રકીર્તિતઃ ॥ ૨૮॥

ન ચ કિઞ્ચિદ્ભયં તસ્ય ન ચ વ્યાધિઃ પ્રવર્તતે ।
ન કુતશ્ચિદ્ભયં તસ્ય સુખી ચૈવેશ્વરો ભવેત્ ॥ ૨૯॥

હસ્ત્યશ્વમૃગમાર્જારસર્પમૂષકદર્દુરાન્ ।
ખરાંશ્ચ શ્વશ‍ૃગાલાંશ્ચ હત્વા બહુવિધાનપિ ॥ ૩૦॥

મુચ્યતે નાત્ર સન્દેહો વક્ત્રદ્વાદશધારણાત્ ।
વક્ત્રત્રયોદશો વત્સ રુદ્રાક્ષો યદિ લભ્યતે ॥ ૩૧॥

કાર્તિકેયસમો જ્ઞેયઃ સર્વકામાર્થસિદ્ધિદઃ ।
રસો રસાયનં ચૈવ તસ્ય સર્વં પ્રસિદ્ધ્યતિ ॥ ૩૨॥

તસ્યૈવ સર્વભોગ્યાનિ નાત્ર કાર્યા વિચારણા ।
માતરં પિતરં ચૈવ ભ્રાતરં વા નિહન્તિ યઃ ॥ ૩૩॥

મુચ્યતે સર્વપાપેભ્યો ધારણાત્તસ્ય ષણ્મુખ ।
ચતુર્દશાસ્યો રુદ્રાક્ષો યદિ લભ્યેત પુત્રક ॥ ૩૪॥

ધારયેત્સતતં મૂર્ધ્નિ તસ્ય પિણ્ડઃ શિવસ્ય તુ ।
કિં મુને બહુનોક્તેન વર્ણનેન પુનઃ પુનઃ ॥ ૩૫॥

પૂજ્યતે સન્તતં દેવૈઃ પ્રાપ્યતે ચ પરા ગતિઃ ।
રુદ્રાક્ષ એકઃ શિરસા ધાર્યો ભક્ત્યા દ્વિજોત્તમૈઃ ॥ ૩૬॥

ષડ્વિંશદ્ભિઃ શિરોમાલા પઞ્ચાશદ્ધૃદયેન તુ ।
કલાક્ષૈર્બાહુવલયે અર્કાક્ષૈર્મણિબન્ધનમ્ ॥ ૩૭॥

અષ્ટોત્તરશતૈર્માલા પઞ્ચાશદ્ભિઃ ષડાનન ।
અથવા સપ્તવિંશત્યા કૃત્વા રુદ્રાક્ષમાલિકામ્ ॥ ૩૮॥

ધારણાદ્વા જપાદ્વાપિ હ્યનન્તં ફલમશ્નુતે ।
અષ્ટોત્તરશતૈર્માલા રુદ્રાક્ષૈર્ધાર્યતે યદિ ॥ ૩૯॥

ક્ષણે ક્ષણેઽશ્વમેધસ્ય ફલં પ્રાપ્નોતિ ષણ્મુખ ।
ત્રિઃસપ્તકુલમુદ્ધૃત્ય શિવલોકે મહીયતે ॥ ૪૦॥

ઇતિ શ્રીમદ્દેવીભાગવતે મહાપુરાણેઽષ્ટાદશસાહસ્ર્યાં
સંહિતાયામેકાદશસ્કન્ધે રુદ્રાક્ષમાહાત્મ્યવર્ણનં નામ ચતુર્થોઽધ્યાયઃ ॥ ૧૧.૪॥

## ૧૧.૫ પઞ્ચમોઽધ્યાયઃ । રુદ્રાક્ષજપમાલાવિધાનવર્ણનમ્ ।

ઈશ્વર ઉવાચ ।
લક્ષણં જપમાલાયાઃ શૃણુ વક્ષ્યામિ ષણ્મુખ ।
રુદ્રાક્ષસ્ય મુખં બ્રહ્મા બિન્દૂ રુદ્ર ઇતીરિતઃ ॥ ૧॥

વિષ્ણુઃ પુચ્છં ભવેચ્ચૈવ ભોગમોક્ષફલપ્રદમ્ ।
પઞ્ચવિંશતિભિશ્ચાક્ષૈઃ પઞ્ચવક્ત્રૈઃ સકણ્ટકૈઃ ॥ ૨॥

રક્તવર્ણૈઃ સિતૈર્મિશ્રૈઃ કૃતરન્ધ્રવિદર્ભિતૈઃ ।
અક્ષસૂત્રં પ્રકર્તવ્યં ગોપુચ્છવલયાકૃતિ ॥ ૩॥

વક્ત્રં વક્ત્રેણ સંયોજ્ય પુચ્છં પુચ્છેન યોજયેત્ ।
મેરુમૂર્ધ્વમુખં કુર્યાત્તદૂર્ધ્વં નાગપાશકમ્ ॥ ૪॥

એવં સઙ્ગ્રથિતાં માલાં મન્ત્રસિદ્ધિપ્રદાયિનીમ્ ।
પ્રક્ષાલ્ય ગન્ધતોયેન પઞ્ચગવ્યેન ચોપરિ ॥ ૫॥

તતઃ શિવામ્ભસાઽઽક્ષાલ્ય તતો મન્ત્રગણાન્ન્યસેત્ ।
સ્પૃષ્ટ્વા શિવાસ્ત્રમન્ત્રેણ કવચેનાવગુણ્ઠયેત્ ॥ ૬॥

મૂલમન્ત્રં ન્યસેત્પશ્ચાત્પૂર્વવત્કારયેત્તથા ।
સદ્યોજાતાદિભિઃ પ્રોક્ષ્ય યાવદષ્ટોત્તરં શતમ્ ॥ ૭॥

મૂલમન્ત્રં સમુચ્ચાર્ય શુદ્ધભૂમૌ નિધાય ચ ।
તસ્યોપરિ ન્યસેત્સામ્બં શિવં પરમકારણમ્ ॥ ૮॥

પ્રતિષ્ઠિતા ભવેન્માલા સર્વકામફલપ્રદા ।
યસ્ય દેવસ્ય યો મન્ત્રસ્તાં તેનૈવાભિપૂજયેત્ ॥ ૯॥

મૂર્ધ્નિ કણ્ઠેઽથવા કર્ણે ન્યસેદ્વા જપમાલિકામ્ ।
રુદ્રાક્ષમાલયા ચૈવં જપ્તવ્યં નિયતાત્મના ॥ ૧૦॥

કણ્ઠે મૂર્ધ્નિ હૃદિ પ્રાન્તે કર્ણે બાહુયુગેઽથવા ।
રુદ્રાક્ષધારણં નિત્યં ભક્ત્યા પરમયા યુતઃ । ૧૧॥

કિમત્ર બહુનોક્તેન વર્ણનેન પુનઃ પુનઃ ।
રુદ્રાક્ષધારણં નિત્યં તસ્માદેતત્પ્રશસ્યતે ॥ ૧૨॥

સ્નાને દાને જપે હોમે વૈશ્વદેવે સુરાર્ચને ।
પ્રાયશ્ચિત્તે તથા શ્રાદ્ધે દીક્ષાકાલે વિશેષતઃ ॥ ૧૩॥

અરુદ્રાક્ષધરો ભૂત્વા યત્કિઞ્ચિત્કર્મ વૈદિકમ્ ।
કુર્વન્વિપ્રસ્તુ મોહેન નરકે પતતિ ધ્રુવમ્ ॥ ૧૪॥

રુદ્રાક્ષં ધારયેન્મૂર્ધ્નિ કણ્ઠે સૂત્રે કરેઽથવા ।
સુવર્ણમણિસમ્ભિન્નં શુદ્ધં નાન્યૈર્ધૃતં શિવમ્ ॥ ૧૫॥

નાશુચિર્ધારયેદક્ષં સદા ભક્ત્યૈવ ધારયેત્ ।
રુદ્રાક્ષતરુસમ્ભૂતવાતોદ્ભૂતતૃણાન્યપિ ॥ ૧૬॥

પુણ્યલોકં ગમિષ્યન્તિ પુનરાવૃત્તિદુર્લભમ્ ।
રુદ્રાક્ષં ધારયન્પાપં કુર્વન્નપિ ચ માનવઃ ॥ ૧૭॥

સર્વં તરતિ પાપ્માનં જાબાલશ્રુતિરાહ હિ ।
પશવો હિ ચ રુદ્રાક્ષધારણાદ્યાન્તિ રુદ્રતામ્ ॥ ૧૮॥

કિમુ યે ધારયન્તિ સ્મ નરા રુદ્રાક્ષમાલિકામ્ ।
રુદ્રાક્ષઃ શિરસા હ્યેકો ધાર્યો રુદ્રપરૈઃ સદા ॥ ૧૯॥

ધ્વંસનં સર્વદુઃખાનાં સર્વપાપવિમોચનમ્ ।
વ્યાહરન્તિ ચ નામાનિ યે શમ્ભોઃ પરમાત્મનઃ ॥ ૨૦॥

રુદ્રાક્ષાલઙ્કૃતા યે ચ તે વૈ ભાગવતોત્તમાઃ ।
રુદ્રાક્ષધારણં કાર્યં સર્વશ્રેયોઽર્થિભિર્નૃભિઃ ॥ ૨૧॥

કર્ણપાશે શિખાયાં ચ કણ્ઠે હસ્તે તથોદરે ।
મહાદેવશ્ચ વિષ્ણુશ્ચ બ્રહ્મા તેષાં વિભૂતયઃ ॥ ૨૨॥

દેવાશ્ચાન્યે તથા ભક્ત્યા ખલુ રુદ્રાક્ષધારિણઃ ।
ગોત્રર્ષયશ્ચ સર્વેષાં કૂટસ્થા મૂલરૂપિણઃ ॥ ૨૩॥

તેષાં વંશપ્રસૂતાશ્ચ મુનયઃ સકલા અપિ ।
શ્રૌતધર્મપરાઃ શુદ્ધાઃ ખલુ રુદ્રાક્ષધારિણઃ ॥ ૨૪॥

શ્રદ્ધા ન જાયતે સાક્ષાદ્વેદસિદ્ધે વિમુક્તિદે ।
બહૂનાં જન્મનામન્તે મહાદેવપ્રસાદતઃ ॥ ૨૫॥

રુદ્રાક્ષધારણે વાઞ્છા સ્વભાવાદેવ જાયતે ।
રુદ્રાક્ષસ્ય તુ માહાત્મ્યં જાબાલૈરાદરેણ તુ ॥ ૨૬॥

પઠ્યતે મુનિભિઃ સર્વૈર્મયા પુત્ર તથૈવ ચ ।
રુદ્રાક્ષસ્ય ફલં ચૈવ ત્રિષુ લોકેષુ વિશ્રુતમ્ ॥ ૨૭॥

ફલસ્ય દર્શને પુણ્યં સ્પર્શાત્કોટિગુણં ભવેત્ ।
શતકોટિગુણં પુણ્યં ધારણાલ્લભતે નરઃ ॥ ૨૮॥

લક્ષકોટિસહસ્રાણિ લક્ષકોટિશતાનિ ચ ।
જપાચ્ચ લભતે નિત્યં નાત્ર કાર્યા વિચારણા ॥ ૨૯॥

હસ્તે ચોરસિ કણ્ઠે ચ કર્ણયોર્મસ્તકે તથા ।
રુદ્રાક્ષં ધારયેદ્યસ્તુ સ રુદ્રો નાત્ર સંશયઃ ॥ ૩૦॥

અવધ્યઃ સર્વભૂતાનાં રુદ્રવદ્ધિ ચરેદ્ભુવિ ।
સુરાણામસુરાણાં ચ વન્દનીયો યથા શિવઃ ॥ ૩૧॥

રુદ્રાક્ષધારી સતતં વન્દનીયસ્તથા નરૈઃ ।
ઉચ્છિષ્ટો વા વિકર્મસ્થો યુક્તો વા સર્વપાતકૈઃ ॥ ૩૨॥

મુચ્યતે સર્વપાપેભ્યો રુદ્રાક્ષસ્ય તુ ધારણાત્ ।
કણ્ઠે રુદ્રાક્ષમાબધ્ય શ્વાપિ વા મ્રિયતે યદિ ॥ ૩૩॥

સોઽપિ મુક્તિમવાપ્નોતિ કિં પુનર્માનુષોઽપિ સઃ ।
જપધ્યાનવિહીનોઽપિ રુદ્રાક્ષં યદિ ધારયેત્ ॥ ૩૪॥

સર્વપાપવિનિર્મુક્તઃ સ યાતિ પરમાં ગતિમ્ ।
એકં વાપિ હિ રુદ્રાક્ષં કૃત્વા યત્નેન ધારયેત્ ॥ ૩૫॥

એકવિંશતિમુદ્ધૃત્ય રુદ્રલોકે મહીયતે ।
અતઃ પરં પ્રવક્ષ્યામિ રુદ્રાક્ષસ્ય પુનર્વિધિમ્ ॥ ૩૬॥

ઇતિ શ્રીમદ્દેવીભાગવતે મહાપુરાણેઽષ્ટાદશસાહસ્ર્યાં સંહિતાયામેકાદશસ્કન્ધે

રુદ્રાક્ષજપમાલાવિધાનવર્ણનં નામ પઞ્ચમોઽધ્યાયઃ ॥ ૧૧.૫॥

## ૧૧.૬ ષષ્ઠોઽધ્યાયઃ । રુદ્રાક્ષમાહાત્મ્યે ગુણનિધિમોક્ષવર્ણનમ્ ।

ઈશ્વર ઉવાચ ।
મહાસેન કુશગ્રન્થિપુત્રાજીવાદયઃ પરે ।
રુદ્રાક્ષસ્ય તુ નૈકોઽપિ કલામર્હતિ ષોડશીમ્ ॥ ૧॥

પુરુષાણાં યથા વિષ્ણુર્ગ્રહાણાં ચ યથા રવિઃ ।
નદીનાં તુ યથા ગઙ્ગા મુનીનાં કશ્યપો યથા ॥ ૨॥

ઉચ્ચૈઃશ્રવા યથાશ્વાનાં દેવાનામીશ્વરો યથા ।
દેવીનાં તુ યથા ગૌરી તદ્વચ્છ્રેષ્ઠમિદં ભવેત્ ॥ ૩॥

નાતઃ પરતરં સ્તોત્રં નાતઃ પરતરં વ્રતમ્ ।
અક્ષય્યેષુ ચ દાનેષુ રુદ્રાક્ષસ્તુ વિશિષ્યતે ॥ ૪॥

શિવભક્તાય શાન્તાય દદ્યાદ્રુદ્રાક્ષમુત્તમમ્ ।
તસ્ય પુણ્યફલસ્યાન્તં ન ચાહં વક્તુમુત્સહે ॥ ૫॥

ધૃતરુદ્રાક્ષકણ્ઠાય યસ્ત્વન્નં સમ્પ્રયચ્છતિ ।
ત્રિસપ્તકુલમુદ્ધૃત્ય રુદ્રલોકં સ ગચ્છતિ ॥ ૬॥

યસ્ય ભાલે વિભૂતિર્ન નાઙ્ગે રુદ્રાક્ષધારણમ્ ।
ન શમ્ભોર્ભવને પૂજા સ વિપ્રઃ શ્વપચાધમઃ ॥ ૭॥

ખાદન્માંસં પિબન્મદ્યં સઙ્ગચ્છન્નન્ત્યજાનપિ ।
પાતકેભ્યો વિમુચ્યેત રુદ્રાક્ષં શિરસિ સ્થિતે ॥ ૮॥

સર્વયજ્ઞતપોદાનવેદાભ્યાસૈશ્ચ યત્ફલમ્ ।
તત્ફલં લભતે સદ્યો રુદ્રાક્ષસ્ય તુ ધારણાત્ ॥ ૯॥

વેદૈશ્ચતુર્ભિર્યત્પુણ્યં પુરાણપઠનેન ચ ।
યત્તીર્થસેવનેનૈવ સર્વવિદ્યાદિભિસ્તથા ॥ ૧૦॥

તત્પુણ્યં લભતે સદ્યો રુદ્રાક્ષસ્ય તુ ધારણાત્ ।
પ્રયાણકાલે રુદ્રાક્ષં બન્ધયિત્વા મ્રિયેદ્યદિ ॥ ૧૧॥

સ રુદ્રત્વમવાપ્નોતિ પુનર્જન્મ ન વિદ્યતે ।
રુદ્રાક્ષં ધારયેત્કણ્ઠે બાહ્વોર્વા મ્રિયતે યદિ ॥ ૧૨॥

કુલૈકવિંશમુત્તાર્ય રુદ્રલોકે વસેન્નરઃ ।
બ્રાહ્મણો વાપિ ચાણ્ડાલો નિર્ગુણઃ સગુણોઽપિ ચ ॥ ૧૩॥

ભસ્મરુદ્રાક્ષધારી યઃ સ દેવત્વં શિવં વ્રજેત્ ।
શુચિર્વાપ્યશુચિર્વાપિ તથાભક્ષ્યસ્ય ભક્ષકઃ ॥ ૧૪॥

મ્લેચ્છો વાપ્યથ ચાણ્ડાલો યુતો વા સર્વપાતકૈઃ ।
રુદ્રાક્ષધારણાદેવ સ રુદ્રો નાત્ર સંશયઃ ॥ ૧૫॥

શિરસા ધારિતે કોટિઃ કર્ણયોર્દશકોટયઃ ।
શતકોટિર્ગલે બદ્ધો મૂર્ધ્નિ કોટિસહસ્રકમ્ ॥ ૧૬॥

અયુતં ચોપવીતે તુ લક્ષકોટિર્ભુજે સ્થિતે ।
મણિબન્ધે તુ રુદ્રાક્ષો મોક્ષસાધનકઃ પરઃ ॥ ૧૭॥

રુદ્રાક્ષધારકો ભૂત્વા યત્કિઞ્ચિત્કર્મ વૈદિકમ્ ।
કુર્વન્વિપ્રઃ સદા ભક્ત્યા મહદાપ્નોતિ તત્ફલમ્ ॥ ૧૮॥

રુદ્રાક્ષમાલિકાં કણ્ઠે ધારયેદ્ભક્તિવર્જિતઃ ।
પાપકર્મા તુ યો નિત્યં સ મુક્તઃ સર્વબન્ધનાત્ ॥ ૧૯॥

રુદ્રાક્ષાર્પિતચેતા યો રુદ્રાક્ષસ્તુ ન વૈ ધૃતઃ ।
અસૌ માહેશ્વરો લોકે નમસ્યઃ સ તુ લિઙ્ગવત્ ॥ ૨૦॥

અવિદ્ધો વા સવિદ્ધો વા રુદ્રાક્ષસ્ય તુ ધારણાત્ ।
શિવલોકં પ્રપદ્યેત કીકટે ગર્દભો યથા ॥ ૨૧॥

સ્કન્દ ઉવાચ ।
રુદ્રાક્ષાન્સન્દધે દેવ ગર્દભઃ કેન હેતુના ।
કીકટે કેન વા દત્તસ્તદ્બ્રૂહિ પરમેશ્વર ॥ ૨૨॥

શ્રીભગવાનુવાચ ।
શ ૃણુ પુત્ર પુરાવૃત્તં ગર્દભો વિન્ધ્યપર્વતે ।
ધત્તે રુદ્રાક્ષભારં તુ વાહિતઃ પથિકેન તુ ॥ ૨૩॥

શ્રાન્તોઽસમર્થસ્તદ્ભારં વોઢું પતિતવાન્ભુવિ ।
પ્રાણૈસ્ત્વક્તસ્ત્રિનેત્રસ્તુ શૂલપાણિર્મહેશ્વરઃ ॥ ૨૪॥

મત્પ્રસાદાન્મહાસેન મદન્તિકમુપાગતઃ ।

યાવદ્વક્ત્રસ્ય સઙ્ખ્યાનં રુદ્રાક્ષાણાં સુદુર્લભમ્ ॥ ૨૫॥

તાવદ્યુગસહસ્રાણિ શિવલોકે મહીયતે ।
સ્વશિષ્યેભ્યસ્તુ વક્તવ્યં નાશિષ્યેભ્યઃ કદાચન ॥ ૨૬॥

અભક્તેભ્યોઽપિ મૂર્ખેભ્યઃ કદાચિન્ન પ્રકાશયેત્ ।
અભક્તો વાસ્તુ ભક્તો વા નીચો નીચતરોઽપિ વા ॥ ૨૭॥

રુદ્રાક્ષાન્ધારયેદ્યસ્તુ મુચ્યતે સર્વપાતકૈઃ ।
રુદ્રાક્ષધારણં પુણ્યં કેન વા સદૃશં ભવેત્ ॥ ૨૮॥

મહાવ્રતમિદં પ્રાહુર્મુનયસ્તત્ત્વદર્શિનઃ ।
સહસ્રં ધારયેદ્યસ્તુ રુદ્રાક્ષાણાં ધૃતવ્રતઃ ॥ ૨૯॥

તં નમન્તિ સુરાઃ સર્વે યથા રુદ્રસ્તથૈવ સઃ ।
અભાવે તુ સહસ્રસ્ય બાહ્વોઃ ષોડશ ષોડશ ॥ ૩૦॥

એકં શિખાયાં કરયોર્દ્વાદશ દ્વાદશૈવ તુ ।
દ્વાત્રિંશત્કણ્ઠદેશે તુ ચત્વારિંશચ્ચ મસ્તકે ॥ ૩૧॥

એકૈકં કર્ણયોઃ ષટ્ ષટ્ વક્ષસ્યષ્ટોત્તરં શતમ્ ।
યો ધારયતિ રુદ્રાક્ષાન્ રુદ્રવત્સ તુ પૂજ્યતે ॥ ૩૨॥

મુક્તાપ્રવાલસ્ફટિકરૌપ્યવૈદૂર્યકાઞ્ચનૈઃ ।
સમેતાન્ધારયેદ્યસ્તુ રુદ્રાક્ષાન્સ શિવો ભવેત્ ॥ ૩૩॥

કેવલાનપિ રુદ્રાક્ષાન્યધાલસ્યાદ્બિભર્તિ યઃ ।
તં ન સ્પૃશન્તિ પાપાનિ તમાંસીવ વિભાવસુમ્ ॥ ૩૪॥

રુદ્રાક્ષમાલયા મન્ત્રો જપ્તોઽનન્તફલપ્રદઃ ।
યસ્યાઙ્ગે નાસ્તિ રુદ્રાક્ષ એકોઽપિ બહુપુણ્યદઃ ॥ ૩૫॥

તસ્ય જન્મ નિરર્થં સ્યાત્ત્રિપુણ્ડ્રરહિતં યથા ।
રુદ્રાક્ષં મસ્તકે ધૃત્વા શિરઃસ્નાનં કરોતિ યઃ ॥ ૩૬॥

ગઙ્ગાસ્નાનફલં તસ્ય જાયતે નાત્ર સંશયઃ ।
એકવક્ત્રઃ પઞ્ચવક્ત્ર એકાદશમુખાઃ પરે ॥ ૩૭॥

ચતુર્દશમુખાઃ કેચિદ્રુદ્રાક્ષા લોકપૂજિતાઃ ।
ભક્ત્યા સમ્પૂજ્યતે નિત્યં રુદ્રાક્ષઃ શઙ્કરાત્મકઃ ॥ ૩૮॥

દરિદ્રં વાપિ પુરુષં રાજાનં કુરુતે ભુવિ ।
અત્ર તે કથયિષ્યામિ પુરાણં મતમુત્તમમ્ ॥ ૩૯॥

કોસલેષુ દ્વિજઃ કશ્ચિદ્ગિરિનાથ ઇતિ શ્રુતઃ ।
મહાધની ચ ધર્માત્મા વેદવેદાઙ્ગપારગઃ ॥ ૪૦॥

યજ્ઞકૃદ્દીક્ષિતસ્તસ્ય તનયઃ સુન્દરાકૃતિઃ ।
નામ્ના ગુણનિધિઃ ખ્યાતસ્તરુણઃ કામસુન્દરઃ ॥ ૪૧॥

ગુરોઃ સુધિષણસ્યાથ પત્નીં મુક્તાવલીમથ ।
મોહયામાસ રૂપેણ યૌવનેન મદેન ચ ॥ ૪૨॥

સઙ્ગતસ્તુ તયા સાર્ધં કઞ્ચિત્કાલં તતો ભિયા ।
વિષં દદૌ ચ ગુરવે યેભે પશ્ચાત્તુ નિર્ભયઃ ॥ ૪૩॥

યદા માતા પિતા કર્મ કિઞ્ચિજ્જાનાતિ યત્ક્ષણે ।
માતરં પિતરં ચાપિ મારયામાસ તદ્દ્વિષાત્ ॥ ૪૪॥

નાનાવિલાસભોગૈશ્ચ જાતે દ્રવ્યવ્યયે તતઃ ।
બ્રાહ્મણાનાં ગૃહે ચૌર્યં ચકાર સ તદા ખલઃ ॥ ૪૫॥

સુરાપાનમદોન્મત્તસ્તદા જ્ઞાતિબહિષ્કૃતઃ ।
ગ્રામાન્નિષ્કાસિતઃ સર્વૈસ્તદા સોઽભૂદ્વનેચરઃ ॥ ૪૬॥

મુક્તાવલ્યા તયા સાર્ધં જગામ ગહનં વનમ્ ।
માર્ગે સ્થિતો દ્રવ્યલોભાજ્જઘાન બ્રાહ્મણાન્બહૂન્ ॥ ૪૭॥

એવં બહુગતે કાલે મમાર સ તદાધમઃ ।
નેતું તં યમદૂતાશ્ચ સમાજગ્મુઃ સહસ્રશઃ ॥ ૪૮॥

શિવલોકાચ્છિવગણાસ્તથૈવ ચ સમાગતાઃ ।
તયોઃ પરસ્પરં વાદો બભૂવ ગિરિજાસુત ॥ ૪૯॥

યમદૂતાસ્તદા પ્રોચુઃ પુણ્યમસ્ય કિમસ્તિ હિ ।
બ્રુવન્તુ સેવકાઃ શમ્ભોર્યદ્યેનં નેતુમિચ્છથ ॥ ૫૦॥

શિવદૂતાસ્તદા પ્રોચુરયં યસ્મિન્સ્થલે મૃતઃ ।
દશહસ્તાદધો ભૂમે રુદ્રાક્ષસ્તત્ર ચાસ્તિ હિ ॥ ૫૧॥

તત્પ્રભાવેણ હે દૂતા નેષ્યામઃ શિવસન્નિધિમ્ ।
તતો વિમાનમારુહ્ય દિવ્યરૂપધરો દ્વિજઃ ॥ ૫૨॥

ગતો ગુણનિધિર્દૂતૈઃ સહિતઃ શઙ્કરાલયમ્ ।
ઇતિ રુદ્રાક્ષમાહાત્મ્યં કથિતં તવ સુવ્રત ॥ ૫૩॥

એવં રુદ્રાક્ષમહિમા સમાસાત્કથિતો મયા ।
સર્વપાપક્ષયકરો મહાપુણ્યફલપ્રદઃ ॥ ૫૪॥

ઇતિ શ્રીમદ્દેવીભાગવતે મહાપુરાણેઽષ્ટાદશસાહસ્ર્યાં
સંહિતાયામેકાદશસ્કન્ધે રુદ્રાક્ષમાહાત્મ્યે
ગુણનિધિમોક્ષવર્ણનં નામ ષષ્ઠોઽધ્યાયઃ ॥ ૧૧.૬॥

## ૧૧.૭ સપ્તમોઽધ્યાયઃ । રુદ્રાક્ષમાહાત્મ્યવર્ણનમ્ ।

શ્રીનારાયણ ઉવાચ ।
એવં નારદ ષણ્મુખ્રો ગિરિશેન વિબોધિતઃ ।
રુદ્રાક્ષમહિમાનં ચ જ્ઞાત્વાસીત્સ કૃતાર્થકઃ ॥ ૧॥

ઇત્થં ભૂતાનુભાવોઽયં રુદ્રાક્ષો વર્ણિતો મયા ।
સદાચારપ્રસઙ્ગેન શ ૃણુ ચાન્યત્સમાહિતઃ ॥ ૨॥

યથા રુદ્રાક્ષમહિમા વર્ણિતોઽનન્તપુણ્યદઃ ।
લક્ષણં મન્ત્રવિન્યાસં તથાહં વર્ણયામિ તે ॥ ૩॥

લક્ષં તુ દર્શનાત્પુણ્યં કોટિસ્તત્સ્પર્શનાદ્ભવેત્ ।
તસ્ય કોટિગુણં પુણ્યં લભતે ધારણાન્નરઃ ॥ ૪॥

લક્ષકોટિસહસ્રાણિ લક્ષકોટિશતાનિ ચ ।
તજ્જપાલ્લભતે પુણ્યં નરો રુદ્રાક્ષધારણાત્ ॥ ૫॥

રુદ્રાક્ષાણાં તુ ભદ્રાક્ષધારણાત્સ્યાન્મહાફલમ્ ।
ધાત્રીફલપ્રમાણં યચ્છ્રેષ્ઠમેતદુદાહૃતમ્ ॥ ૬॥

બદરીફલમાત્રં તુ પ્રોચ્યતે મધ્યમં બુધૈઃ ।
અધમં ચણમાત્રં સ્યાત્પ્રતિજ્ઞૈષા મયોદિતા ॥ ૭॥

બ્રાહ્મણાઃ ક્ષત્રિયા વૈશ્યાઃ શૂદ્રાશ્ચેતિ શિવાજ્ઞયા ।
વૃક્ષા જાતાઃ પૃથિવ્યાં તુ તજ્જાતીયાઃ શુભાક્ષકાઃ ॥ ૮॥

શ્વેતાસ્તુ બ્રાહ્મણા જ્ઞેયાઃ ક્ષત્રિયા રક્તવર્ણકાઃ ।

પીતા વૈશ્યાસ્તુ વિજ્ઞેયાઃ કૃષ્ણાઃ શૂદ્રાઃ પ્રકીર્તિતાઃ ॥ ૯॥

બ્રાહ્મણો બિભૃયાચ્છ્વેતાન્ રક્તાન્ રાજા તુ ધારયેત્ ।
પીતાન્વૈશ્યસ્તુ બિભૃયાત્કૃષ્ણાન્ શૂદ્રસ્તુ ધારયેત્ ॥ ૧૦॥

સમાઃ સ્નિગ્ધા દૃઢાસ્તદ્વત્કણ્ટકૈઃ સંયુતાઃ શુભાઃ ।
કૃમિદષ્ટાઞ્છિન્નભિન્નાન્કણ્ટકૈરહિતાંસ્તથા ॥ ૧૧॥

વ્રણયુક્તાનાવૃતાંશ્ચ ષડ્રુદ્રાક્ષાંસ્તુ વર્જયેત્ ।
સ્વયમેવ કૃતદ્વારો રુદ્રાક્ષઃ સ્યાદિહોત્તમઃ ॥ ૧૨॥

યત્તુ પૌરુષયત્નેન કૃતં તન્મધ્યમં ભવેત્ ।
સમાન્સ્નિગ્ધાન્દૃઢાન્વૃત્તાન્ક્ષૌમસૂત્રેણ ધારયેત્ ॥ ૧૩॥

સર્વગાત્રેષુ સામ્યેન સમાનાતિવિલક્ષણા ।
નિર્ઘર્ષે હેમલેખાભા યત્ર લેખા પ્રદૃશ્યતે ॥ ૧૪॥

તદક્ષમુત્તમં વિદ્યાત્સ ધાર્યઃ શિવપૂજકૈઃ ।
શિખાયામેકરુદ્રાક્ષં ત્રિંશદ્વૈ શિરસા વહેત્ ॥ ૧૫॥

ષટ્ત્રિંશચ્ચ ગલે ધાર્યા બાહ્વોઃ ષોડશ ષોડશ ।
મણિબન્ધે દ્વાદશાક્ષાન્સ્કન્ધે પઞ્ચાશતં ભવેત્ ॥ ૧૬॥

અષ્ટોત્તરશતૈર્માલોપવીતં ચ પ્રકલ્પયેત્ ।
દ્વિસરં ત્રિસરં વાપિ બિભૃયાત્કણ્ઠદેશતઃ ॥ ૧૭॥

કુણ્ડલે મુકુટે ચૈવ કર્ણિકાહારકેષુ ચ ।
કેયૂરે કટકે ચૈવ કુક્ષિવંશે તથૈવ ચ ॥ ૧૮॥

સુપ્તે પીતે સર્વકાલં રુદ્રાક્ષં ધારયેન્નરઃ ।
ત્રિશતં ત્વધમં પઞ્ચશતં મધ્યમમુચ્યતે ॥ ૧૯॥

સહસ્રમુત્તમં પ્રોક્તં ચૈવં ભેદેન ધારયેત્ ।
શિરસીશાનમન્ત્રેણ કર્ણે તત્પુરુષેણ ચ ॥ ૨૦॥

અઘોરેણ લલાટે તુ તેનૈવ હૃદયેઽપિ ચ ।
અઘોરબીજમન્ત્રેણ કરયોર્ધારયેત્પુનઃ ॥ ૨૧॥

પઞ્ચાશદક્ષગ્રથિતાં વામદેવેન ચોદરે ।
પઞ્ચબ્રહ્મભિરઙ્ગૈશ્ચાપ્યેવં રુદ્રાક્ષધારણમ્ ॥ ૨૨॥

ગ્રથિતાન્મૂલમન્ત્રેણ સર્વાનક્ષાંસ્તુ ધારયેત્ ।
એકવક્ત્રસ્તુ રુદ્રાક્ષઃ પરતત્ત્વપ્રકાશકઃ ॥ ૨૩॥

પરતત્ત્વધારણાચ્ચ જાયતે તત્પ્રકાશનમ્ ।
દ્વિવક્ત્રસ્તુ મુનિશ્રેષ્ઠ અર્ધનારીશ્વરો ભવેત્ ॥ ૨૪॥

ધારણાદર્ધનારીશઃ પ્રીયતે તસ્ય નિત્યશઃ ।
ત્રિવક્ત્રસ્ત્વનલઃ સાક્ષાત્સ્ત્રીહત્યાં દહતિ ક્ષણાત્ ॥ ૨૫॥

ત્રિમુખશ્ચૈવ રુદ્રાક્ષોઽપ્યગ્નિત્રયસ્વરૂપકઃ ।
તદ્ધારણાચ્ચ હુતભુક્ તસ્ય તુષ્યતિ નિત્યશઃ ॥ ૨૬॥

ચતુર્મુખસ્તુ રુદ્રાક્ષઃ પિતામહસ્વરૂપકઃ ।
તદ્ધારણાન્મહાશ્રીમાન્મહદારોગ્યમુત્તમમ્ ॥ ૨૭॥

મહતી જ્ઞાનસમ્પત્તિઃ શુદ્ધયે ધારયેન્નરઃ ।
પઞ્ચમુખસ્તુ રુદ્રાક્ષઃ પઞ્ચબ્રહ્મસ્વરૂપકઃ ॥ ૨૮॥

તસ્ય ધારણમાત્રેણ સન્તુષ્યતિ મહેશ્વરઃ ।
ષડ્વક્ત્રશ્ચૈવ રુદ્રાક્ષઃ કાર્તિકેયાધિદૈવતઃ ॥ ૨૯॥

વિનાયકં ચાપિ દેવં પ્રવદન્તિ મનીષિણઃ ।
સપ્તવક્ત્રસ્તુ રુદ્રાક્ષઃ સપ્તમાત્રાધિદૈવતઃ ॥ ૩૦॥

સપ્તાશ્વદૈવતશ્ચૈવ મુનિસપ્તકદૈવતઃ ।
તદ્ધારણાન્મહાશ્રીઃ સ્યાન્મહદારોગ્યમુત્તમમ્ ॥ ૩૧॥

મહતી જ્ઞાનસમ્પત્તિઃ શુચિર્વૈ ધારયેન્નરઃ ।
અષ્ટવક્ત્રસ્તુ રુદ્રાક્ષોઽપ્યષ્ટમાત્રાધિદૈવતઃ ॥ ૩૨॥

વસ્વષ્ટકપ્રીતિકરો ગઙ્ગાપ્રીતિકરઃ શુભઃ ।
તદ્ધારણાદિમે પ્રીતા ભવેયુઃ સત્યવાદિનઃ ॥ ૩૩॥

નવવક્ત્રસ્તુ રુદ્રાક્ષો યમદેવ ઉદાહૃતઃ ।
તદ્ધારણાદ્યમભયં ન ભવત્યેવ સર્વથા ॥ ૩૪॥

દશવક્ત્રસ્તુ રુદ્રાક્ષો દશાશાદૈવતઃ સ્મૃતઃ ।
દશાશાપ્રીતિજનકો ધારણે નાત્ર સંશયઃ ॥ ૩૫॥

એકાદશમુખસ્ત્વક્ષો રુદ્રૈકાદશદૈવતઃ ।
તમિન્દ્રદૈવતં ચાહુઃ સદા સૌખ્યવિવર્ધનમ્ ॥ ૩૬॥

રુદ્રાક્ષો દ્વાદશમુખો મહાવિષ્ણુસ્વરૂપકઃ ।
દ્વાદશાદિત્યદૈવશ્ચ બિભર્ત્યેવ હિ તત્પરઃ ॥ ૩૭॥

ત્રયોદશમુખશ્ચાક્ષઃ કામદઃ સિદ્ધિદઃ શુભઃ ।
તસ્ય ધારણમાત્રેણ કામદેવઃ પ્રસીદતિ ॥ ૩૮॥

ચતુર્દશમુખશ્ચાક્ષો રુદ્રનેત્રસમુદ્ભવઃ ।
સર્વવ્યાધિહરશ્ચૈવ સર્વારોગ્યપ્રદાયકઃ ॥ ૩૯॥

મદ્યં માંસં ચ લશુનં પલાણ્ડું શિગ્રુમેવ ચ ।
શ્લેષ્માતકં વિડ્વરાહં ભક્ષણે વર્જયેત્તતઃ ॥ ૪૦॥

ગ્રહણે વિષુવે ચૈવ સઙ્ક્રમે ત્વયને તથા ।
દર્શે ચ પૌર્ણમાસે ચ પુણ્યેષુ દિવસેષ્વપિ ।
રુદ્રાક્ષધારણાત્સદ્યઃ સર્વપાપૈઃ પ્રમુચ્યતે ॥ ૪૧॥

ઇતિ શ્રીમદ્દેવીભાગવતે મહાપુરાણેઽષ્ટાદશસાહસ્ર્યાં
સંહિતાયામેકાદશસ્કન્ધે
રુદ્રાક્ષમાહાત્મ્યવર્ણનં નામ સપ્તમોઽધ્યાયઃ ॥ ૧૧.૭॥

## ૧૧.૮ અષ્ટમોઽધ્યાયઃ । ભૂતશુદ્ધિવર્ણનમ્ ।

શ્રીનારાયણ ઉવાચ ।
ભૂતશુદ્ધિપ્રકારં ચ કથયામિ મહામુને ।
મૂલાધારાત્સમુત્થાય કુણ્ડલીં પરદેવતામ્ ॥ ૧॥

સુષુમ્ણામાર્ગમાશ્રિત્ય બ્રહ્મરન્ધ્રગતાં સ્મરેત્ ।
જીવં બ્રહ્મણિ સંયોજ્ય હંસમન્ત્રેણ સાધકઃ ॥ ૨॥

પાદાદિજાનુપર્યન્તં ચતુષ્કોણં સવજ્રકમ્ ।
લં બીજાખ્યં સ્વર્ણવર્ણં સ્મરેદવનિમણ્ડલમ્ ॥ ૩॥

જાન્વાદ્યાનાભિચન્દ્રાર્ધનિભં પદ્મદ્વયાઙ્કિતમ્ ।
વં બીજયુક્તં શ્વેતાભમમ્ભસો મણ્ડલં સ્મરેત્ ॥ ૪॥

નાભેર્હૃદયપર્યન્તં ત્રિકોણં સ્વસ્તિકાન્વિતમ્ ।
રં બીજેન યુતં રક્તં સ્મરેત્પાવકમણ્ડલમ્ ॥ ૫॥

હૃદો ભ્રૂમધ્યપર્યન્તં વૃત્તં ષડ્બિન્દુલાઞ્છિતમ્ ।
યં બીજયુક્તં ધૂમ્રાભં નભસ્વન્મણ્ડલં સ્મરેત્ ॥ ૬॥

આબ્રહ્મરન્ધ્રં ભ્રૂમધ્યાદ્વૃત્તં સ્વચ્છં મનોહરમ્ ।
હં બીજયુક્તમાકાશમણ્ડલં ચ વિચિન્તયેત્ ॥ ૭॥

એવં ભૂતાનિ સઞ્ચિન્ત્ય પ્રત્યેકં સંવિલાપયેત્ ।
ભુવં જલે જલં વહ્નૌ વહ્નિં વાયૌ નભસ્યમુમ્ ॥ ૮॥

વિલાપ્ય ખમહઙ્કારે મહત્તત્ત્વેઽપ્યહઙ્કૃતિમ્ ।
મહાન્તં પ્રકૃતૌ માયામાત્મનિ પ્રવિલાપયેત્ ॥ ૯॥

શુદ્ધસંવિન્મયો ભૂત્વા ચિન્તયેત્પાપપૂરુષમ્ ।
વામકુક્ષિસ્થિતં કૃષ્ણમઙ્ગુષ્ઠપરિમાણકમ્ ॥ ૧૦॥

બ્રહ્મહત્યાશિરોયુક્તં કનકસ્તેયબાહુકમ્ ।
મદિરાપાનહૃદયં ગુરુતલ્પકટીયુતમ્ ॥ ૧૧॥

તત્સંસર્ગિપદદ્વન્દ્વમુપપાતકમસ્તકમ્ ।
ખડ્ગચર્મધરં કૃષ્ણમધોવક્ત્રં સુદુઃસહમ્ ॥ ૧૨॥

વાયુબીજં સ્મરન્વાયું સમ્પૂર્યૈનં વિશોષયેત્ ।
સ્વશરીરયુતં મન્ત્રી વહ્નિબીજેન નિર્દહેત્ ॥ ૧૩॥

કુમ્ભકે પરિજપ્તેન તતઃ પાપનરોદ્ભવમ્ ।
બહિર્ભસ્મ સમુત્સાર્ય વાયુબીજેન રેચયેત્ ॥ ૧૪॥

સુધાબીજેન દેહોત્થં ભસ્મ સમ્પ્લાવયેત્સુધીઃ ।
ભૂબીજેન ઘનીકૃત્ય ભસ્મ તત્કનકાણ્ડવત્ ॥ ૧૫॥

વિશુદ્ધમુકુરાકારં જપન્બીજં વિહાયસઃ ।
મૂર્ધાદિપાદપર્યન્તાન્યઙ્ગાનિ રચયેત્સુધીઃ ॥ ૧૬॥

આકાશાદીનિ ભૂતાનિ પુનરુત્પાદયેચ્ચિતઃ ।
સોઽહં મન્ત્રેણ ચાત્માનમાનયેદ્ધૃદયામ્બુજે ॥ ૧૭॥

કુણ્ડલીજીવમાદાય પરસઙ્ગાત્સુધામયમ્ ।
સંસ્થાપ્ય હૃદયામ્ભોજે મૂલાધારગતાં સ્મરેત્ ॥ ૧૮॥

રક્તામ્ભોધિસ્થપોતોલ્લસદરુણ-
સરોજાધિરૂઢા કરાબ્જૈઃ

શૂલં કોદણ્ડમિક્ષૂદ્ભવમણિગુણ-
મપ્યઙ્કુશં પઞ્ચબાણાન્ ।
બિભ્રાણાસૃક્કપાલં ત્રિનયન-
લસિતા પીનવક્ષોરુહાઢ્યા
દેવી બાલાર્કવર્ણા ભવતુ
સુખકરી પ્રાણશક્તિઃ પરા નઃ ॥ ૧૯॥

એવં ધ્યાત્વા પ્રાણશક્તિં પરમાત્મસ્વરૂપિણીમ્ ।
વિભૂતિધારણં કાર્યં સર્વાધિકૃતિસિદ્ધયે ॥ ૨૦॥

વિભૂતેર્વિસ્તરં વક્ષ્યે ધારણે ચ મહાફલમ્ ।
શ્રુતિસ્મૃતિપ્રમાણોક્તં ભસ્મધારણમુત્તમમ્ ॥ ૨૧॥

ઇતિ શ્રીમદ્દેવીભાગવતે મહાપુરાણેઽષ્ટાદશસાહસ્ર્યાં
સંહિતાયામેકાદશસ્કન્ધે ભૂતશુદ્ધિવર્ણનં નામાષ્ટમોઽધ્યાયઃ ॥ ૧૧.૮॥

## ૧૧.૯ નવમોઽધ્યાયઃ । સશિરોવ્રતં ત્રિપુણ્ડ્ધારણવર્ણનમ્ ।

શ્રીનારાયણ ઉવાચ ।
ઇદં શિરોવ્રતં ચીર્ણં વિધિવદ્યૈર્દ્વિજાતિભિઃ ।
તેષામેવ પરાં વિદ્યાં વદેદજ્ઞાનબાધિકામ્ ॥ ૧॥

વિધિવચ્છ્રદ્ધયા સાર્ધં ન ચીર્ણં યૈઃ શિરોવ્રતમ્ ।
શ્રૌતસ્માર્તસમાચારસ્તેષામનુપકારકઃ ॥ ૨॥

શિરોવ્રતસમાચારાદેવ બ્રહ્માદિદેવતાઃ ।
દેવતા અભવન્વિદ્વન્ ખલુ નાન્યેન હેતુના ॥ ૩॥

શિરોવ્રતસ્ય માહાત્મ્યં પૂર્વૈઃ પૂર્વતરં કૃતમ્ ।
બ્રહ્મા વિષ્ણુશ્ચ રુદ્રશ્ચ દેવતાઃ સકલા અપિ ॥ ૪॥

સર્વપાતકયુક્તોઽપિ મુચ્યતે સર્વપાતકૈઃ ।
શિરોવ્રતમિદં યેન ચરિતં વિધિવદ્બુધૈઃ ॥ ૫॥

શિરોવ્રતમિદં નામ શિરસ્યાથર્વણશ્રુતેઃ ।
યદુક્તં તદ્ધિ નૈવાન્યત્તત્તુ પુણ્યેન લભ્યતે ॥ ૬॥

શાખાભેદેષુ નામાનિ વ્રતસ્યાસ્ય વિભેદતઃ ।

પઠ્યન્તે મુનિશાર્દૂલ શાખાસ્વેકવ્રતં હિ તત્ ॥ ૭॥

સર્વશાખાસુ વસ્ત્વેકં શિવાખ્યં સત્યચિદ્ઘનમ્ ।
તથા તદ્વિષયં જ્ઞાનં તથૈવ ચ શિરોતવ્રતમ્ ॥ ૮॥

શિરોવ્રતવિહીનસ્તુ સર્વધર્મવિવર્જિતઃ ।
અપિ સર્વાસુ વિદ્યાસુ સોઽધિકારી ન સંશયઃ ॥ ૯॥

શિરોવ્રતમિદં કાર્યં પાપકાન્તારદાહકમ્ ।
સાધનં સર્વવિદ્યાનાં યતસ્તત્સમ્યગાચરેત્ ॥ ૧૦॥

શ્રુતિરાથર્વણી સૂક્ષ્મા સૂક્ષ્માર્થસ્ય પ્રકાશિની ।
યદુવાચ વ્રતં પ્રીત્યા તન્નિત્યં સમ્યગાચરેત્ ॥ ૧૧॥

અગ્નિરિત્યાદિભિર્મન્ત્રૈઃ ષડ્ભિઃ શુદ્ધેન ભસ્મના ।
સર્વાઙ્ગોદ્ધૂલનં કુર્યાચ્છિરોવ્રતસમાહ્વયમ્ ॥ ૧૨॥

એતચ્છિરોવ્રતં કુર્યાત્સન્ધ્યાકાલેષુ સાદરમ્ ।
યાવદ્વિદ્યોદયસ્તાવત્તસ્ય વિદ્યા ખલૂત્તમા ॥ ૧૩॥

દ્વાદશાબ્દમથાબ્દં વા તદર્ધં ચ તદર્ધકમ્ ।
પ્રકુર્યાદ્દ્વાદશાહં વા સઙ્કલ્પેન શિરોવ્રતમ્ ॥ ૧૪॥

શિરોવ્રતેન યઃ સ્નાતસ્તં તુ નોપદિશેત્તુ યઃ ।
તસ્ય વિદ્યા વિનષ્ટા સ્યાન્નિર્ઘૃણઃ સ ગુરુઃ ખલુ ॥ ૧૫॥

બ્રહ્મવિદ્યાગુરુઃ સાક્ષાન્મુનિઃ કારુણિકઃ ખલુ ।
યથા સર્વેશ્વરઃ શ્રીમાન્મૃદુઃ કારુણિકઃ ખલુ ॥ ૧૬॥

જન્માન્તરસહસ્રેષુ નરા યે ધર્મચારિણઃ ।
તેષામેવ ખલુ શ્રદ્ધા જાયતે ન કદાચન ॥ ૧૭॥

પ્રત્યુતાજ્ઞાનબાહુલ્યાદ્દ્વેષ એવ વિજાયતે ।
અતઃ પ્રદ્વેષયુક્તસ્ય ન ભવેદાત્મવેદનમ્ ॥ ૧૮॥

બ્રહ્મવિદ્યોપદેશસ્ય સાક્ષાદેવાધિકારિણઃ ।
ત એવ નેતરે વિદ્વન્ યે તુ સ્નાતાઃ શિરોવ્રતૈઃ ॥ ૧૯॥

વ્રતં પાશુપતં ચીર્ણં યૈર્દ્વિજૈરાદરેણ તુ ।
તેષામેવોપદેષ્ટવ્યમિતિ વેદાનુશાસનમ્ ॥ ૨૦॥

યઃ પશુસ્તત્પશુત્વં ચ વ્રતેનાનેન સન્ત્યજેત્ ।
તાન્હત્વા ન સ પાપીયાન્ભવેદ્વેદાન્તનિશ્ચયઃ ॥ ૨૧॥

ત્રિપુણ્ડ્રધારણં પ્રોક્તં જાબાલૈરાદરેણ તુ ।
ત્રિયમ્બકેન મન્ત્રેણ સતારેણ શિવેન ચ ॥ ૨૨॥

ત્રિપુણ્ડ્રં ધારયેન્નિત્યં ગહસ્થાશ્રમમાશ્રિતઃ ।
ઓઙ્કારેણ ત્રિરુક્તેન સહંસેન ત્રિપુણ્ડ્રકમ્ ॥ ૨૩॥

ધારયેદ્ભિક્ષુકો નિત્યમિતિ જાબાલિકી શ્રુતિઃ ।
ત્રિયમ્બકેન મન્ત્રેણ પ્રણવેન શિવેન ચ ॥ ૨૪॥

ગૃહસ્થશ્ચ વાનપ્રસ્થો ધારયેચ્ચ ત્રિપુણ્ડ્રકમ્ ।
મેધાવીત્યાદિના વાપિ બ્રહ્મચારી દિને દિને ॥ ૨૫॥

ભસ્મના સજલેનાપિ ધારયેચ્ચ ત્રિપુણ્ડ્રકમ્ ।
બ્રાહ્મણો વિધિનોત્પન્નસ્ત્રિપુણ્ડ્રભસ્મનૈવ તુ ॥ ૨૬॥

લલાટે ધારયેન્નિત્યં તિર્યગ્ભસ્માવગુણ્ઠનમ્ ।
(મહાદેવસ્ય સમ્બન્ધાત્તદ્ધર્મેઽપ્યસ્તિ સઙ્ગતિઃ ।)
સમ્યક્ ત્રિપુણ્ડ્રધર્મં ચ બ્રાહ્મણો નિત્યમાચરેત્ ॥ ૨૭॥

આદિબ્રાહ્મણભૂતેન ત્રિપુણ્ડ્રં ભસ્મના ધૃતમ્ ।
યતોઽત એવ વિપ્રસ્તુ ત્રિપુણ્ડ્રં ધારયેત્સદા ॥ ૨૮॥

ભસ્મના વેદસિદ્ધેન ત્રિપુણ્ડ્રં દેહગુણ્ઠનમ્ ।
રુદ્રલિઙ્ગાર્ચનં વાપિ મોહતોઽપિ ચ ન ત્યજેત્ ॥ ૨૯॥

ત્રિયમ્બકેન મન્ત્રેણ સતારેણ તથૈવ ચ ।
પઞ્ચાક્ષરેણ મન્ત્રેણ પ્રણવેન તથૈવ ચ ॥ ૩૦॥

લલાટે હૃદયે ચૈવ દોર્દ્વન્દ્વે ચ મહામુને ।
ત્રિપુણ્ડ્રં ધારયેન્નિત્યં સંન્યાસાશ્રમમાશ્રિતઃ ॥ ૩૧॥

ત્રિયાયુષેણ મન્ત્રેણ મેધાવીત્યાદિનાથવા ।
ગૌણેન ભસ્મના ધાર્યં ત્રિપુણ્ડ્રં બ્રહ્મચારિણા ॥ ૩૨॥

નમોઽન્તેન શિવેનૈવ શૂદ્રઃ શુશ્રૂષણે રતઃ ।
ઉદ્ધૂલનં ત્રિપુણ્ડ્રં ચ નિત્યં ભક્ત્યા સમાચરેત્ ॥ ૩૩॥

અન્યેષામપિ સર્વેષાં વિના મન્ત્રેણ સુવ્રત ।

ઉદ્ધૂલનં ત્રિપુણ્ડ્રં ચ કર્તવ્યં ભક્તિતો મુને ॥ ૩૪॥

ભૂત્યૈવોદ્ધૂલનં તિર્યક્ ત્રિપુણ્ડ્રસ્ય ચ ધારણમ્ ।
વરેણ્યં સર્વધર્મેભ્યસ્તસ્માન્નિત્યં સમાચરેત્ ॥ ૩૫॥

ભસ્માગ્નિહોત્રજં વાથ વિરજાગ્નિસમુદ્ભવમ્ ।
આદરેણ સમાદાય શુદ્ધે પાત્રે નિધાય તત્ ॥ ૩૬॥

પ્રક્ષાલ્ય પાદૌ હસ્તૌ ચ દ્વિરાચમ્ય સમાહિતઃ ।
ગૃહીત્વા ભસ્મ તત્પઞ્ચબ્રહ્મમન્ત્રૈઃ શનૈઃ શનૈઃ ॥ ૩૭॥

પ્રાણાયામત્રયં કૃત્વા અગ્નિરિત્યાદિમન્ત્રિતમ્ ।
તૈરેવ સપ્તભિર્મન્ત્રૈસ્ત્રિવારમભિમન્ત્રયેત્ ॥ ૩૮॥

ઓમાપોજ્યોતિરિત્યુક્ત્વા ધ્યાત્વા મન્ત્રાનુદીરયેત્ ।
સિતેન ભસ્મના પૂર્વં સમુદ્ધૂલ્ય શરીરકમ્ ॥ ૩૯॥

વિપાપો વિરજો મર્ત્યો જાયતે નાત્ર સંશયઃ ।
તતો ધ્યાત્વા મહાવિષ્ણું જગન્નાથં જલાધિપમ્ ॥ ૪૦॥

સંયોજ્ય ભસ્મના તોયમગ્નિરિત્યાદિભિઃ પુનઃ ।
વિમૃજ્ય સામ્બં ધ્યાત્વા ચ સમુદ્ધૂલ્યોર્ધ્વમસ્તકમ્ ॥ ૪૧॥

તેન ભાવનયા બ્રાહ્મભૂતેન સિતભસ્મના ।
લલાટવક્ષઃસ્કન્ધેષુ સ્વાશ્રમોચિતમન્ત્રતઃ ॥ ૪૨॥

મધ્યમાનામિકાઙ્ગુષ્ઠૈરનુલોમવિલોમતઃ ।
ત્રિપુણ્ડ્રં ધારયેન્નિત્યં ત્રિકાલેષ્વપિ ભક્તિતઃ ॥ ૪૩॥

ઇતિ શ્રીમદ્દેવીભાગવતે મહાપુરાણેઽષ્ટાદશસાહસ્ર્યાં
સંહિતાયામેકાદશસ્કન્ધે સશિરોવ્રતં
ત્રિપુણ્ડધારણવર્ણનં નામ નવમોઽધ્યાયઃ ॥ ૧૧.૯॥

## ૧૧.૧૦ દશમોઽધ્યાયઃ । ભસ્મમાહાત્મ્યે પાશુપતવ્રતવર્ણનમ્ ।

શ્રીનારાયણ ઉવાચ ।
આગ્નેયં ગૌણમજ્ઞાનધ્વંસકં જ્ઞાનસાધકમ્ ।
ગૌણં નાનાવિધં વિદ્ધિ બ્રહ્મન્બ્રહ્મવિદાંવર ॥ ૧॥

અગ્નિહોત્રાગ્નિજં તદ્વદ્વિરજાનલજં મુને ।

ઔપાસનસમુત્પન્નં સમિદગ્નિસમુદ્ભવમ્ ॥ ૨॥

પચનાગ્નિસમુત્પન્નં દાવાનલસમુદ્ભવમ્ ।
ત્રૈવર્ણિકાનાં સર્વેષામગ્નિહોત્રસમુદ્ભવમ્ ॥ ૩॥

વિરજાનલજં ચૈવ ધાર્યં ભસ્મ મહામુને ।
ઔપાસનસમુત્પન્નં ગૃહસ્થાનાં વિશેષતઃ ॥ ૪॥

સમિદગ્નિસમુત્પન્નં ધાર્યં વૈ બ્રહ્મચારિણા ।
શૂદ્રાણાં શ્રોત્રિયાગારપચનાગ્નિસમુદ્ભવમ્ ॥ ૫॥

અન્યેષામપિ સર્વેષાં ધાર્યં દાવાનલોદ્ભવમ્ ।
કાલશ્ચિત્રા પૌર્ણમાસી દેશઃ સ્વીયઃ પરિગ્રહઃ ॥ ૬॥

ક્ષેત્રારામાદ્યરણ્યં વા પ્રશસ્તઃ શુભલક્ષણઃ ।
તત્ર પૂર્વત્રયોદશ્યાં સુસ્નાતઃ સુકૃતાહ્નિકઃ ॥ ૭॥

અનુજ્ઞાપ્ય સ્વમાચાર્યં સમ્પૂજ્ય પ્રણિપત્ય ચ ।
પૂજાં વૈશેષિકીં કૃત્વા શુક્લામ્બરધરઃ સ્વયમ્ ॥ ૮॥

શુદ્ધયજ્ઞોપવીતી ચ શુક્લમાલ્યાનુલેપનઃ ।
દર્ભાસને સમાસીનો દર્ભમુષ્ટિં પ્રગૃહ્ય ચ ॥ ૯॥

પ્રાણાયામત્રયં કૃત્વા પ્રાઙ્મુખો વાપ્યુદઙ્મુખઃ ।
ધ્યાત્વા દેવં ચ દેવીં ચ તદ્વિજ્ઞાપનવર્ત્મના ॥ ૧૦॥

વ્રતમેતત્કરોમીતિ ભવેત્સઙ્કલ્પદીક્ષિતઃ ।
યાવચ્છરીરપાતં વા દ્વાદશાબ્દમથાપિ વા ॥ ૧૧॥

તદર્ધં વા તદર્ધં વા માસદ્વાદશકં તુ વા ।
તદર્ધં વા તદર્ધં વા માસમેકમથાપિ વા ॥ ૧૨॥

દિનદ્વાદશકં વાપિ દિનષટ્કમથાપિ વા ।
તદર્ધં દિનમેકં વા વ્રતસઙ્કલ્પનાવધિ ॥ ૧૩॥

અગ્નિમાધાય વિધિવદ્વિરજાહોમકારણાત્ ।
હુત્વાऽऽજ્યેન સમિદ્ભિશ્ચ ચરુણા ચ યથાવિધિ ॥ ૧૪॥

પૂતાહાત્પુરતો ભૂયસ્તત્ત્વાનાં શુદ્ધિમુદ્દિશન્ ।
જુહુયાન્મૂલમન્ત્રેણ તૈરેવ સમિદાદિભિઃ ॥ ૧૫॥

તત્ત્વાન્યેતાનિ મે દેહે શુધ્યન્તામિત્યનુસ્મરન્ ।
પશ્ચાદ્ભૂતાદિતન્માત્રાઃ પઞ્ચકર્મેન્દ્રિયાણિ ચ ॥ ૧૬॥

જ્ઞાનકર્મવિભેદેન પઞ્ચ પઞ્ચ વિભાગશઃ ।
ત્વગાદિધાતવઃ સપ્ત પઞ્ચ પ્રાણાદિવાયવઃ ॥ ૧૭॥

મનો બુદ્ધિરહઙ્કારો ગુણાઃ પ્રકૃતિપૂરુષૌ ।
રાગો વિદ્યા કલા ચૈવ નિયતિઃ કાલ એવ ચ ॥ ૧૮॥

માયા ચ શુદ્ધવિદ્યા ચ મહેશ્વરસદાશિવૌ ।
શક્તિશ્ચ શિવતત્ત્વં ચ તત્ત્વાનિ ક્રમશો વિદુઃ ॥ ૧૯॥

મન્ત્રૈસ્તુ વિરજૈર્હુત્વા હોતાસૌ વિરજો ભવેત્ ।
અથ ગોમયમાદાય પિણ્ડીકૃત્યાભિમન્ત્ર્ય ચ ॥ ૨૦॥

ન્યસ્યાગ્નૌ તં ચ સંરક્ષ્ય દિને તસ્મિન્ હવિષ્યભુક્ ।
પ્રભાતે ચ ચતુર્દશ્યાં કૃત્વા સર્વં પુરોદિતમ્ ॥ ૨૧॥

તસ્મિન્દિને નિરાહારઃ કાલશેષં સમાપયેત્ ।
પ્રાતઃ પર્વણિ ચાપ્યેવં કૃત્વા હોમાવસાનતઃ ॥ ૨૨॥

ઉપસંહૃત્ય રુદ્રાગ્નિં ગૃહીત્વા ભસ્મ યત્નતઃ ।
તતશ્ચ જટિલો મુણ્ડઃ શિખૈકજટ એવ ચ ॥ ૨૩॥

ભૂત્વા સ્નાત્વા પુનર્વીતલજ્જશ્ચેત્સ્યાદ્દિગમ્બરઃ ।
અન્યઃ કાષાયવસનશ્ચર્મચીરામ્બરોઽથવા ॥ ૨૪॥

એકામ્બરો વલ્કલવાન્ભવેદ્દણ્ડી ચ મેખલી ।
પ્રક્ષાલ્ય ચરણૌ પશ્ચાદ્દ્વિરાચમ્યાત્મનસ્તનુમ્ ॥ ૨૫॥

સઙ્કુલીકૃત્ય તદ્ભસ્મ વિરજાનલસમ્ભવમ્ ।
અગ્નિરિત્યાદિભિર્મન્ત્રૈઃ ષડ્ભિરાથર્વણૈઃ ક્રમાત્ ॥ ૨૬॥

વિમૃજ્યાઙ્ગાનિ મૂર્ધાદિચરણાન્તં ચ તૈઃ સ્પૃશેત્ ।
તતસ્તેન ક્રમેણૈવ સમુદ્ધૂલ્ય ચ ભસ્મના ॥ ૨૭॥

સર્વાઙ્ગોદ્ધૂલનં કુર્યાત્પ્રણવેન શિવેન વા ।
તતશ્ચ પુણ્ડ્રં રચયેત્ત્રિયાયુષસમાહ્વયમ્ ॥ ૨૮॥

શિવભાવં સમાગમ્ય શિવભાવમથાચરેત્ ।
કુર્યાત્ત્રિસન્ધ્યમપ્યેવમેતત્પાશુપતં વ્રતમ્ ॥ ૨૯॥

ભુક્તિમુક્તિપ્રદં ચૈવ પશુત્વં વિનિવર્તયેત્ ।
તત્પશુત્વં પરિત્યજ્ય કૃત્વા પાશુપતં વ્રતમ્ ॥ ૩૦॥

પૂજનીયો મહાદેવો લિઙ્ગમૂર્તિઃ સદાશિવઃ ।
ભસ્મસ્નાનં મહાપુણ્યં સર્વસૌખ્યકરં પરમ્ ॥ ૩૧॥

આયુષ્યં બલમારોગ્યં શ્રીપુષ્ટિવર્ધનં યતઃ ।
રક્ષાર્થં મઙ્ગલાર્થં ચ સર્વસમ્પત્સમૃદ્ધયે ॥ ૩૨॥

ભસ્મસ્નિગ્ધમનુષ્યાણાં મહામારીભયં ન ચ ।
શાન્તિકં પૌષ્ટિકં ભસ્મ કામદં ચ ત્રિધા ભવેત્ ॥ ૩૩॥

ઇતિ શ્રીમદ્દેવીભાગવતે મહાપુરાણેઽષ્ટાદશસાહસ્ર્યાં
સંહિતાયામેકાદશસ્કન્ધે ભસ્મમાહાત્મ્યે
પાશુપતવ્રતવર્ણનં નામ દશમોઽધ્યાયઃ ॥ ૧૧.૧૦॥

## ૧૧.૧૧ એકાદશોઽધ્યાયઃ । ત્રિવિધભસ્મમાહાત્મ્યવર્ણનમ્ ।

નારદ ઉવાચ ।
ત્રિવિધત્વં કથં ચાસ્ય ભસ્મનઃ પરિકીર્તિતમ્ ।
એતત્કથય મે દેવ મહત્કૌતૂહલં મમ ॥ ૧॥

શ્રીનારાયણ ઉવાચ ।
ત્રિવિધત્વં પ્રવક્ષ્યામિ દેવર્ષે ભસ્મનઃ શ ृણુ ।
મહાપાપક્ષયકરં મહાકીર્તિકરં પરમ્ ॥ ૨॥

ગોમયં યોનિસમ્બદ્ધં તદ્ધસ્તેનૈવ ગૃહ્યતે ।
બ્રાહ્મૈર્મન્ત્રૈસ્તુ સન્દગ્ધં તચ્છાન્તિકૃદિહોચ્યતે ॥ ૩॥

સાવધાનસ્તુ ગૃહ્ણીયાન્નરો વૈ ગોમયં તુ યત્ ।
અન્તરિક્ષે ગૃહીત્વા તત્ષડઙ્ગેન દહેદતઃ ॥ ૪॥

પૌષ્ટિકં તત્સમાખ્યાતં કામદં ચ તતઃ શ ृણુ ।
પ્રાસાદેન દહેદેતત્કામદં ભસ્મ કીર્તિતમ્ ॥ ૫॥

પ્રાતરુત્થાય દેવર્ષે ભસ્મવ્રતપરઃ શુચિઃ ।
ગવાં ગોષ્ઠેષુ ગત્વા તુ નમસ્કૃત્ય તુ ગોકુલમ્ ॥ ૬॥

ગવાં વર્ણાનુરૂપાણાં ગૃહ્ણીયાદ્ગોમયં શુભમ્ ।
બ્રાહ્મણસ્ય ચ ગૌઃ શ્વેતા રક્તા ગૌઃ ક્ષત્રિયસ્ય ચ ॥ ૭॥

પીતવર્ણા તુ વૈશ્યસ્ય કૃષ્ણા શૂદ્રસ્ય કથ્યતે ।
પૌર્ણમાસ્યામમાવાસ્યામષ્ટમ્યાં વા વિશુદ્ધધીઃ ॥ ૮॥

પ્રાસાદેન તુ મન્ત્રેણ ગૃહીત્વા ગોમયં શુભમ્ ।
હૃદયેન તુ મન્ત્રેણ પિણ્ડીકૃત્ય તુ ગોમયમ્ ॥ ૯॥

રવિરશ્મિસુસન્તપ્તં શુચૌ દેશે મનોહરે ।
તુષેણ વા બુસૈર્વાપિ પ્રાસાદેન તુ નિક્ષિપેત્ ॥ ૧૦॥

અરણ્યુદ્ભવમગ્નિં વા શ્રોત્રિયાગારજં તુ વા ।
તદગ્નૌ વિન્યસેત્તં ચ શિવબીજેન મન્ત્રતઃ ॥ ૧૧॥

ગૃહ્ણીયાદથ તત્રાગ્નિકુણ્ડાદ્ભસ્મ વિચક્ષણઃ ।
નવપાત્રં સમાદાય પ્રાસાદેન તુ નિક્ષિપેત્ ॥ ૧૨॥

કેતકી પાટલી તદ્વદુશીરં ચન્દનં તથા ।
નાનાસુગન્ધિદ્રવ્યાણિ કાશ્મીરપ્રભૃતીનિ ચ ॥ ૧૩॥

નિક્ષિપેત્તત્ર પાત્રે તુ સદ્યોમન્ત્રેણ શુદ્ધધીઃ ।
જલસ્નાનં પુરા કૃત્વા ભસ્મસ્નાનમતઃ પરમ્ ॥ ૧૪॥

જલસ્નાને ત્વશક્તશ્ચ ભસ્મસ્નાનં સમાચરેત્ ।
પ્રક્ષાલ્ય પાદૌ હસ્તૌ ચ શિરશ્ચેશાનમન્ત્રતઃ ॥ ૧૫॥

સમુદ્ધૂલ્ય તતઃ પશ્ચાદાનનં તત્પુરુષેણ તુ ।
અઘોરેણ તુ હૃદયં નાભિં વામેન તત્પરમ્ ॥ ૧૬॥

સદ્યોમન્ત્રેણ સર્વાઙ્ગં સમૂદ્ધૂલ્ય વિચક્ષણઃ ।
પૂર્વવસ્ત્રં પરિત્યજ્ય શુદ્ધવસ્ત્રં પરિગ્રહેત્ ॥ ૧૭॥

પ્રક્ષાલ્ય પાદૌ હસ્તૌ ચ પશ્ચાદાચમનં ચરેત્ ।
ભસ્મનોદ્ધૂલનાભાવે ત્રિપુણ્ડ્રં તુ વિધીયતે ॥ ૧૮॥

મધ્યાહ્નાત્પ્રાગ્જલૈર્યુક્તં પરતો જલવર્જિતમ્ ।
તર્જન્યનામિકામધ્યૈસ્ત્રિપુણ્ડ્રં ચ સમાચરેત્ ॥ ૧૯॥

મૂર્ધ્નિ ચૈવ લલાટે ચ કર્ણે કણ્ઠે તથૈવ ચ ।
હૃદયે ચૈવ બાહ્વોશ્ચ ન્યાસસ્થાનં હિ ચોચ્યતે ॥ ૨૦॥

પઞ્ચાઙ્ગુલૈર્ન્યસેન્મૂર્ધ્નિ પ્રાસાદેન તુ મન્ત્રતઃ ।
ત્ર્યઙ્ગુલૈર્વિન્યસેદ્ભાલે શિરોમન્ત્રેણ દેશિકઃ ॥ ૨૧॥

સદ્યેન દક્ષિણે કર્ણે વામદેવેન વામતઃ ।
અઘોરેણ તુ કણ્ઠે ચ મધ્યાઙ્ગુલ્યા સ્પૃશેદ્બુધઃ ॥ ૨૨॥

હૃદયં હૃદયેનૈવ ત્રિભિરઙ્ગુલિભિઃ સ્પૃશેત્ ।
વિન્યસેદ્દક્ષિણે બાહૌ શિખામન્ત્રેણ દેશિકઃ ॥ ૨૩॥

વામબાહૌ ન્યસેદ્ધીમાન્કવચેન ત્રિયઙ્ગુલૈઃ ।
મધ્યેન સંસ્પૃશેન્નાભ્યામીશાન ઇતિ મન્ત્રતઃ ॥ ૨૪॥

બ્રહ્મવિષ્ણુમહેશાનાસ્તિસ્રો રેખા ઇતિ સ્મૃતાઃ ।
આદ્યો બ્રહ્મા તતો વિષ્ણુસ્તદૂર્ધ્વં તુ મહેશ્વરઃ ॥ ૨૫॥

એકાઙ્ગુલેન ન્યસ્તં યદીશ્વરસ્તત્ર દેવતા ।
શિરોમધ્યે ત્વયં બ્રહ્મા ઈશ્વરસ્તુ લલાટકે ॥ ૨૬॥

કર્ણયોરશ્વિનૌ દેવૌ ગણેશસ્તુ ગલે તથા ।
ક્ષત્રિયશ્ચ તથા વૈશ્યઃ શૂદ્રશ્ચોદ્ધૂલનં ત્યજેત્ ॥ ૨૭॥

સર્વેષામન્ત્યજાતીનાં મન્ત્રેણ રહિતં ભવેત્ ।
(અદીક્ષિતં મનુષ્યાણામપિ મન્ત્રં વિના ભવેત્)॥ ૨૮॥

ઇતિ શ્રીમદ્દેવીભાગવતે મહાપુરાણેઽષ્ટાદશસાહસ્ર્યાં
સંહિતાયામેકાદશસ્કન્ધે
ત્રિવિધભસ્મમાહાત્મ્યવર્ણનં નામકાદશોઽધ્યાયઃ ॥ ૧૧.૧૧॥

## ૧૧.૧૨ દ્વાદશોઽધ્યાયઃ । ભસ્મધારણમાહામ્યવર્ણનમ્ ।

શ્રીનારાયણ ઉવાચ ।
દેવર્ષે શૃણુ તત્સર્વં ભસ્મોદ્ધૂલનજં ફલમ્ ।
સરહસ્યવિધાનં ચ સર્વકામફલપ્રદમ્ ॥ ૧॥

કપિલાયાઃ શકૃત્સ્વચ્છં ગૃહીત્વા ગગનેઽપતત્ ।
ન ક્લિન્નં નાપિ કઠિનં ન દુર્ગન્ધં ન ચોષિતમ્ ॥ ૨॥

ઉપર્યધઃ પરિત્યજ્ય ગૃહ્ણીયાત્પતિતં યદિ ।

પિણ્ડીકૃત્ય શિવાગ્ન્યાદૌ તત્ક્ષિપેન્મૂલમન્ત્રિતમ્ ॥ ૩॥

આદાય વાસસાઽઽચ્છાદ્ય ભસ્માધાને વિનિક્ષિપેત્ ।
સુકૃતે સુદૃઢે શુદ્ધે ક્ષાલિતે પ્રોક્ષિતે શુભે ॥ ૪॥

વિન્યસ્ય મન્ત્રી મન્ત્રેણ પાત્રે ભસ્મ વિનિક્ષિપેત્ ।
તૈજસં દારવં ચાથ મૃણ્મયં ચૈલમેવ ચ ॥ ૫॥

અન્યદ્વા શોભનં શુદ્ધં ભસ્માધારં પ્રકલ્પયેત્ ।
ક્ષૌમે ચૈવાતિશુદ્ધે વા ધનવદ્ભસ્મ નિક્ષિપેત્ ॥ ૬॥

પ્રસ્થિતો ભસ્મ ગૃહ્ણીયાત્સ્વયં ચાનુચરોઽપિ વા ।
ન ચાયુક્તકરે દદ્યાન્ન ચાશુચિતલે ક્ષિપેત્ ॥ ૭॥

ન સંસ્પૃશેત્તુ નીચાઙ્ગૈર્ન ક્ષિપેન્ન ચ લઙ્ઘયેત્ ।
તસ્માદ્ભસિતમાદાય વિનિયુઞ્જીત મન્ત્રિતમ્ ॥ ૮॥

વિભૂતિધારણવિધિઃ સ્મૃતિપ્રોક્તો મયેરિતઃ ।
યદીયાચરણેનૈવ શિવતુલ્યો ન સંશયઃ ॥ ૯॥

શૈવૈઃ સમ્પાદિતં ભસ્મ વૈદિકૈઃ શિવસન્નિધૌ ।
ભક્ત્યા પરમયા ગ્રાહ્યં પ્રાર્થયિત્વા તુ પૂજયેત્ ॥ ૧૦॥

તન્ત્રોક્તવર્ત્મના સિદ્ધં ભસ્મ તાન્ત્રિકપૂજકૈઃ ।
યત્રકુત્રાપિ દત્તં ચેત્તદ્ગ્રાહ્યં નૈવ વૈદિકૈઃ ॥ ૧૧॥

શૂદ્રૈઃ કાપાલિકૈર્વાથ પાખણ્ડૈરપરૈસ્તુ તત્ ।
ત્રિપુણ્ડ્રં ધારયેદ્ભક્ત્યા મનસાપિ ન લઙ્ઘયેત્ ॥ ૧૨॥

શ્રુત્યા વિધીયતે યસ્માત્તત્ત્યાગી પતિતો ભવેત્ ।
ત્રિપુણ્ડ્રધારણં ભક્ત્યા તથા દેહાવગુણ્ઠનમ્ ॥ ૧૩॥

દ્વિજઃ કુર્યાદ્ધિ મન્ત્રેણ તત્ત્યાગી પતિતો ભવેત્ ।
ઉદ્ધૂલનં ત્રિપુણ્ડ્રં ચ ભક્ત્યા નૈવાચરન્તિ યે ॥ ૧૪॥

તેષાં નાસ્તિ વિનિર્મોક્ષઃ સંસારાજ્જન્મકોટિભિઃ ।
યેન ભસ્મોક્તમાર્ગેણ ધૃતં ન મુનિપુઙ્ગવ ॥ ૧૫॥

તસ્ય વિદ્ધિ મુને જન્મ નિષ્ફલં સૌકરં યથા ।
યેષાં વપુર્મનુષ્યાણાં ત્રિપુણ્ડ્રેણ વિના સ્થિતમ્ ॥ ૧૬॥

શ્મશાનસદૃશં તત્સ્યાન્ન પ્રેક્ષ્યં પુણ્યકૃજ્જનૈઃ ।
ધિગ્ભસ્મરહિતં ભાલં ધિગ્ગ્રામમશિવાલયમ્ ॥ ૧૭॥

ધિગનીશાર્ચનં જન્મ ધિગ્વિદ્યામશિવાશ્રયામ્ ।
ત્રિપુણ્ડ્રં યે વિનિન્દન્તિ નિન્દન્તિ શિવમેવ તે ॥ ૧૮॥

ધારયન્તિ ચ યે ભક્ત્યા ધારયન્તિ તમેવ તે ।
યથા કૃશાનુરહિતો ભૂધરો ન વિરાજતે ॥ ૧૯॥

અશેષસાધનેઽપ્યેવં ભસ્મહીનં શિવાર્ચનમ્ ।
ઉદ્ધૂલનં ત્રિપુણ્ડ્રં ચ શ્રદ્ધયા નાચરન્તિ યે ॥ ૨૦॥

તૈઃ પૂર્વાચરિતં સર્વં વિપરીતં ભવેદપિ ।
ભસ્મના વેદમન્ત્રેણ ત્રિપુણ્ડ્રસ્ય ચ ધારણમ્ ॥ ૨૧॥

વિના વેદોચિતાચારં સ્માર્તસ્યાનર્થકારણમ્ ।
કૃતં સ્યાદકૃતં તેન શ્રુતમપ્યશ્રુતં ભવેત્ ॥ ૨૨॥

અધીતમનધીતં ચ ત્રિપુણ્ડ્રં યો ન ધારયેત્ ।
વૃથા વેદા વૃથા યજ્ઞા વૃથા દાનં વૃથા તપઃ ॥ ૨૩॥

વૃથા વ્રતોપવાસેન ત્રિપુણ્ડ્રં યો ન ધારયેત્ ।
ભસ્મધારણકં ત્યક્ત્વા મુક્તિમિચ્છતિ યઃ પુમાન્ ॥ ૨૪॥

વિષપાનેન નિત્યત્વં કુરુતે હ્યાત્મનો હિ સઃ ।
સ્રષ્ટા સૃષ્ટિચ્છલેનાહ ત્રિપુણ્ડ્રસ્ય ચ ધારણમ્ ॥ ૨૫॥

સસર્જ સ લલાટં હિ તિર્યગૂર્ધ્વં ન વર્તુલમ્ ।
તિર્યગ્રેખાઃ પ્રદૃશ્યન્તે લલાટે સર્વદેહિનામ્ ॥ ૨૬॥

તથાપિ માનવા મૂર્ખા ન કુર્વન્તિ ત્રિપુણ્ડ્રકમ્ ।
ન તદ્ધ્યાનં ન તન્મોક્ષં ન તજ્જ્ઞાનં ન તત્તપઃ ॥ ૨૭॥

વિના તિર્યક્ત્રિપુણ્ડ્રં ચ વિપ્રેણ યદનુષ્ઠિતમ્ ।
વેદસ્યાધ્યયને શૂદ્રો નાધિકારી યથા ભવેત્ ॥ ૨૮॥

ત્રિપુણ્ડ્રેણ વિના વિપ્રો નાધિકારી શિવાર્ચને ।
પ્રાઙ્મુખશ્ચરણૌ હસ્તૌ પ્રક્ષાલ્યાચમ્ય પૂર્વવત્ ॥ ૨૯॥

પ્રાણાનાયમ્ય સઙ્કલ્પ્ય ભસ્મસ્નાનં સમાચરેત્ ।
આદાય ભસિતં શુદ્ધમગ્નિહોત્રસમુદ્ભવમ્ ॥ ૩૦॥

ઈશાનેન તુ મન્ત્રેણ સ્વમૂર્ધનિ વિનિક્ષિપેત્ ।
તત આદાય તદ્ભસ્મ મુખે ચ પુરુષેણ તુ ॥ ૩૧॥

અઘોરાખ્યેણ હૃદયે ગુહ્યે વામાહ્વયેન ચ ।
સદ્યોજાતાભિધાનેન ભસ્મ પાદદ્વયે ક્ષિપેત્ ॥ ૩૨॥

સર્વાઙ્ગં પ્રણવેનૈવ મન્ત્રેણોદ્ધૂલનં તતઃ ।
એતદાગ્નેયકં સ્નાનમુદિતં પરમર્ષિભિઃ ॥ ૩૩॥

સર્વકર્મસમૃદ્ધ્યર્થં કુર્યાદાદાવિદં બુધઃ ।
તતઃ પ્રક્ષાલ્ય હસ્તાદીનુપસ્પૃશ્ય યથાવિધિ ॥ ૩૪॥

તિર્યક્ત્રિપુણ્ડ્રં વિધિના લલાટે હૃદયે ગલે ।
પઞ્ચભિર્બ્રહ્મભિર્વાપિ કૃતેન ભસિતેન ચ ॥ ૩૫॥

ધૃતમેતત્ત્રિપુણ્ડ્રં સ્યાત્સર્વકર્મસુ પાવનમ્ ।
શૂદ્રૈરન્ત્યજહસ્તસ્થં ન ધાર્યં ભસ્મ ચ ક્વચિત્ ॥ ૩૬॥

ભસ્મના સાગ્નિહોત્રેણ લિપ્તઃ કર્મ સમાચરેત્ ।
અન્યથા સર્વકર્માણિ ન ફલન્તિ કદાચન ॥ ૩૭॥

સત્યં શૌચં જપો હોમસ્તીર્થં દેવાદિપૂજનમ્ ।
તસ્ય વ્યર્થમિદં સર્વં યસ્ત્રિપુણ્ડ્રં ન ધારયેત્ ॥ ૩૮॥

ત્રિપુણ્ડ્રધૃગ્વિપ્રવરો યો રુદ્રાક્ષધરઃ શુચિઃ ।
સ હન્તિ રોગદુરિતવ્યાધિદુર્ભિક્ષતસ્કરાન્ ॥ ૩૯॥

સમાપ્નોતિ પરં બ્રહ્મ યતો નાવર્તતે પુનઃ ।
સ પઙ્ક્તિપાવનઃ શ્રાદ્ધે પૂજ્યો વિપ્રૈઃ સુરૈરપિ ॥ ૪૦॥

શ્રાદ્ધે યજ્ઞે જપે હોમે વૈશ્વદેવે સુરાર્ચને ।
ધૃતત્રિપુણ્ડ્રઃ પૂતાત્મા મૃત્યું જયતિ માનવઃ ।
ભસ્મધારણમાહાત્મ્યં ભૂયોઽપિ કથયામિ તે ॥ ૪૧॥

ઇતિ શ્રીમદ્દેવીભાગવતે મહાપુરાણેઽષ્ટાદશસાહસ્ર્યાં
સંહિતાયામેકાદશસ્કન્ધે
ભસ્મધારણમાહામ્યવર્ણનં નામ દ્વાદશોઽધ્યાયઃ ॥ ૧૧.૧૨॥

## ૧૧.૧૩ ત્રયોદશોઽધ્યાયઃ । ત્રિપુણ્ડધારણમાહાત્મ્યવર્ણનમ્ ।

શ્રીનારાયણ ઉવાચ ।
મહાપાતકસઙ્ઘાશ્ચ પાતકાન્યપરાણ્યપિ ।
નશ્યન્તિ મુનિશાર્દૂલ સત્યં સત્યં ન ચાન્યથા ॥ ૧॥

એકં ભસ્મ ધૃતં યેન તસ્ય પુણ્યફલં શ‍ૃણુ ।
યતીનાં જ્ઞાનદં પ્રોક્તં વાનસ્થાનાં વિરક્તિદમ્ ॥ ૨॥

ગૃહસ્થાનાં મુને તદ્વદ્ધર્મવૃદ્ધિકરં તથા ।
બ્રહ્મચર્યાશ્રમસ્થાનાં સ્વાધ્યાયપ્રદમેવ ચ ॥ ૩॥

શૂદ્રાણાં પુણ્યદં નિત્યમન્યેષાં પાપનાશનમ્ ।
ભસ્મનોદ્ધૂલનં ચૈવ તથા તિર્યક્ ત્રિપુણ્ડ્રકમ્ ॥ ૪॥

રક્ષાર્થં સર્વભૂતાનાં વિધત્તે વૈદિકી શ્રુતિઃ ।
ભસ્મનોદ્ધૂલનં ચૈવ તથા તિર્યક્ ત્રિપુણ્ડ્રકમ્ ॥ ૫॥

યજ્ઞત્વેનૈવ સર્વેષાં વિધત્તે વૈદિકી શ્રુતિઃ ।
ભસ્મનોદ્ધૂલનં ચૈવ તથા તિર્યક્ ત્રિપુણ્ડ્રકમ્ ॥ ૬॥

સર્વધર્મતયા તેષાં વિધત્તે વૈદિકી શ્રુતિઃ ।
ભસ્મનોદ્ધૂલનં ચૈવ તથા તિર્યક્ ત્રિપુણ્ડ્રકમ્ ॥ ૭॥

માહેશ્વરાણાં લિઙ્ગાર્થં વિધત્તે વૈદિકી શ્રુતિઃ ।
ભસ્મનોદ્ધૂલનં ચૈવ તથા તિર્યક્ ત્રિપુણ્ડ્રકમ્ ॥ ૮॥

વિજ્ઞાનાર્થં ચ સર્વેષાં વિધત્તે વૈદિકી શ્રુતિઃ ।
શિવેન વિષ્ણુના ચૈવ બ્રહ્મણા વજ્રિણા તથા ॥ ૯॥

હિરણ્યગર્ભેણ તદવતારૈર્વરુણાદિભિઃ ।
દેવતાભિર્ધૃતં ભસ્મ ત્રિપુણ્ડ્રોદ્ધૂલનાત્મકમ્ ॥ ૧૦॥

ઉમાદેવ્યા ચ લક્ષ્યા ચ વાચા ચાન્યાભિરાસ્તિકૈઃ ।
સર્વસ્ત્રીભિર્ધૃતં ભસ્મ ત્રિપુણ્ડ્રોદ્ધૂલનાત્મના ॥ ૧૧॥

યક્ષરાક્ષસગન્ધર્વસિદ્ધવિદ્યાધરાદિભિઃ ।
મુનિભિશ્ચ ધૃતં ભસ્મ ત્રિપુણ્ડ્રોદ્ધૂલનાત્મના ॥ ૧૨॥

બ્રાહ્મણૈઃ ક્ષત્રિયૈર્વૈશ્યૈઃ શૂદ્રૈરપિ ચ સઙ્કરૈઃ ।
અપભ્રંશૈર્ધૃતં ભસ્મ ત્રિપુણ્ડ્રોદ્ધૂલનાત્મના ॥ ૧૩॥

ઉદ્ધૂલનં ત્રિપુણ્ડ્રં ચ યૈઃ સમાચરિતં મુદા ।
ત એવ શિષ્ટા વિદ્વાંસો નેતરે મુનિપુઙ્ગવ ॥ ૧૪॥

શિવલિઙ્ગં મણિઃ સખ્યં મન્ત્રઃ પઞ્ચાક્ષરસ્તથા ।
વિભૂતિરૌષધં પુંસાં મુક્તિસ્ત્રીવશ્યકર્મણિ ॥ ૧૫॥

ભુનક્તિ યત્ર ભસ્માઙ્ગો મૂર્ખો વા પણ્ડિતોઽપિ વા ।
તત્ર ભુઙ્ક્તે મહાદેવઃ સપત્નીકો વૃષધ્વજઃ ॥ ૧૬॥

ભસ્મસઞ્છન્નસર્વાઙ્ગમનુગચ્છતિ યઃ પુમાન્ ।
સર્વપાતકયુક્તોઽપિ પૂજિતો માનવોઽચિરાત્ ॥ ૧૭॥

ભસ્મસઞ્છન્નસર્વાઙ્ગં યઃ સ્તૌતિ શ્રદ્ધયા સહ ।
સર્વપાતકયુક્તોઽપિ પૂજ્યતે માનવોઽચિરાત્ ॥ ૧૮॥

ત્રિપુણ્ડ્રધારિણે ભિક્ષાપ્રદાનેન હિ કેવલમ્ ।
તેનાધીતં શ્રુતં તેન તેન સર્વમનુષ્ઠિતમ્ ॥ ૧૯॥

યેન વિપ્રેણ શિરસિ ત્રિપુણ્ડ્રં ભસ્મના કૃતમ્ ।
કીકટેષ્વપિ દેશેષુ યત્ર ભૂતિવિભૂષણઃ ॥ ૨૦॥

માનવસ્તુ વસેન્નિત્યં કાશીક્ષેત્રસમં હિ તત્ ।
દુઃશીલઃ શીલયુક્તો વા યોગયુક્તોઽપ્યલક્ષણઃ ॥ ૨૧॥

ભૂતિશાસનયુક્તો વા સ પૂજ્યો મમ પુત્રવત્ ।
છદ્મનાપિ ચરેદ્યો હિ ભૂતિશાસનમૈશ્વરમ્ ॥ ૨૨॥

સોઽપિ યાં ગતિમાપ્નોતિ ન તાં યજ્ઞશતૈરપિ ।
સમ્પર્કાલ્લીલયા વાપિ ભયાદ્વા ધારયેત્તુ યઃ ॥ ૨૩॥

વિધિયુક્તો વિભૂતિં તુ સ ચ પૂજ્યો યથા હ્યહમ્ ।
શિવસ્ય વિષ્ણોર્દેવાનાં બ્રહ્મણસ્તૃપ્તિકારણમ્ ॥ ૨૪॥

પાર્વત્યાશ્ચ મહાલક્ષ્મ્યા ભારત્યાસ્તૃપ્તિકારણમ્ ।
ન દાનેન ન યજ્ઞેન ન તપોભિઃ સુદુર્લભૈઃ ॥ ૨૫॥

ન તીર્થયાત્રયા પુણ્યં ત્રિપુણ્ડ્રેણ ચ લભ્યતે ।
દાનં યજ્ઞાશ્ચ ધર્માશ્ચ તીર્થયાત્રાશ્ચ નારદ ॥ ૨૬॥

ધ્યાનં તપસ્ત્રિપુણ્ડ્રસ્ય કલાં નાર્હન્તિ ષોડશીમ્ ।

યથા રાજા સ્વચિહ્નાઙ્કં સ્વજનં મન્યતે સદા ॥ ૨૭॥

તથા શિવસ્ત્રિપુણ્ડ્રાઙ્કં સ્વકીયમિવ મન્યતે ।
દ્વિજાતિર્વાન્યજાતિર્વા શુદ્ધચિત્તેન ભસ્મના ॥ ૨૮॥

ધારયેદ્યસ્ત્રિપુણ્ડ્રાઙ્કં રુદ્રસ્તેન વશીકૃતઃ ।
ત્યક્તસર્વાશ્રમાચારો લુપ્તસર્વક્રિયોઽપિ સઃ ॥ ૨૯॥

સકૃત્તિર્યક્ત્રિપુણ્ડ્રાઙ્કં ધારયેત્સોઽપિ મુચ્યતે ।
નાસ્ય જ્ઞાનં પરીક્ષેત ન કુલં ન વ્રતં તથા ॥ ૩૦॥

ત્રિપુણ્ડ્રાઙ્કિતભાલેન પૂજ્ય એવ હિ નારદ ।
શિવમન્ત્રાત્પરો મન્ત્રો નાસ્તિ તુલ્યં શિવાત્પરમ્ ॥ ૩૧॥

શિવાર્ચનાત્પરં પુણ્યં ન હિ તીર્થં ચ ભસ્મના ।
રુદ્રાગ્નેર્યત્પરં તીર્થં તદ્ભસ્મ પરિકીર્તિતમ્ ॥ ૩૨॥

ધ્વંસનં સર્વદુઃખાનાં સર્વપાપવિશોધનમ્ ।
અન્ત્યજો વાધમો વાપિ મૂર્ખો વા પણ્ડિતોઽપિ વા ॥ ૩૩॥

યસ્મિન્દેશે વસેન્નિત્યં ભૂતિશાસનસંયુતઃ ।
તસ્મિન્સદાશિવઃ સોમઃ સર્વભૂતગણૈર્વૃતઃ ।
સર્વતીર્થૈશ્ચ સંયુક્તઃ સાન્નિધ્યં કુરુતે સદા ॥ ૩૪॥

એતાનિ પઞ્ચશિવમન્ત્રપવિત્રિતાનિ
ભસ્માનિ કામદહનાઙ્ગવિભૂષિતાનિ ।
ત્રૈપુણ્ડ્રકાણિ રચિતાનિ લલાટપટ્ટે
લુમ્પન્તિ દૈવલિખિતાનિ દુરક્ષરાણિ ॥ ૩૫॥

ઇતિ શ્રીમદ્દેવીભાગવતે મહાપુરાણેઽષ્ટાદશસાહસ્ર્યાં
સંહિતાયામેકાદશસ્કન્ધે
ત્રિપુણ્ડધારણમાહાત્મ્યવર્ણનં નામ ત્રયોદશોઽધ્યાયઃ ॥ ૧૧.૧૩॥

## ૧૧.૧૪ ચતુર્દશોઽધ્યાયઃ । વિભૂતિધારણમાહાત્મ્યવર્ણનમ્ ।

શ્રીનારાયણ ઉવાચ ।
ભસ્મદિગ્ધશરીરાય યો દદાતિ ધનં મુદા ।
તસ્ય સર્વાણિ પાપાનિ વિનશ્યન્તિ ન સંશયઃ ॥ ૧॥

શ્રુતયઃ સ્મૃતયઃ સર્વાઃ પુરાણાન્યખિલાન્યપિ ।
વદન્તિ ભૂતિમાહાત્મ્યં તત્તસ્માદ્ધારયેદ્દ્વિજઃ ॥ ૨॥

સિતેન ભસ્મના કુર્યાત્ત્રિસન્ધ્યં યસ્ત્રિપુણ્ડ્રકમ્ ।
સર્વપાપવિનિર્મુક્તઃ શિવલોકે મહીયતે ॥ ૩॥

યોગી સર્વાઙ્ગકં સ્તાનમાપાદતલમસ્તકમ્ ।
ત્રિસન્ધ્યમાચરેન્નિત્યમાશુ યોગમવાપ્નુયાત્ ॥ ૪॥

ભસ્મસ્નાનેન પુરુષઃ કુલસ્યોદ્ધારકો ભવેત્ ।
ભસ્મસ્નાનં જલસ્નાનાદસઙ્ખ્યેયગુણાન્વિતમ્ ॥ ૫॥

સર્વતીર્થેષુ યત્પુણ્યં સર્વતીર્થેષુ યત્ફલમ્ ।
તત્ફલં લભતે સર્વં ભસ્મસ્નાનાન્ન સંશયઃ ॥ ૬॥

મહાપાતકયુક્તો વા યુક્તો વાપ્યુપપાતકૈઃ ।
ભસ્મસ્નાનેન તત્સર્વં દહત્યગ્નિરિવેન્ધનમ્ ॥ ૭॥

ભસ્મસ્નાનાત્પરં સ્નાનં પવિત્રં નૈવ વિદ્યતે ।
એવમુક્તં શિવેનાદૌ તદા સ્નાતઃ સ્વયં શિવઃ ॥ ૮॥

તદાપ્રભૃતિ બ્રહ્માદ્યા મુનયશ્ચ શિવાર્થિનઃ ।
સર્વકર્મસુ યત્નેન ભસ્મસ્નાનં પ્રચક્રિરે ॥ ૯॥

તસ્માદેતચ્છિરઃસ્નાનમાગ્નેયં યઃ સમાચરેત્ ।
અનેનૈવ શરીરેણ સ હિ રુદ્રો ન સંશયઃ ॥ ૧૦॥

યે ભસ્મધારિણં દૃષ્ટ્વા પરિતૃપ્તા ભવન્તિ તે ।
દેવાસુરમુનીન્દ્રૈશ્ચ પૂજ્યા નિત્યં ન સંશયઃ ॥ ૧૧॥

ભસ્મસઞ્છન્નસર્વાઙ્ગં દૃષ્ટ્વોત્તિષ્ઠતિ યઃ પુમાન્ ।
તં દૃષ્ટ્વા દેવરાજોઽપિ દણ્ડવત્પ્રણમિષ્યતિ ॥ ૧૨॥

અભક્ષ્યભક્ષણં યેષાં ભસ્મધારણપૂર્વકમ્ ।
તેષાં તદ્ભક્ષ્યમેવ સ્યાન્મુને નાત્ર વિચારણા ॥ ૧૩॥

યઃ સ્નાતિ ભસ્મના નિત્યં જલે સ્નાત્વા તતઃ પરમ્ ।
બ્રહ્મચારી ગૃહસ્થો વા વાનપ્રસ્થોઽઽથવાદરાત્ ॥ ૧૪॥

સર્વપાપવિનિર્મુક્તઃ સ યાતિ પરમાં ગતિમ્ ।
આગ્નેયં ભસ્મના સ્નાનં યતીનાં ચ વિશિષ્યતે ॥ ૧૫॥

આર્દ્રસ્નાનાદ્વરં ભસ્મસ્નાનમાર્દ્રવધો ધ્રુવઃ ।
આર્દ્રં તુ પ્રકૃતિં વિદ્યાત્પ્રકૃતિં બન્ધનં વિદુઃ ॥ ૧૬॥

પ્રકૃતેસ્તુ પ્રહાણાય ભસ્મના સ્નાનમિષ્યતે ।
ભસ્મના સદૃશં બ્રહ્યન્નાસ્તિ લોકત્રયેષ્વપિ ॥ ૧૭॥

રક્ષાર્થં મઙ્ગલાર્થં ચ પવિત્રાર્થં પુરા સુરૈઃ ।
ભસ્મ દૃષ્ટ્વા મુને પૂર્વં દત્તં દેવ્યૈ પ્રિયેણ તુ ॥ ૧૮॥

તસ્માદેતચ્છિરઃસ્નાનમાગ્નેયં યઃ સમાચરેત્ ।
ભવપાશૈર્વિનિર્મુક્તઃ શિવલોકે મહીયતે ॥ ૧૯॥

જ્વરરક્ષઃપિશાચાશ્ચ પૂતનાકુષ્ઠગુલ્મકાઃ ।
ભગન્દરાણિ સર્વાણિ ચાશીતિર્વાતરોગકાઃ ॥ ૨૦॥

ચતુઃષષ્ટિઃ પિત્તરોગાઃ શ્લેષ્મા સપ્તત્રિપઞ્ચકાઃ ।
વ્યાઘ્રચૌરભયં ચૈવાપ્યન્યે દુષ્ટગ્રહા અપિ ॥ ૨૧॥

ભસ્મસ્નાનેન નશ્યન્તિ સિંહેનૈવ યથા ગજાઃ ।
શુદ્ધશીતજલેનૈવ ભસ્મના ચ ત્રિપુણ્ડ્રકમ્ ॥ ૨૨॥

યો ધારયેત્પરં બ્રહ્મ સ પ્રાપ્નોતિ ન સંશયઃ ।
(ભસ્મના ચ ત્રિપુણ્ડ્રં ચ યઃ કોઽપિ ધારયેત્પરમ્ ।
સ બ્રહ્મલોકમાપ્નોતિ મુક્તપાપો ન સંશયઃ ॥)
યથાવિધિ લલાટે વૈ વહ્નિવીર્યપ્રધારણાત્ ॥ ૨૩॥

નાશયેલ્લિખિતાં યામીં લલાટસ્થાં લિપિં ધ્રુવમ્ ।
કણ્ઠોપરિકૃતં પાપં નાશયેત્તત્પ્રધારણાત્ ॥ ૨૪॥

કણ્ઠે ચ ધારણાત્કણ્ઠભોગાદિકૃતપાતકમ્ ।
બાહ્વોર્બાહુકૃતં પાપં વક્ષસા મનસા કૃતમ્ ॥ ૨૫॥

નાભ્યાં શિશ્નકૃતં પાપં ગુદે ગુદકૃતં હરેત્ ।
પાર્શ્વયોર્ધારણાદ્બ્રહ્મન્ પરસ્ત્ર્યાલિઙ્ગનાદિકમ્ ॥ ૨૬॥

તદ્ભસ્મધારણં શસ્તં સર્વત્રૈવ ત્રિલિઙ્ગકમ્ ।
બ્રહ્મવિષ્ણુમહેશાનાં ત્ર્યગ્ન્યગ્નીનાં ચ ધારણમ્ ॥ ૨૭॥

ગુણલોકત્રયાણાં ચ ધારણં તેન વૈ કૃતમ્ ।

ભસ્મચ્છન્નો દ્વિજો વિદ્વાન્મહાપાતકસમ્ભવૈઃ ॥ ૨૮॥

દોષૈર્વિયુજ્યતે સદ્યો મુચ્યતે ચ ન સંશયઃ ।
ભસ્મનિષ્ઠસ્ય દહ્યન્તે દોષા ભસ્માગ્નિસઙ્ગમાત્ ॥ ૨૯॥

ભસ્મસ્નાનવિશુદ્ધાત્મા આત્મનિષ્ઠ ઇતિ સ્મૃતઃ ।
ભસ્મના દિગ્ધસર્વાઙ્ગો ભસ્મદીપ્તત્રિપુણ્ડ્રકઃ ॥ ૩૦॥

ભસ્મશાયી ચ પુરુષો ભસ્મનિષ્ઠ ઇતિ સ્મૃતઃ ।
ભૂતપ્રેતપિશાચાદ્યા રોગાશ્ચાતીવ દુઃસહાઃ ॥ ૩૧॥

ભસ્મનિષ્ઠસ્ય સાન્નિધ્યાદ્વિદ્રવન્તિ ન સંશયઃ ।
ભાસનાદ્ભસિતં પ્રોક્તં ભસ્મ કલ્મષભક્ષણાત્ ॥ ૩૨॥

ભૂતિર્ભૂતિકરી પુંસાં રક્ષા રક્ષાકરી પુરા ।
ત્રિપુણ્ડ્રધારિણં દૃષ્ટ્વા ભૂતપ્રેતપુરઃસરાઃ ॥ ૩૩॥

ભીતાઃ પ્રકમ્પિતાઃ શીઘ્રં નશ્યન્ત્યેવ ન સંશયઃ ।
સ્મરણાદેવ રુદ્રસ્ય યથા પાપં પ્રણશ્યતિ ॥ ૩૪॥

અપ્યકાર્યસહસ્રાણિ કૃત્વા યઃ સ્નાતિ ભસ્મના ।
તત્સર્વં દહતે ભસ્મ યથાગ્નિસ્તેજસા વનમ્ ॥ ૩૫॥

કૃત્વાપિ ચાતુલં પાપં મૃત્યુકાલેઽપિ યો દ્વિજઃ ।
ભસ્મસ્નાયી ભવેત્કશ્ચિત્ક્ષિપ્રં પાપૈઃ પ્રમુચ્યતે ॥ ૩૬॥

ભસ્મસ્નાનાદ્ધિ શુદ્ધાત્મા જિતક્રોધો જિતેન્દ્રિયઃ ।
મત્સમીપં સમાગમ્ય ન સ ભૂયોઽભિવર્તતે ॥ ૩૭॥

વનસ્પતિગતે સોમે ભસ્મોદ્ધૂલિતવિગ્રહઃ ।
અર્ચિતં શઙ્કરં દૃષ્ટ્વા સર્વપાપૈઃ પ્રમુચ્યતે ॥ ૩૮॥

આયુષ્કામોઽથવા વિદ્વાન્ભૂતિકામોઽથવા નરઃ ।
નિત્યં વૈ ધારયેદ્ભસ્મ મોક્ષકામી ચ વૈ દ્વિજઃ ॥ ૩૯॥

ત્રિપુણ્ડ્રં પરમં પુણ્યં બ્રહ્મવિષ્ણુશિવાત્મકમ્ ।
યે ઘોરા રાક્ષસાઃ પ્રેતા યે ચાન્યે ક્ષુદ્રજન્તવઃ ॥ ૪૦॥

ત્રિપુણ્ડ્રધારણં દૃષ્ટ્વા પલાયન્તે ન સંશયઃ ।
કૃત્વા શૌચાદિકં કર્મ સ્નાત્વા તુ વિમલે જલે ॥ ૪૧॥

ભસ્મનોદ્ધૂલનં કાર્યમાપાદતલમસ્તકમ્ ।
કેવલં વારુણં સ્નાનં દેહે બાહ્યમલાપહમ્ ॥ ૪૨॥

વિભૂતિસ્તાનમનઘં બાહ્યાન્તરમલાપહમ્ ।
ત્યક્ત્વાપિ વારુણં સ્નાનં તત્પરઃ સ્યાન્ન સંશયઃ ॥ ૪૩॥

કૃતમપ્યકૃતં સત્યં ભસ્મસ્નાનં વિના મુને ।
ભસ્મસ્નાનં શ્રુતિપ્રોક્તમાગ્નેયં સ્નાનમુચ્યતે ॥ ૪૪॥

અન્તર્બહિશ્ચ સંશુદ્ધં શિવપૂજાફલં લભેત્ ।
યદ્બાહ્યમલમાત્રસ્ય નાશકં સ્તાનમસ્તિ તત્ ॥ ૪૫॥

તન્નાશયતિ તીવ્રેણ પ્રાણિબાહ્યાન્તરં મલમ્ ।
કૃત્વાપિ કોટિશો નિત્યં વારુણં સ્નાનમાદરાત્ ॥ ૪૬॥

ન ભવત્યેવ પૂતાત્મા ભસ્મસ્નાનં વિના મુને ।
યદ્ભસ્મસ્નાનમાહામ્યં તદ્વેદો વેદ તત્ત્વતઃ ॥ ૪૭॥

યદ્વા વેદ મહાદેવઃ સર્વદેવશિખામણિઃ ।
ભસ્મસ્નાનમકૃત્વૈવ યઃ કુર્યાત્કર્મ વૈદિકમ્ ॥ ૪૮॥

સ તત્કર્મકલાર્ધાર્ધમપિ નાપ્નોતિ વસ્તુતઃ ।
યઃ કરિષ્યતિ યત્નેન ભસ્મસ્નાનં યથાવિધિ ॥ ૪૯॥

સ એવૈકઃ સર્વકર્મસ્વધિકારી શ્રુતિશ્રુતઃ ।
પાવનં પાવનાનાં ચ ભસ્મસ્નાનં શ્રુતિશ્રુતમ્ ॥ ૫૦॥

ન કરિષ્યતિ યો મોહાત્સ મહાપાતકી ભવેત્ ।
અનન્તૈર્વારુણૈઃ સ્નાનૈર્યત્પુણ્યં પ્રાપ્યતે દ્વિજૈઃ ॥ ૫૧॥

તતોઽનન્તગુણં પુણ્યં ભસ્મસ્નાનાદવાપ્યતે ।
કાલત્રયેઽપિ કર્તવ્યં ભસ્મસ્નાનં પ્રયત્નતઃ ॥ ૫૨॥

ભસ્મસ્નાનં સ્મૃતં શ્રૌતં તત્ત્યાગી પતિતો ભવેત્ ।
મૂત્રાદ્યુત્સર્જનાન્તે તુ ભસ્મસ્નાનં પ્રયત્નતઃ ॥ ૫૩॥

કર્તવ્યમન્યથા પૂતા ન ભવિષ્યન્તિ માનવાઃ ।
વિધિવત્કૃતશૌચોઽપિ ભસ્મસ્નાનં વિના દ્વિજઃ ॥ ૫૪॥

ન ભવિષ્યતિ પૂતાત્મા નાધિકાર્યપિ કર્મણિ ।
અપાનવાયુનિર્યાતે જૃમ્ભણે સ્કન્દને ક્ષુતે ॥ ૫૫॥

શ્લેષ્મોદ્ધારેઽપિ કર્તવ્યં ભસ્મસ્નાનં પ્રયત્નતઃ ।
શ્રીભસ્મસ્નાનમાહાત્મ્યસ્યૈકદેશોઽત્ર વર્ણિતઃ ॥ ૫૬॥

પુનશ્ચ સમ્પ્રવક્ષ્યામિ ભસ્મસ્નાનોત્થિતં ફલમ્ ।
સાવધાનેન મનસા શ્રોતવ્યં મુનિપુઙ્ગવ ॥ ૫૭॥

ઇતિ શ્રીમદ્દેવીભાગવતે મહાપુરાણેઽષ્ટાદશસાહસ્ર્યાં
સંહિતાયામેકાદશસ્કન્ધે
વિભૂતિધારણમાહાત્મ્યવર્ણનં નામ ચતુર્દશોઽધ્યાયઃ ॥ ૧૧.૧૪॥

## ૧૧.૧૫ પઞ્ચદશોઽધ્યાયઃ । ત્રિપુણ્ડ્રોર્ધ્વપુણ્ડ્રધારણવિધિવર્ણનમ્ ।

શ્રીનારાયણ ઉવાચ ।
અગ્નિરિત્યાદિભિર્મન્ત્રૈર્ભસ્મ સંશોધ્ય સાદરમ્ ।
ધારણીયં લલાટાદૌ ત્રિપુણ્ડ્રં કેવલં દ્વિજૈઃ ॥ ૧॥

બ્રહ્મક્ષત્રિયવૈશ્યાશ્ચ એતે સર્વે દ્વિજાઃ સ્મૃતાઃ ।
તસ્માદ્દ્વિજૈઃ પ્રયત્નેન ત્રિપુણ્ડ્રં ધાર્યમન્વહમ્ ॥ ૨॥

યસ્યોપનયનં બ્રહ્મન્ સ એવ દ્વિજ ઉચ્યતે ।
તસ્માચ્છ્રૌતં દ્વિજૈઃ કાર્યં ત્રિપુણ્ડ્રસ્ય ચ ધારણમ્ ॥ ૩॥

વિભૂતિધારણં ત્યક્ત્વા યઃ સત્કર્મ સમાચરેત્ ।
તત્કૃતં ચાકૃતપ્રાયં ભવત્યેવ ન સંશયઃ ॥ ૪॥

ન ગાયત્ર્યુપદેશોઽપિ ભસ્મનો ધારણં વિના ।
તતો ધૃત્વૈવ ભસ્માઙ્ગે ગાયત્રીજપમાચરેત્ ॥ ૫॥

ગાયત્રીં મૂલમેવાહુર્બ્રાહ્મણ્યે મુનિપુઙ્ગવ ।
સા ભસ્મધારણાભાવે ન કેનાપ્યુપદિશ્યતે ॥ ૬॥

ન તાવદધિકારોઽસ્તિ ગાયત્રીગ્રહણે મુને ।
યાવન્ન ભસ્મ ભાલાદૌ ધૃતમગ્નિસમુદ્ભવમ્ ॥ ૭॥

ભસ્મહીનલલાટત્વં ન બ્રહ્મણ્યાનુમાપકમ્ ।
એવમેવ મયા બ્રહ્મન્ હેતુરુક્તઃ સુપુણ્યદઃ ॥ ૮॥

મન્ત્રપૂતં સિતં ભસ્મ લલાટે પરિવર્તતે ।

સ એવ બ્રાહ્મણો વિદ્વાન્સત્યં સત્યં મયોચ્યતે ॥ ૯॥

યસ્યાસ્તિ સહજા પ્રીતિર્મણિવદ્ભસ્મસઙ્ગ્રહે ।
સ એવ બ્રાહ્મણો બ્રહ્મન્ સત્યં સત્યં મયોચ્યતે ॥ ૧૦॥

ન યસ્ય સહજા પ્રીતિર્મણિવદ્ભસ્મસઙ્ગ્રહે ।
સ ચાણ્ડાલ ઇતિ જ્ઞેયો જન્મજન્માન્તરે ધ્રુવમ્ ॥ ૧૧॥

ન યસ્ય સહજા પ્રીતિસ્ત્રિપુણ્ડ્રોદ્ધૂલનાદિષુ ।
સ ચાણ્ડાલ ઇતિ જ્ઞેયઃ સત્યં સત્યં મયોચ્યતે ॥ ૧૨॥

યે ભસ્મધારણં ત્યક્ત્વા ભુઞ્જન્તે ચ ફલાદિકમ્ ।
તે સર્વે નરકં ઘોરં પ્રાપ્નુવન્તિ ન સંશયઃ ॥ ૧૩॥

(વિભૂતિધારણં ત્યક્ત્વા યઃ શિવં પૂજયિષ્યતિ ।
સ દુર્ભગઃ શિવદ્વેષ્ટા સ દ્વેષો નરકપ્રદઃ ।
સર્વકર્મબહિર્ભૂતો ભસ્મધારણવર્જિતઃ ॥)
વિભૂતિધારણં ત્યક્ત્વા કુર્વન્ હેમતુલામપિ ।
ન તત્ફલમવાપ્નોતિ પતિતો હિ ભવેદ્ધિ સઃ ॥ ૧૪॥

યથોપવીતરહિતૈઃ સન્ધ્યા ન ક્રિયતે દ્વિજૈઃ ।
તથા સન્ધ્યા ન કર્તવ્યા વિભૂતિરહિતૈરપિ ॥ ૧૫॥

ગતોપવીતૈઃ સન્ધ્યાયાં કાર્યઃ પ્રતિનિધિઃ ક્વચિત્ ।
જપાદિકં તુ સાવિત્ર્યાસ્તથૈવોપોષણાદિકમ્ ॥ ૧૬॥

વિભૂતિધારણે ત્વન્યો નાસ્તિ પ્રતિનિધિઃ ક્વચિત્ ।
વિભૂતિધારણં ત્યક્ત્વા યદિ સન્ધ્યાં કરોતિ યઃ ॥ ૧૭॥

પ્રત્યવૈત્યેવ યેનાસૌ નાધિકારી તદા દ્વિજઃ ।
યથા શ્રુત્વાન્ત્યજો વેદાન્પ્રત્યવૈતિ તથા દ્વિજઃ ॥ ૧૮॥

પ્રત્યવૈતિ ન સન્દેહઃ સન્ધ્યાકૃદ્ભસ્મવર્જિતઃ ।
સમ્પાદનીય યત્નેન શ્રૌતં ભસ્મ સદા દ્વિજૈઃ ॥ ૧૯॥

સ્માર્તં વા તદભાવે તુ લૌકિકં વા સમાહિતૈઃ ।
યાદૃશં તાદૃશં વાસ્તુ પવિત્રં ભસ્મ સન્તતમ્ ॥ ૨૦॥

ધારણીયં પ્રયત્નેન દ્વિજૈઃ સન્ધ્યાદિકર્મસુ ।
ન સંવિશન્તિ પાપાનિ ભસ્મનિષ્ઠે તતઃ સદા ॥ ૨૧॥

કર્તવ્યમપિ યત્નેન બ્રાહ્મણૈર્ભસ્મધારણમ્ ।
મધ્યાઙ્ગુલિત્રયેણૈવ સ્વદક્ષિણકરસ્ય તુ ॥ ૨૨॥

ષડઙ્ગુલાયતં માનમપિ ચાધિકમાનકમ્ ।
નેત્રયુગ્મપ્રમાણેન ભાલે દીપ્તં ત્રિપુણ્ડ્રકમ્ ॥ ૨૩॥

કદાચિદ્ભસ્મના કુર્યાત્સ રુદ્રો નાત્ર સંશયઃ ।
અકારોઽનામિકા પ્રોક્ત ઉકારો મધ્યમાઙ્ગુલિઃ ॥ ૨૪॥

મકારસ્તર્જની તસ્માત્ ત્રિપુણ્ડ્રં ત્રિગુણાત્મકમ્ ।
ત્રિપુણ્ડ્રં મધ્યમાતર્જન્યનામાભિરનુલોમતઃ ॥ ૨૫॥

અત્ર તે કથયામ્યેનમિતિહાસં પુરાતનમ્ ।
કદાચિદથ દુર્વાસાઃ પિતૃલોકં ગતોઽભવત્ ॥ ૨૬॥

ભસ્મસન્દિગ્ધસર્વાઙ્ગો રુદ્રાક્ષાભરણાન્વિતઃ ।
શિવ શઙ્કર સર્વાત્મઞ્છ્રીમાતર્જગદમ્બિકે ॥ ૨૭॥

નામાનીતિ ગૃણન્નુચ્ચૈસ્તાપસાનાં શિખામણિઃ ।
કવ્યવાડાદયસ્તે તુ પ્રત્યુત્થાનાભિવાદનૈઃ ॥ ૨૮॥

આસનાદ્યુપચારૈશ્ચ સમ્માનં બહુ ચક્રિરે ।
નાનાકથાભિરન્યોન્યં સમ્ભાષાઞ્ચક્રિરે તદા ॥ ૨૯॥

તસ્મિંસ્તુ સમયે કુમ્ભીપાકસ્થાનાં તુ પાપિનામ્ ।
ઘોરઃ સમભવચ્છબ્દો હા હતાઃ સ્મેતિવાદિનામ્ ॥ ૩૦॥

મૃતાઃ સ્મેતિ વદન્ત્યેકે દગ્ધાઃ સ્મેતિ પરે જગુઃ ।
છિન્નાઃ સ્મેતિ વિભિન્નાઃ સ્મેત્યેવં રોદનકારિણઃ ॥ ૩૧॥

શ્રુત્વા તં કરુણ શબ્દં દુઃખિતો મુનિરાડ્ હૃદિ ।
પપ્રચ્છ પિતૃનાથાંસ્તાન્કેષાં શબ્દોઽયમિત્યપિ ॥ ૩૨॥

તે સમૂચુર્મુનેઽત્રૈવ પુરી સંયમની પરા ।
વર્તતે યમરાડત્ર પાપિનાં ભોગદાયકઃ ॥ ૩૩॥

નાનાદૂતૈઃ કાલરૂપૈઃ કૃષ્ણવર્ણૈર્ભયઙ્કરૈઃ ।
સહિતોઽત્રૈવ તત્પુર્યાં નાયકો વિદ્યતેઽનઘ ॥ ૩૪॥

તત્ર કુણ્ડાન્યનેકાનિ પાપિનાં ભોગદાનિ ચ ।
ષડશીતિર્ઘોરરૂપૈર્દૂતૈઃ પરિવૃતાનિ ચ ॥ ૩૫॥

તત્ર મુખ્યતમં કુણ્ડં કુમ્ભીપાકાભિધં મહત્ ।
વર્તતે તદ્ગતાનાં ચ યાતનાનાં તુ વર્ણનમ્ ॥ ૩૬॥

કર્તું ન શક્યતે કૈશ્ચિદપિ વર્ષશતૈરપિ ।
યે શિવદ્રોહિણઃ સન્તિ તથા દેવીવિનિન્દકાઃ ॥ ૩૭॥

યે વિષ્ણુદ્રોહિણઃ સન્તિ પતન્ત્યત્રૈવ તે મુને ।
યે વેદનિન્દકાઃ સન્તિ સૂર્યસ્ય ચ ગણેશિતુઃ ॥ ૩૮॥

બ્રાહ્મણાનાં દ્રોહિણો યે પતન્ત્યત્રૈવ તે મુને ।
કામાચારાશ્ચ યે સન્તિ તપ્તમુદ્રાઙ્કિતાશ્ચ યે ॥ ૩૯॥

ત્રિશૂલધારિણો યે ચ પતન્ત્યત્રૈવ તે મુને ।
માતૃપિતૃગુરુજ્યેષ્ઠપુરાણસ્મૃતિનિન્દકાઃ ॥ ૪૦॥

યે ધર્મદૂષકાઃ સન્તિ પતન્ત્યત્રૈવ તે મુને ।
તેષામયં મહાઘોરઃ શબ્દઃ શ્રવણદારુણઃ ॥ ૪૧॥

શ્રૂયતેઽસ્માભિરનિશં વૈરાગ્યં યચ્છ્રુતેર્ભવેત્ ।
ઇતિ તેષાં વચઃ શ્રુત્વા મુનિરાટ્ તદ્દિદૃક્ષયા ॥ ૪૨॥

ઉત્થાય ચલિતસ્તૂર્ણં યયૌ કુણ્ડસમીપતઃ ।
અવાઙ્મુખો દદર્શાધસ્તસ્મિન્નેવ ક્ષણે મુને ॥ ૪૩॥

તત્રત્યાનાં પાપિનાં તુ સ્વર્ગાધિકમભૂત્સુખમ્ ।
હસન્તિ કેચિદ્ગાયન્તિ નૃત્યન્તિ ચ તથાપરે ॥ ૪૪॥

પરસ્પરં રમન્તે તેઽત્યુન્મત્તાઃ સુખવર્ધનાત્ ।
મૃદઙ્ગમુરજાવીણાઢક્કાદુન્દુભિનિસ્વનાઃ ॥ ૪૫॥

સમુદ્ભૂતાસ્તુ મધુરાઃ પઞ્ચમસ્વરભૂષિતાઃ ।
વસન્તવલ્લીપુષ્પાણાં સુગન્ધમરુતો વવુઃ ॥ ૪૬॥

મુનિસ્તુ ચકિતો દૃષ્ટ્વા યમદૂતાશ્ચ વિસ્મિતાઃ ।
શીઘ્રં તે કથયામાસુર્ધર્મરાજાય વેદિને ॥ ૪૭॥

મહારાજ મહાશ્ચર્યમધુનૈવાભવદ્વિભો ।
સ્વર્ગાદપ્યધિકં સૌખ્યં કુમ્ભીપાકસ્થપાપિનામ્ ॥ ૪૮॥

નિમિત્તં નૈવ જાનીમઃ કસ્માદિદમભૂદ્વિભો ।

ચકિતાઃ સ્મ વયં સર્વે પ્રાપ્તા દેવ ત્વદન્તિકમ્ ॥ ૪૯॥

નિશમ્ય દૂતવાણીં તાં ધર્મરાટ્ શીઘ્રમુત્થિતઃ ।
મહામહિષમારૂઢો યયૌ તે યત્ર પાપિનઃ ॥ ૫૦॥

તાં વાર્તાં પ્રેષયામાસ દૂતદ્વારામરાવતીમ્ ।
શ્રુત્વા તાં દેવરાજોઽપિ પ્રાપ્તો દેવગણૈઃ સહ ॥ ૫૧॥

બ્રહ્મલોકાત્પદ્મજોઽપિ વૈકુણ્ઠાદ્વિષ્ટરશ્રવાઃ ।
તત્તલ્લોકાચ્ચ દિક્પાલાઃ સમાજગ્મુર્ગણૈઃ સહ ॥ ૫૨॥

પરિવાર્ય સ્થિતાઃ સર્વે કુમ્ભીપાકમિતસ્તતઃ ।
અપશ્યંસ્તદ્ગતાઞ્જીવાન્સ્વર્ગાધિકસુખાન્વિતાન્ ॥ ૫૩॥

ચકિતા એવ તે સર્વે ન વિદુસ્તસ્ય કારણમ્ ।
અહો પાપસ્ય ભોગાર્થં કુણ્ડમેતદ્વિનિર્મિતમ્ ॥ ૫૪॥

તત્ર સૌખ્યં યદા જાતં તદા પાપાત્તુ કિં ભયમ્ ।
ઉચ્છિન્ના વેદમર્યાદા પરમેશકૃતા કથમ્ ॥ ૫૫॥

ભગવાન્ સ્વસ્ય સઙ્કલ્પં વિતથં કૃતવાન્કથમ્ ।
આશ્ચર્યમેતદાશ્ચર્યમેતદિત્યેવ ભાષિણઃ ॥ ૫૬॥

તટસ્થા અભવન્સર્વે ન વિદુસ્તત્ર કારણમ્ ।
એતસ્મિન્નન્તરે શૌરિઃ સમ્મન્ત્ર્ય વિબુધાદિભિઃ ॥ ૫૭॥

યયૌ કૈશ્ચિત્સુરગણૈઃ સહિતઃ શઙ્કરાલયમ્ ।
પાર્વત્યા સહિતં દેવં કોટિકન્દર્પસુન્દરમ્ ॥ ૫૮॥

રમણીયતમાઙ્ગં તં લાવણ્યખનિમદ્ભુતમ્ ।
સદા ષોડશવર્ષીયં નાનાલઙ્કારભૂષિતમ્ ॥ ૫૯॥

નાનાગણૈઃ પરિવૃતં લાલયન્તં પરાં શિવામ્ ।
દદર્શ ચન્દ્રમૌલિં સ ચતુર્વેદં નનામ હ ॥ ૬૦॥

વૃત્તાન્તં કથયામાસ ચમત્કૃતમતિસ્ફુટમ્ ।
એતસ્ય કારણં દેવ ન જાનીમઃ કથઞ્ચન ॥ ૬૧॥

વદ તત્કારણં દેવ સર્વજ્ઞોઽસિ યતઃ પ્રભો ।
વિષ્ણુવાક્યં તદા શ્રુત્વા પ્રસન્નમુખપઙ્કજઃ ॥ ૬૨॥

ઉવાચ મધુરં વાક્યં મેઘગમ્ભીરયા ગિરા ।
શ‍ૃણુ વિષ્ણો તન્નિમિત્તં નાશ્ચર્યં ત્વત્ર વિદ્યતે ॥ ૬૩॥

ભસ્મનો મહિમૈવાયં ભસ્મના કિં ભવેન્ન હિ ।
કુમ્ભીપાકં ગતો દ્રષ્ટું દુર્વાસાઃ શૈવસમ્મતઃ ॥ ૬૪॥

અવાઙ્મુખો દદર્શાધસ્તદા વાયુવશાદ્દરે ।
ભાલભસ્મકણાસ્તત્ર પતિતા દૈવયોગતઃ ॥ ૬૫॥

તેન જાતમિદં સર્વં ભસ્મનો મહિમા ત્વયમ્ ।
ઇતઃ પરં તુ તત્તીર્થં પિતૃલોકનિવાસિનામ્ ॥ ૬૬॥

ભવિષ્યતિ ન સન્દેહો યત્ર સ્નાત્વા સુખી ભવેત્ ।
પિતૃતીર્થં તુ તન્નામ્નાપ્યત ઊર્ધ્વં ભવિષ્યતિ ॥ ૬૭॥

મલ્લિઙ્ગસ્થાપનં તત્ર કાર્યં દેવ્યાશ્ચ સત્તમ ।
પૂજયિષ્યન્તિ તે તત્ર પિતૃલોકનિવાસિનઃ ॥ ૬૮॥

ત્રૈલોક્યે યાનિ તીર્થાનિ તત્ર શ્રેષ્ઠમિદં ભવેત્ ।
પિત્રીશ્વરીપૂજયા તુ ત્રૈલોક્યં પૂજિતં ભવેત્ ॥ ૬૯॥

શ્રીનારાયણ ઉવાચ ।
ઇતિ દેવવચઃ શ્રુત્વા દેવં મૂર્ધ્ના પ્રણમ્ય ચ ।
તદનુજ્ઞાં સમાદાય યયૌ દેવાન્તિકં હરિઃ ॥ ૭૦॥

તત્સર્વં કથયામાસ કારણં શઙ્કરોદિતમ્ ।
સાધુ સાધ્વિતિ તે પ્રોચુરમરા મૌલિચાલનૈઃ ॥ ૭૧॥

શશંસુર્ભસ્મમાહાત્મ્યં હરિબ્રહ્માદયઃ સુરાઃ ।
પિતરશ્ચૈવ સન્તુષ્ટાસ્તીર્થલાભાત્પરન્તપ ॥ ૭૨॥

તત્તીર્થતીરે લિઙ્ગં ચ દેવ્યા મૂર્તિં યથાવિધિ ।
સ્થાપયામાસુરમરાઃ પૂજયામાસુરન્વહમ્ ॥ ૭૩॥

તત્ર યે પ્રાણિનોઽભૂવન્પાપભોગાર્થમાસ્થિતાઃ ।
તે વિમાનં સમારુહ્ય ગતાઃ કૈલાસમણ્ડલમ્ ॥ ૭૪॥

નામ્ના ભદ્રગણાસ્તે તુ વસન્ત્યદ્યાપિ તત્ર હિ ।
પુનશ્ચ દૂરદેશે તુ કુમ્ભીપાકો વિનિર્મિતઃ ॥ ૭૫॥

નિરુદ્ધં શૈવગમનં દેવૈસ્તત્ર તુ તદ્દિનાત્ ।

ઇતિ તે સર્વમાખ્યાતં ભસ્મમાહાત્મ્યમુત્તમમ્ ॥ ૭૬॥

નાતઃ પરતરં કિઞ્ચિદધિકં વિદ્યતે મુને ।
ઊર્ધ્વપુણ્ડ્રવિધિં ચૈવાપ્યધિકારિવિભેદતઃ ॥ ૭૭॥

પ્રવક્ષ્યે મુનિશાર્દૂલ વૈષ્ણવાગમલોકનાત્ ।
ઊર્ધ્વપુણ્ડ્રપ્રમાણાનિ દિવ્યાન્યઙ્ગુલિભેદતઃ ॥ ૭૮॥

વર્ણાભિમન્ત્રદેવાંશ્ચ પ્રવક્ષ્યામિ ફલાનિ ચ ।
પર્વતાગ્રે નદીતીરે શિવક્ષેત્રે વિશેષતઃ ॥ ૭૯॥

સિન્ધુતીરે ચ વલ્મીકે તુલસીમૂલમાશ્રિતે ।
મૃદ એતાસ્તુ સઙ્ગ્રાહ્યા વર્જયેદન્યમૃત્તિકાઃ ॥ ૮૦॥

શ્યામં શાન્તિકરં પ્રોક્તં રક્તં વશ્યકરં ભવેત્ ।
શ્રીકરં પીતમિત્યાહુર્ધર્મદં શ્વેતમુચ્યતે ॥ ૮૧॥

અઙ્ગુષ્ઠઃ પુષ્ટિદઃ પ્રોક્તો મધ્યમાયુષ્કરી ભવેત્ ।
અનામિકાન્નદા નિત્યં મુક્તિદા ચ પ્રદેશિની ॥ ૮૨॥

એતૈરઙ્ગુલિભેદૈસ્તુ કારયેન્ન નખૈઃ સ્પૃશેત્ ।
વર્તિદીપાવલિકૃતિં વેણપત્રાકૃતિં તથા ॥ ૮૩॥

પદ્મસ્ય મુકુલાકારં તથા કુર્યાત્પ્રયત્નતઃ ।
મત્સ્યકૂર્માકૃતિં વાપિ શઙ્ખાકારં તતઃ પરમ્ ॥ ૮૪॥

દશાઙ્ગુલિપ્રમાણં તુ ઉત્તમોત્તમમુચ્યતે ।
નવાઙ્ગુલં મધ્યમં સ્યાદષ્ટાઙ્ગુલમતઃ પરમ્ ॥ ૮૫॥

સપ્તષટ્પઞ્ચભિઃ પુણ્ડ્રં મધ્યમં ત્રિવિધં સ્મૃતમ્ ।
ચતુસ્ત્રિદ્વ્યઙ્ગુલૈઃ પુણ્ડ્રં કનિષ્ઠં ત્રિવિધં ભવેત્ ॥ ૮૬॥

લલાટે કેશવં વિદ્યાન્નારાયણમથોદરે ।
માધવં હૃદિ વિન્યસ્ય ગોવિન્દં કણ્ઠકૂપકે ॥ ૮૭॥

ઉદરે દક્ષિણે પાર્શ્વે વિષ્ણુરિત્યભિધીયતે ।
તત્પાર્શ્વબાહુમધ્યે ચ મધુસૂદનમેવ ચ ॥ ૮૮॥

ત્રિવિક્રમં કર્ણદેશે વામકુક્ષૌ તુ વામનમ્ ।
શ્રીધરં બાહુકે વામે હૃષીકેશં તુ કર્ણકે ॥ ૮૯॥

પૃષ્ઠે ચ પદ્મનાભં તુ કકુદ્દામોદરં સ્મરેત્ ।
દ્વાદશૈતાનિ નામાનિ વાસુદેવેતિ મૂર્ધનિ ॥ ૯૦॥

પૂજાકાલે ચ હોમે ચ સાયં પ્રાતઃ સમાહિતઃ ।
નામાન્યુચ્ચાર્ય વિધિના ધારયેદૂર્ધ્વપુણ્ડ્રકમ્ ॥ ૯૧॥

અશુચિર્વાપ્યનાચારો મનસા પાપમાચરેત્ ।
શુચિરેવ ભવેન્નિત્યં મૂર્ધ્નિ પુણ્ડ્રાઙ્કિતો નરઃ ॥ ૯૨॥

ઊર્ધ્વપુણ્ડ્રધરો મર્ત્યો મ્રિયતે યત્ર કુત્રચિત્ ।
શ્વપાકોઽપિ વિમાનસ્થો મમ લોકે મહીયતે ॥ ૯૩॥

એકાન્તિનો મહાભાગા મત્સ્વરૂપવિદોઽમલાઃ ।
સાન્તરાલાન્પ્રકુર્વન્તિ પુણ્ડ્રાન્વિષ્ણુપદાકૃતીન્ ॥ ૯૪॥

પરમૈકાન્તિનોઽપ્યેવં મત્પાદૈકપરાયણાઃ ।
હરિદ્રાચૂર્ણસંયુક્તાઞ્છૂલાકારાંસ્તુ વામલાન્ ॥ ૯૫॥

અન્યે તુ વૈષ્ણવાઃ પુણ્ડ્રાનચ્છિદ્રાનપિ ભક્તિતઃ ।
પ્રકુર્વીરન્દીપપદ્મવેણુપત્રોપમાકૃતીન્ ॥ ૯૬॥

અચ્છિદ્રાનપિ સચ્છિદ્રાન્ કુર્યુઃ કેવલવૈષ્ણવાઃ ।
અચ્છિદ્રકરણે તેષાં પ્રત્યવાયો ન વિદ્યતે ॥ ૯૭॥

એકાન્તિનાં પ્રપન્નાનાં પરમૈકાન્તિનામપિ ।
અચ્છિદ્રપુણ્ડ્રાકરણે પ્રત્યવાયો મહાન્ભવેત્ ॥ ૯૮॥

ઊર્ધ્વપુણ્ડ્રં તુ યઃ કુર્યાદ્દણ્ડાકારં તુ શોભનમ્ ।
મધ્યે છિદ્રં વૈષ્ણવાશ્ચ નમોઽન્તૈઃ કેશવાદિભિઃ ॥ ૯૯॥

વિમલાન્યૂર્ધ્વપુણ્ડ્રાણિ સાન્તરાલાનિ યો નરઃ ।
કરોતિ વિપુલં તત્ર મન્દિરં મે કરોતિ સઃ ॥ ૧૦૦॥

ઊર્ધ્વપુણ્ડ્રસ્ય મધ્યે તુ વિશાલે સુમનોહરે ।
લક્ષ્મ્યા સાકં સહાસીનો રમતે વિષ્ણુરવ્યયઃ ॥ ૧૦૧॥

નિરન્તરાલં યઃ કુર્યાદૂર્ધ્વપુણ્ડ્રં દ્વિજાધમઃ ।
સ હિ તત્ર સ્થિતં વિષ્ણું શ્રિયં ચૈવ વ્યપોહતિ ॥ ૧૦૨॥

અચ્છિદ્રમૂર્ધ્વપુણ્ડ્રં તુ યઃ કરોતિ વિમૂઢધીઃ ।
સ પર્યાયેણ તાનેતિ નરકાનેકવિંશતિમ્ ॥ ૧૦૩॥

ઋજૂનિ સ્ફુટપાર્શ્વાનિ સાન્તરાલાનિ વિન્યસેત્ ।
ઊર્ધ્વપુણ્ડ્રાણિ દણ્ડાબ્જદીપમત્સ્યનિભાનિ ચ ॥ ૧૦૪॥

શિખોપવીતવદ્ધાર્યમૂર્ધ્વપુણ્ડ્રં દ્વિજેન ચ ।
વિના કૃતાશ્ચેદ્વિફલાઃ ક્રિયાઃ સર્વા મહામુને ॥ ૧૦૫॥

તસ્માત્સર્વેષુ કાર્યેષુ કાર્યં વિપ્રસ્ય ધીમતઃ ।
ઊર્ધ્વપુણ્ડ્રં ત્રિશૂલં ચ વર્તુલં ચતુરસ્રકમ્ ॥ ૧૦૬॥

અર્ધચન્દ્રાદિકં લિઙ્ગં વેદનિષ્ઠો ન ધારયેત્ ।
જન્મના લબ્ધજાતિસ્તુ વેદપન્થાનમાશ્રિતઃ ॥ ૧૦૭॥

પુણ્ડ્રાન્તરં ભ્રમાદ્વાપિ લલાટે નૈવ ધારયેત્ ।
ખ્યાતિકાન્ત્યાદિસિદ્ધ્યર્થં ચાપિ વિષ્ણ્વાગમાદિષુ ॥ ૧૦૮॥

સ્થિતં પુણ્ડ્રાન્તરં નૈવ ધારયેદ્વૈદિકો જનઃ ।
તિર્યક્ત્રિપુણ્ડ્રં સન્ત્યજ્ય શ્રૌતં કથમપિ ભ્રમાત્ ॥ ૧૧૧॥

લલાટે ભસ્મના તિર્યક્ત્રિપુણ્ડ્રસ્ય ચ ધારણમ્ ।
વિના પુણ્ડ્રાન્તરં મોહાદ્ધારયન્નારકી ભવેત્ ॥ ૧૧૦॥

વેદમાર્ગૈકનિષ્ઠસ્તુ મોહેનાપ્યઙ્કિતો યદિ ।
પતત્યેવ ન સન્દેહસ્તથા પુણ્ડ્રાન્તરાદપિ ॥ ૧૧૧॥

નાઙ્કનં વિગ્રહે કુર્યાદ્વેદમાર્ગં સમાશ્રિતઃ ।
શ્રૌતધર્મૈકનિષ્ઠાનાં લિઙ્ગં તુ શ્રૌતમેવ હિ ॥ ૧૧૨॥

અશ્રૌતધર્મનિષ્ઠાનામશ્રૌત લિઙ્ગમીરિતમ્ ।
દેવતા વેદસિદ્ધા યાસ્તાસાં લિઙ્ગં તુ વૈદિકમ્ ॥ ૧૧૩॥

અશ્રૌતતન્ત્રનિષ્ઠા યાસ્તાસામશ્રૌતમેવ હિ ।
વેદસિદ્ધો મહાદેવઃ સાક્ષાત્સંસારમોચકઃ ॥ ૧૧૪॥

ભક્તાનામુપકારાય શ્રૌતં લિઙ્ગં દધાતિ ચ ।
વેદસિદ્ધસ્ય વિષ્ણોશ્ચ શ્રૌતં લિઙ્ગં ન ચેતરત્ ॥ ૧૧૫॥

પ્રાદુર્ભાવવિશેષાણામપિ તસ્ય તદેવ હિ ।
શ્રૌતં લિઙ્ગં તુ વિજ્ઞેયં ત્રિપુણ્ડ્રોદ્ધૂલનાદિકમ્ ॥ ૧૧૬॥

અશ્રૌતમૂર્ધ્વપુણ્ડ્રાદિ નૈવ તિર્યક્ત્રિપુણ્ડ્રકમ્ ।

વેદમાર્ગૈકનિષ્ઠાનાં વેદોક્તેનૈવ વર્ત્મના ॥ ૧૧૭॥

લલાટે ભસ્મના તિર્યક્ત્રિપુણ્ડ્રં ધાર્યમેવ હિ ।
યસ્તુ નારાયણં દેવં પ્રપન્નઃ પરમં પદમ્ ।
ધારયેત્સર્વદા શૂલં લલાટે ગન્ધવારિણા ॥ ૧૧૮॥

ઇતિ શ્રીમદ્દેવીભાગવતે મહાપુરાણેઽષ્ટાદશસાહસ્ર્યાં
સંહિતાયામેકાદશસ્કન્ધે
ત્રિપુણ્ડ્રોર્ધ્વપુણ્ડ્રધારણવિધિવર્ણનં નામ પઞ્ચદશોઽધ્યાયઃ ॥ ૧૧.૧૫॥

## ૧૧.૧૬ ષોડશોઽધ્યાયઃ । સન્ધ્યોપાસનનિરૂપણમ્ ।

શ્રીનારાયણ ઉવાચ ।
અથાતઃ શ્રૂયતાં પુણ્યં સન્ધ્યોપાસનમુત્તમમ્ ।
ભસ્મધારણમાહાત્મ્યં કથિતં ચૈવ વિસ્તરાત્ ॥ ૧॥

પ્રાતઃસન્ધ્યાવિધાનં ચ કથયિષ્યામિ તેઽનઘ ।
પ્રાતઃસન્ધ્યાં સનક્ષત્રાં મધ્યાહ્ને મધ્યભાસ્કરામ્ ॥ ૨॥

સસૂર્યાં પશ્ચિમાં સન્ધ્યાં તિસ્રઃ સન્ધ્યા ઉપાસતે ।
તદ્ભેદાનપિ વક્ષ્યામિ શ ृણુ દેવર્ષિસત્તમ ॥ ૩॥

ઉત્તમા તારકોપેતા મધ્યમા લુપ્તતારકા ।
અધમા સૂર્યસહિતા પ્રાતઃસન્ધ્યા ત્રિધા મતા ॥ ૪॥

ઉત્તમા સૂર્યસહિતા મધ્યમાસ્તમિતે રવૌ ।
અધમા તારકોપેતા સાયંસન્ધ્યા ત્રિધા મતા ॥ ૫॥

વિપ્રો વૃક્ષો મૂલકાન્યત્ર સન્ધ્યા
વેદઃ શાખા ધર્મકર્માણિ પત્રમ્ ।
તસ્માન્મૂલં યત્નતો રક્ષણીયં
છિન્ને મૂલે નૈવ વૃક્ષો ન શાખા ॥ ૬॥

સન્ધ્યા યેન ન વિજ્ઞાતા સન્ધ્યા યેનાનુપાસિતા ।
જીવમાનો ભવેચ્છૂદ્રો મૃતઃ શ્વા ચૈવ જાયતે ॥ ૭॥

તસ્માન્નિત્યં પ્રકર્તવ્યં સન્ધ્યોપાસનમુત્તમમ્ ।
તદભાવેઽન્યકર્માદાવધિકારી ભવેન્ન હિ ॥ ૮॥

ઉદયાસ્તમયાદૂર્ધ્વં યાવત્સ્યાદ્ઘટિકાત્રયમ્ ।
તાવત્સન્ધ્યામુપાસીત પ્રાયશ્ચિત્તં તતઃ પરમ્ ॥ ૯॥

કાલાતિક્રમણે જાતે ચતુર્થાર્ઘ્યં પ્રદાપયેત્ ।
અથવાષ્ટશતં દેવીં જપ્ત્વાદૌ તાં સમાચરેત્ ॥ ૧૦॥

યસ્મિન્કાલે તુ યત્કર્મ તત્કાલાધીશ્વરીં ચ તામ્ ।
સન્ધ્યામુપાસ્ય પશ્ચાત્તુ તત્કાલીનં સમાચરેત્ ॥ ૧૧॥

ગૃહે સાધારણા પ્રોક્તા ગોષ્ઠે વૈ મધ્યમા ભવેત્ ।
નદીતીરે ચોત્તમા સ્યાદ્દેવીગેહે તદુત્તમા ॥ ૧૨॥

યતો દેવ્યા ઉપાસેયં તતો દેવ્યાસ્તુ સન્નિધૌ ।
સન્ધ્યાત્રયં પ્રકર્તવ્યં તદાનન્ત્યાય કલ્પતે ॥ ૧૩॥

એતસ્યા અપરં દૈવં બ્રાહ્મણાનાં ચ વિદ્યતે ।
ન વિષ્ણૂપાસના નિત્યા ન શિવોપાસના તથા ॥ ૧૪॥

યથા ભવેન્મહાદેવ્યા ગાયત્ર્યાઃ શ્રુતિચોદિતા ।
સર્વવેદસારભૂતા ગાયત્ર્યાસ્તુ સમર્ચના ॥ ૧૫॥

બ્રહ્માદયોઽપિ સન્ધ્યાયાં તાં ધ્યાયન્તિ જપન્તિ ચ ।
વેદા જપન્તિ તાં નિત્યં વેદોપાસ્યા તતઃ સ્મૃતા ॥ ૧૬॥

તસ્માત્સર્વે દ્વિજાઃ શાક્તા ન શૈવા ન ચ વૈષ્ણવાઃ ।
આદિશક્તિમુપાસન્તે ગાયત્રીં વેદમાતરમ્ ॥ ૧૭॥

આચાન્તઃ પ્રાણમાયમ્ય કેશવાદિકનામભિઃ ।
કેશવશ્ચ તથા નારાયણો માધવ એવ ચ ॥ ૧૮॥

ગોવિન્દો વિષ્ણુરેવાથ મધુસૂદન એવ ચ ।
ત્રિવિક્રમો વામનશ્ચ શ્રીધરોઽપિ તતઃ પરમ્ ॥ ૧૯॥

હૃષીકેશઃ પદ્મનાભો દામોદર અતઃ પરમ્ ।
સઙ્કર્ષણો વાસુદેવઃ પ્રદ્યુમ્નોઽપ્યનિરુદ્ધકઃ ॥ ૨૦॥

પુરુષોત્તમાધોક્ષજૌ ચ નારસિંહોઽપ્યુતસ્તથા ।
જનાર્દન ઉપેન્દ્રશ્ચ હરિઃ કૃષ્ણોઽન્તિમસ્તથા ॥ ૨૧॥

ઓઙ્કારપૂર્વકં નામ ચતુર્વિંશતિસઙ્ખ્યયા ।
સ્વાહાન્તૈઃ પ્રાશયેદ્વારિ નમોઽન્તૈઃ સ્પર્શયેત્તથા ॥ ૨૨॥

કેશવાદિત્રિભિઃ પીત્વા દ્વાભ્યાં પ્રક્ષાલયેત્કરૌ ।
મુખં પ્રક્ષાલયેદ્વાભ્યાં દ્વાભ્યામુન્માર્જનં તથા ॥ ૨૩॥

એકેન પાણિં સમ્પ્રોક્ષ્ય પાદાવપિ શિરોઽપિ ચ ।
સઙ્કર્ષણાદિદેવાનાં દ્વાદશાઙ્ગાનિ સંસ્પૃશેત્ ॥ ૨૪॥

દક્ષિણેનોદકં પીત્વા વામેન સંસ્પૃશેદ્બુધઃ ।
તાવન્ન શુધ્યતે તોયં યાવદ્વામેન ન સ્પૃશેત્ ॥ ૨૫॥

ગોકર્ણાકૃતિહસ્તેન માષમાત્રં જલં પિબેત્ ।
તતો ન્યૂનાધિકં પીત્વા સુરાપાયી ભવેદ્દ્વિજઃ ॥ ૨૬॥

સંહતાઙ્ગુલિના તોયં પાણિના દક્ષિણેન તુ ।
મુક્તાઙ્ગુષ્ઠકનિષ્ઠાભ્યાં શેષેણાચમનં વિદુઃ ॥ ૨૭॥

પ્રાણાયામં તતઃ કૃત્વા પ્રણવસ્મૃતિપૂર્વકમ્ ।
ગાયત્રીં શિરસા સાર્ધં તુરીયપદસંયુતામ્ ॥ ૨૮॥

દક્ષિણે રેચયેદ્વાયું વામેન પૂરિતોદરમ્ ।
કુમ્ભેન ધારયેન્નિત્યં પ્રાણાયામં વિદુર્બુધાઃ ॥ ૨૯॥

પીડયેદ્દક્ષિણાં નાડીમઙ્ગુષ્ઠેન તથોત્તરામ્ ।
કનિષ્ઠાનામિકાભ્યાં તુ મધ્યમાં તર્જનીં ત્યજેત્ ॥ ૩૦॥

રેચકઃ પૂરકશ્ચૈવ પ્રાણાયામોઽથ કુમ્ભકઃ ।
પ્રોચ્યતે સર્વશાસ્ત્રેષુ યોગિભિર્યતમાનસૈઃ ॥ ૩૧॥

રેચકઃ સૃજતે વાયું પૂરકઃ પૂરયેત્તુ તમ્ ।
સામ્યેન સંસ્થિતિર્યત્તત્કુમ્ભકઃ પરિકીર્તિતઃ ॥ ૩૨॥

નીલોત્પલદલશ્યામં નાભિમધ્યે પ્રતિષ્ઠિતમ્ ।
ચતુર્ભુજં મહાત્માનં પૂરકે ચિન્તયેદ્ધરિમ્ ॥ ૩૩॥

કુમ્ભકે તુ હૃદિ સ્થાને ધ્યાયેત્તુ કમલાસનમ્ ।
પ્રજાપતિં જગન્નાથં ચતુર્વક્ત્રં પિતામહમ્ ॥ ૩૪॥

રેચકે શઙ્કરં ધ્યાયેલ્લલાટસ્થં મહેશ્વરમ્ ।
શુદ્ધસ્ફટિકસઙ્કાશં નિર્મલં પાપનાશનમ્ ॥ ૩૫॥

પૂરકે વિષ્ણુસાયુજ્યં કુમ્ભકે બ્રહ્મણો ગતિમ્ ।

રેચકેન તૃતીયં તુ પ્રાપ્નુયાદીશ્વરં પરમ્ ॥ ૩૬॥

પૌરાણાચમનાદ્યં ચ પ્રોક્તં દેવર્ષિસત્તમ ।
શ્રૌતમાચમનાદ્યં ચ શ‍ૃણુ પાપાપહં મુને ॥ ૩૭॥

પ્રણવં પૂર્વમુચ્ચાર્ય ગાયત્રીં તુ તદિત્યૃચમ્ ।
પાદાદૌ વ્યાહૃતીસ્તિસ્રઃ શ્રૌતાચમનમુચ્યતે ॥ ૩૮॥

ગાયત્રીં શિરસા સાર્ધં જપેદ્વ્યાહૃતિપૂર્વિકામ્ ।
પ્રતિપ્રણવસંયુક્તાં ત્રિતયં પ્રાણસંયમઃ ॥ ૩૯॥

(સલક્ષણં તુ પ્રાણાનામાયામં કીર્ત્યતેઽધુના ।
નાનાપાપૈકશમનં મહાપુણ્યફલપ્રદમ્ ॥)
પઞ્ચાઙ્ગુલીભિર્નાસાગ્રં પીડયેત્પ્રણવેન તુ ।
સર્વપાપહરા મુદ્રા વાનપ્રસ્થગૃહસ્થયોઃ ॥ ૪૦॥

કનિષ્ઠાનામિકાઙ્ગુષ્ઠૈર્યતેશ્ચ બ્રહ્મચારિણઃ ।
આપો હિ ષ્ઠેતિ તિસૃભિઃ પ્રોક્ષણં સ્યાત્કુશોદકૈઃ ॥ ૪૧॥

ઋગન્તે માર્જનં કુર્યાત્પાદાન્તે વા સમાહિતઃ ।
નવપ્રણવયુક્તેન આપો હિ ષ્ઠેત્યનેન તુ ॥ ૪૨॥

નશ્યેદઘં માર્જનેન સંવત્સરસમુદ્ભવમ્ ।
તત આચમનં કૃત્વા સૂર્યશ્ચેતિ પિબેદપઃ ॥ ૪૩॥

અન્તઃકરણસમ્ભિન્નં પાપં તસ્ય વિનશ્યતિ ।
પ્રણવેન વ્યાહૃતિભિર્ગાયત્ર્યા પ્રણવાદ્યયા ॥ ૪૪॥

આપો હિ ષ્ઠેતિ સૂક્તેન માર્જનં ચૈવ કારયેત્ ।
ઉદ્ધૃત્ય દક્ષિણે હસ્તે જલં ગોકર્ણવત્કૃતે ॥ ૪૫॥

નીત્વા તં નાસિકાગ્રં તુ વામકુક્ષૌ સ્મરેદઘમ્ ।
પુરુષં કૃષ્ણવર્ણં ચ ઋતં ચેતિ પઠેત્તતઃ ॥ ૪૬॥

દ્રુપદાં વા ઋચં પશ્ચાદ્દક્ષનાસાપુટેન ચ ।
શ્વાસમાર્ગેણ તં પાપમાનયેત્કરવારિણિ ॥ ૪૭॥

નાવલોક્યૈવ તદ્વારિ વામભાગેઽશ્મનિ ક્ષિપેત્ ।
નિષ્પાપં તુ શરીરં મે સઞ્જાતમિતિ ભાવયેત્ ॥ ૪૮॥

ઉત્થાય તુ તતઃ પાદૌ દ્વૌ સમૌ સન્નિયોજયેત્ ।

જલાઞ્જલિં ગૃહીત્વા તુ તર્જન્યઙ્ગુષ્ઠવર્જિતમ્ ॥ ૪૯॥

વીક્ષ્ય ભાનું ક્ષિપેદ્વારિ ગાયત્ર્યા ચાભિમન્ત્રિતમ્ ।
ત્રિવારં મુનિશાર્દૂલ વિધિરેષોઽર્ઘ્યમોચને ॥ ૫૦॥

તતઃ પ્રદક્ષિણાં કુર્યાદસાવાદિત્યમન્ત્રતઃ ।
મધ્યાહ્ને સકૃદેવ સ્યાત્સન્ધ્યયોસ્તુ ત્રિવારતઃ ॥ ૫૧॥

ઈષન્નમ્રઃ પ્રભાતે તુ મધ્યાહ્ને દણ્ડવત્સ્થિતઃ ।
આસને ચોપવિષ્ટસ્તુ દ્વિજઃ સાયં ક્ષિપેદપઃ ॥ ૫૨॥

ઉદકં પ્રક્ષિપેદ્યસ્માત્તત્કારણમતઃ શ‍ૃણુ ।
ત્રિંશત્કોટ્યો મહાવીરા મન્દેહા નામ રાક્ષસાઃ ॥ ૫૩॥

કૃતઘ્ના દારુણા ઘોરાઃ સૂર્યમિચ્છન્તિ ખાદિતુમ્ ।
તતો દેવગણાઃ સર્વે ઋષયશ્ચ તપોધનાઃ ॥ ૫૪॥

ઉપાસતે મહાસન્ધ્યાં પ્રક્ષિપન્ત્યુદકાઞ્જલિમ્ ।
દહ્યન્તે તેન દૈત્યાસ્તે વજ્રીભૂતેન વારિણા ॥ ૫૫॥

એતસ્માત્કારણાદ્વિપ્રાઃ સન્ધ્યાં નિત્યમુપાસતે ।
મહાપુણ્યસ્ય જનનં સન્ધ્યોપાસનમીરિતમ્ ॥ ૫૬॥

અર્ઘ્યાઙ્ગભૂતમન્ત્રોઽયં પ્રોચ્યતે શ‍ૃણુ નારદ ।
યદુચ્ચારણમાત્રેણ સાઙ્ગં સન્ધ્યાફલં ભવેત્ ॥ ૫૭॥

સોઽહમર્કોઽસ્મ્યહં જ્યોતિરાત્મા જ્યોતિરહં શિવઃ ।
આત્મજ્યોતિરહં શુક્લઃ સર્વજ્યોતી રસોઽસ્મ્યહમ્ ॥ ૫૮॥

આગચ્છ વરદે દેવિ ગાયત્રિ બ્રહ્મરૂપિણિ ।
જપાનુષ્ઠાનસિદ્ધ્યર્થં પ્રવિશ્ય હૃદયં મમ ॥ ૫૯॥

ઉત્તિષ્ઠ દેવિ ગન્તવ્યં પુનરાગમનાય ચ ।
અર્ઘ્યેષુ દેવિ ગન્તવ્યં પ્રવિશ્ય હૃદયં મમ ॥ ૬૦॥

તતઃ શુદ્ધસ્થલે નૈજમાસનં સ્થાપયેદ્બુધઃ ।
તત્રારુહ્ય જપેત્પશ્ચાદ્ગાયત્રીં વેદમાતરમ્ ॥ ૬૧॥

અત્રૈવ ખેચરી મુદ્રા પ્રાણાયામોત્તરં મુને ।
પ્રાતઃસન્ધ્યાવિધાને ચ કીર્તિતા મુનિપુઙ્ગવ ॥ ૬૨॥

તન્નામાર્થં પ્રવક્ષ્યામિ સાદરં શૃણુ નારદ ।
ચિત્તં ચરતિ ખે યસ્માજ્જિહ્વા ચરતિ ખે ગતા ॥ ૬૩॥

ભ્રુવોરન્તર્ગતા દૃષ્ટિર્મુદ્રા ભવતિ ખેચરી ।
ન ચાસનં સિધ્ધસમં ન કુમ્ભસદૃશોઽનિલઃ ॥ ૬૪॥

ન ખેચરીસમા મુદ્રા સત્યં સત્યં ચ નારદ ।
ઘણ્ટાવત્પણવોચ્ચારાદ્વાયું નિર્જિત્ય યત્નતઃ ॥ ૬૫॥

સ્થિરાસને સ્થિરો ભૂત્વા નિરહઙ્કારનિર્મમઃ ।
લક્ષણં નારદ મુને શૃણુ સિધ્ધાસનસ્ય ચ ॥ ૬૬॥

યોનિસ્થાનકમઙ્ઘ્રિમૂલઘટિતં કૃત્વા દૃઢં વિન્યસે-
ન્મેઢ્રે પાદમથૈકમેવ હૃદયં કૃત્વા સમં વિગ્રહમ્ ।
સ્થાણુઃ સંયમિતેન્દ્રિયોઽચલદૃશા પશ્યન્ભ્રુવોરન્તરં
તિષ્ઠત્યેતદતીવ યોગિસુખદં સિધ્ધાસનં પ્રોચ્યતે ॥ ૬૭॥

આયાતુ વરદા દેવી અક્ષરં બ્રહ્મસમ્મિતમ્ ।
ગાયત્રી છન્દસાં માતરિદં બ્રહ્મ જુષસ્વ મે ॥ ૬૮॥

યદહ્ના કુરુતે પાપં તદહ્ના પ્રતિમુચ્યતે ।
યદ્રાત્ર્યા કુરુતે પાપં તદ્રાત્ર્યા પ્રતિમુચ્યતે ॥ ૬૯॥

સર્વવર્ણે મહાદેવિ સન્ધ્યાવિદ્યે સરસ્વતિ ।
અજરે અમરે દેવિ સર્વદેવિ નમોઽસ્તુ તે ॥ ૭૦॥

તેજોઽસીત્યાદિમન્ત્રેણ દેવીમાવાહયેત્તતઃ ।
યત્કૃતં ત્વદનુષ્ઠાનં તત્સર્વં પૂર્ણમસ્તુ મે ॥ ૭૧॥

તતઃ શાપવિમોક્ષાય વિધાનં સમ્યગાચરેત્ ।
બ્રહ્મશાપસ્તતો વિશ્વામિત્રસ્ય ચ તથૈવ ચ ॥ ૭૨॥

વસિષ્ઠશાપ ઇત્યેતત્ત્રિવિધં શાપલક્ષણમ્ ।
બ્રહ્મણઃ સ્મરણેનૈવ બ્રહ્મશાપો નિવર્તતે ॥ ૭૩॥

વિશ્વામિત્રસ્મરણતો વિશ્વામિત્રસ્ય શાપતઃ ।
વસિષ્ઠસ્મરણાદેવ તસ્ય શાપો વિનશ્યતિ ॥ ૭૪॥

હૃત્પદ્મમધ્યે પુરુષં પ્રમાણં
સત્યાત્મકં સર્વજગત્સ્વરૂપમ્ ।

ધ્યાયામિ નિત્યં પરમાત્મસંજ્ઞં
ચિદ્રૂપમેકં વચસામગમ્યમ્ ॥ ૭૫॥

અથ ન્યાસવિધિં વક્ષ્યે સન્ધ્યાયા અઙ્ગસમ્ભવમ્ ।
ઓઙ્કારં પૂર્વવદ્યોજ્યં તતો મન્ત્રાનુદીરયેત્ ॥ ૭૬॥

ભૂરિત્યુક્ત્વા ચ પાદાભ્યાં નમ ઇત્યેવ ચોચ્ચરેત્ ।
ભુવઃ પૂર્વં તુ જાનુભ્યાં સ્વઃ કટિભ્યાં નમો વદેત્ ॥ ૭૭॥

મહર્નાભ્યૈ જનશ્ચૈવ હૃદયાય તતસ્તપઃ ।
કણ્ઠાય ચ તતઃ સત્યં લલાટે પરિકીર્તયેત્ ॥ ૭૮॥

અઙ્ગુષ્ઠાભ્યાં તત્સવિતુસ્તર્જનીભ્યાં વરેણ્યકમ્ ।
ભર્ગો દેવસ્ય મધ્યાભ્યાં ધીમહીત્યેવ કીર્તયેત્ ॥ ૭૯॥

અનામાભ્યાં કનિષ્ઠાભ્યાં ધિયો યો નઃ પદં વદેત્ ।
પ્રચોદયાત્કરપૃષ્ઠતલયોર્વિન્યસેત્સુધીઃ ॥ ૮૦॥

બ્રહ્માત્મને તત્સવિતુર્હૃદયાય નમસ્તથા ।
વિષ્ણ્વાત્મને વરેણ્યં ચ શિરસે નમ ઇત્યપિ ॥ ૮૧॥

ભર્ગો દેવસ્થ રુદ્રાત્મને શિખાયૈ પ્રકીર્તિતમ્ ।
શક્ત્યાત્મને ધીમહીતિ કવચાય તતઃ પરમ્ ॥ ૮૨॥

કાલાત્મને ધિયો યો નો નેત્રત્રય ઉદીરિતમ્ ।
પ્રચોદયાચ્ચ સર્વાત્મનેઽસ્ત્રાય પરિકીર્તિતમ્ ॥ ૮૩॥

અક્ષરન્યાસમેવાગ્રે કથયામિ મહામુને ।
ગાયત્રીવર્ણસમ્ભૂતન્યાસઃ પાપહરઃ પરઃ ॥ ૮૪॥

પ્રણવં પૂર્વમુચ્ચાર્ય વર્ણન્યાસઃ પ્રકીર્તિતઃ ।
તત્કારમાદાવુચ્ચાર્ય પાદાઙ્ગુષ્ઠદ્વયે ન્યસેત્ ॥ ૮૫॥

સકારં ગુલ્ફયોસ્તદ્વદ્વિકારં જઙ્ઘયોર્ન્યસેત્ ।
જાન્વોસ્તુકારં વિન્યસ્ય ઊર્વોશ્ચૈવ વકારકમ્ ॥ ૮૬॥

રેકારં ચ ગુદે ન્યસ્ય ણિકારં લિઙ્ગ એવ ચ ।
કટ્યાં યકારમેવાત્ર ભકારં નાભિમણ્ડલે ॥ ૮૭॥

ગોકારં હૃદયે ન્યસ્ય દેકારં સ્તનયોર્દ્વયોઃ ।
વકારં હૃદિ વિન્યસ્ય સ્યકારં કણ્ઠકૂપકે ॥ ૮૮॥

ધીકારં મુખદેશે તુ મકારં તાલુદેશકે ।
હિકારં નાસિકાગ્રે તુ ધિકારં નેત્રમણ્ડલે ॥ ૮૯॥

ભ્રૂમધ્યે ચૈવ યોકારં યોકારં ચ લલાટકે ।
નકારં વૈ પૂર્વમુખે પ્રકારં દક્ષિણે મુખે ॥ ૯૦॥

ચોકારં પશ્ચિમમુખે દકારં ચોત્તરે મુખે ।
યાકારં મૂર્ધ્નિ વિન્યસ્ય તકારં વ્યાપકં ન્યસેત્ ॥ ૯૧॥

એતન્ન્યાસવિધિં કેચિન્નેચ્છન્તિ જપતત્પરાઃ ।
તતો ધ્યાયેન્મહાદેવીં જગન્માતરમમ્બિકામ્ ॥ ૯૨॥

ભાસ્વજ્જપાપ્રસૂનાભાં કુમારીં પરમેશ્વરીમ્ ।
રક્તામ્બુજાસનારૂઢાં રક્તગન્ધાનુલેપનામ્ ॥ ૯૩॥

રક્તમાલ્યામ્બરધરાં ચતુરાસ્યાં ચતુર્ભુજામ્ ।
દ્વિનેત્રાં સ્રુક્સ્રુવો માલાં કુણ્ડિકાં ચૈવ બિભ્રતીમ્ ॥ ૯૪॥

સર્વાભરણસન્દીપ્તામૃગ્વેદાધ્યાયિનીં પરામ્ ।
હંસપત્રામાહવનીયમધ્યસ્થાં બ્રહ્મદેવતામ્ ॥ ૯૫॥

ચતુષ્પદામષ્ટકુક્ષિં સપ્તશીર્ષાં મહેશ્વરીમ્ ।
અગ્નિવક્ત્રાં રુદ્રશિખાં વિષ્ણુચિત્તાં તુ ભાવયેત્ ॥ ૯૬॥

બ્રહ્મા તુ કવચં યસ્યા ગોત્રં સાઙ્ખ્યાયનં સ્મૃતમ્ ।
આદિત્યમણ્ડલાન્તઃસ્થાં ધ્યાયેદ્દેવીં મહેશ્વરીમ્ ॥ ૯૭॥

એવં ધ્યાત્વા વિધાનેન ગાયત્રીં વેદમાતરમ્ ।
તતો મુદ્રાઃ પ્રકુર્વીત દેવ્યાઃ પ્રીતિકરાઃ શુભાઃ ॥ ૯૮॥

સુમુખં સપુટં ચૈવ વિતતં વિસ્તૃતં તથા ।
દ્વિમુખં ત્રિમુખં ચૈવ ચતુષ્કં પઞ્ચકં તથા ॥ ૯૯॥

ષણ્મુખાધોમુખં ચૈવ વ્યાપકાઞ્જલિકં તથા ।
શકટં યમપાશં ચ ગ્રથિતં સન્મુખોન્મુખમ્ ॥ ૧૦૦॥

વિલમ્બં મુષ્ટિકં ચૈવ મત્સ્યં કૂર્મં વરાહકમ્ ।
સિંહાક્રાન્તં મહાક્રાન્તં મુદ્ગરં પલ્લવં તથા ॥ ૧૦૧॥

ચતુર્વિંશતિમુદ્રાશ્ચ ગાયત્ર્યાઃ સમ્પ્રદર્શયેત્ ।

શતાક્ષરાં ચ ગાયત્રીં સકૃદાવર્તયેત્સુધીઃ ॥ ૧૦૨॥

ચતુર્વિંશત્યક્ષરાણિ ગાયત્ર્યા કીર્તિતાનિ હિ ।
જાતવેદસનામ્નીં ચ ઋચમુચ્ચારયેત્તતઃ ॥ ૧૦૩॥

ત્ર્યમ્બકસ્યર્ચમાવૃત્ય ગાયત્રી શતવર્ણકા ।
ભવતીયં મહાપુણ્યા સકૃજ્જપ્યા બુધૈરિયમ્ ॥ ૧૦૪॥

ઓઙ્કારં પૂર્વમુચ્ચાર્ય ભૂર્ભુવઃ સ્વસ્તથૈવ ચ ।
ચતુર્વિંશત્યક્ષરાં ચ ગાયત્રીં પ્રોચ્ચરેત્તતઃ ॥ ૧૦૫॥

એવં નિત્યં જપં કુર્યાદ્બ્રાહ્મણો વિપ્રપુઙ્ગવઃ ।
સ સમગ્રં ફલં પ્રાપ્ય સન્ધ્યાયાઃ સુખમેધતે ॥ ૧૦૬॥

ઇતિ શ્રીમદ્દેવીભાગવતે મહાપુરાણેઽષ્ટાદશસાહસ્ર્યાં
સંહિતાયામેકાદશસ્કન્ધે
સન્ધ્યોપાસનનિરૂપણં નામ ષોડશોઽધ્યાયઃ ॥ ૧૧.૧૬॥

## ૧૧.૧૭ સપ્તદશોઽધ્યાયઃ । સન્ધ્યાદિકૃત્યવર્ણનમ્ ।

શ્રીનારાયણ ઉવાચ ।
ભિન્નપાદા તુ ગાયત્રી બ્રહ્મહત્યાપ્રણાશિની ।
અભિન્નપાદા ગાયત્રી બ્રહ્મહત્યાં પ્રયચ્છતિ ॥ ૧॥

અચ્છિન્નપાદાગાયત્રીજપં કુર્વન્તિ યે દ્વિજાઃ ।
અધોમુખાશ્ચ તિષ્ઠન્તિ કલ્પકોટિશતાનિ ચ ॥ ૨॥

સમ્પુટૈકા ષડોઙ્કારા ગાયત્રી વિવિધા મતા ।
ધર્મશાસ્ત્રપુરાણેષુ ઇતિહાસેષુ સુવ્રત ॥ ૩॥

પઞ્ચપ્રણવસંયુક્તાં જપેદિત્યનુશાસનમ્ ।
જપસઙ્ખ્યાષ્ટભાગાન્તે પાદો જપ્યસ્તુરીયકઃ ॥ ૪॥

સ દ્વિજઃ પરમો જ્ઞેયઃ પરં સાયુજ્યમાપ્નુયાત્ ।
અન્યથા પ્રજપેદ્યસ્તુ સ જપો વિફલો ભવેત્ ॥ ૫॥

સમ્પુટૈકા ષડોઙ્કારા ભવેત્સા ઊર્ધ્વરેતસામ્ ।
ગૃહસ્થો બ્રહ્મચારી વા મોક્ષાર્થી તુરીયાં જપેત્ ॥ ૬॥

તુરીયપાદો ગાયત્ર્યાઃ પરોરજસે સાવદોમ્ ।

ધ્યાનમસ્ય પ્રવક્ષ્યામિ જપસાઙ્ગફલપ્રદમ્ ॥ ૭॥

હૃદિ વિકસિતપદ્મં સાર્કસોમાગ્નિબિમ્બં
પ્રણવમયમચિન્ત્યં યસ્ય પીતં પ્રકલ્પ્યમ્ ।
અચલપરમસૂક્ષ્મં જ્યોતિરાકાશસારં
ભવતુ મમ મુદેઽસૌ સચ્ચિદાનન્દરૂપઃ ॥ ૮॥

ત્રિશૂલયોની સુરભિમક્ષમાલાં ચ લિઙ્ગકમ્ ।
અમ્બુજં ચ મહામુદ્રામિતિ સપ્ત પ્રદર્શયેત્ ॥ ૯॥

યા સન્ધ્યા સૈવ ગાયત્રી સચ્ચિદાનન્દરૂપિણી ।
ભક્ત્યા તાં બ્રાહ્મણો નિત્યં પૂજયેચ્ચ નમેત્તતઃ ॥ ૧૦॥

ધ્યાતસ્ય પૂજાં કુર્વીત પઞ્ચભિશ્ચોપચારકૈઃ ।
લં પૃથિવ્યાત્મને ગન્ધમર્પયામિ નમો નમઃ ॥ ૧૧॥

હમાકાશાત્મને પુષ્પં ચાર્પયામિ નમો નમઃ ।
યં ચ વાય્વાત્મને ધૂપં ચાર્પયામિ તતો વદેત્ ॥ ૧૨॥

રં ચ વહ્ન્યાત્મને દીપમર્પયામિ તતો વદેત્ ।
વમમૃતાત્મને તસ્મૈ નૈવેદ્યમપિ ચાર્પયેત્ ॥ ૧૩॥

યં રં લં વં હમિતિ ચ પુષ્પાઞ્જલિમથાર્પયેત્ ।
એવં પૂજાં વિધાયાથ ચાન્તે મુદ્રાઃ પ્રદર્શયેત્ ॥ ૧૪॥

ધ્યાયેત્તુ મનસા દેવીં મન્ત્રમુચ્ચારયેચ્છનૈઃ ।
ન કમ્પયેચ્છિરો ગ્રીવા દન્તાન્નૈવ પ્રકાશયેત્ ॥ ૧૫॥

વિધિનાષ્ટોત્તરશતમષ્ટાવિંશતિરેવ વા ।
દશવારમશક્તો વા નાતો ન્યૂનં કદાચન ॥ ૧૬॥

તત ઉદ્વાસયેદ્દેવીમુત્તમેત્યનુવાકતઃ ।
ન ગાયત્રીં જપેદ્વિદ્વાઞ્જલમધ્યે કથઞ્ચન ॥ ૧૭॥

યતઃ સાગ્નિમુખી પ્રોક્તેત્યાહુઃ કેચિન્મહર્ષયઃ ।
સુરભિર્જ્ઞાનશૂર્પં ચ કૂર્મો યોનિશ્ચ પઙ્કજમ્ ॥ ૧૮॥

લિઙ્ગં નિર્વાણકં ચૈવ જપાન્તેઽષ્ટૌ પ્રદર્શયેત્ ।
યદક્ષરપદભ્રષ્ટં સ્વરવ્યઞ્જનવર્જિતમ્ ॥ ૧૯॥

તત્સર્વં ક્ષમ્યતાં દેવિ કશ્યપપ્રિયવાદિનિ ।

ગાયત્રીતર્પણં ચાતઃ કરણીયં મહામુને ॥ ૨૦॥

ગાયત્રી છન્દ આખ્યાતં વિશ્વામિત્રઋષિઃ સ્મૃતઃ ।
સવિતા દેવતા પ્રોક્તા વિનિયોગશ્ચ તર્પણે ॥ ૨૧॥

ભૂરિત્યુક્ત્વા ચ ઋગ્વેદપુરુષં તર્પયામિ ચ ।
ભુવ ઇત્યેતદુક્ત્વા ચ યજુર્વેદમથો વદેત્ ॥ ૨૨॥

સ્વર્વ્યાહૃતિં સમુક્ત્વા ચ સામવેદં સમુચ્ચરેત્ ।
મહ ઇત્યેતદુક્ત્વાન્તેઽથર્વવેદં ચ તર્પયેત્ ॥ ૨૩॥

જનઃ પદાન્ત ઇતિહાસપુરાણમિતીરયેત્ ।
તપઃ સર્વાગમં ચૈવ પુરુષં તર્પયામિ ચ ॥ ૨૪॥

સત્યં ચ સત્યલોકાખ્યપુરુષં તર્પયામિ ચ ।
ૐ ભૂર્ભૂર્લોકપુરુષં તર્પયામિ તતો વદેત્ ॥ ૨૫॥

ભુવશ્ચેતિ ભુવર્લોકપુરુષં તર્પયામિ ચ ।
સ્વઃ સ્વર્ગલોકપુરુષં તર્પયામિ તતઃ પરમ્ ॥ ૨૬॥

ઓમ્ભૂરેકપદા નામ ગાયત્રીં તર્પયામિ ચ ।
ભુવો દ્વિપદાં ગાયત્રીં તર્પયામીતિ કીર્તયેત્ ॥ ૨૭॥

સ્વશ્ચ ત્રિપદાં ગાયત્રીં તર્પયામિ તતો વદેત્ ।
ઓમ્ભૂર્ભુવઃ સ્વશ્ચેતિ તથા ગાયત્રીં ચ ચતુષ્પદામ્ ॥ ૨૮॥

ઉષસીં ચૈવ ગાયત્રીં સાવિત્રીં ચ સરસ્વતીમ્ ।
વેદાનાં માતરં પૃથ્વીમજાં ચૈવ તુ કૌશિકીમ્ ॥ ૨૯॥

સાઙ્કૃતિં વૈ સાર્વજિતિં ગાયત્રીં તર્પણે વદેત્ ।
તર્પણાન્તે ચ શાન્ત્યર્થં જાતવેદસમીરયેત્ ॥ ૩૦॥

માનસ્તોકેતિ મન્ત્રં ચ શાન્ત્યર્થં પ્રજપેત્સુધીઃ ।
તતોઽપિ ત્ર્યમ્બકો મન્ત્રઃ શાન્ત્યર્થઃ પરિકીર્તિતઃ ॥ ૩૧॥

તચ્છંયોરિતિ મન્ત્રં ચ જપેચ્છાન્ત્યર્થમેવ તુ ।
અતો દેવા ઇતિ દ્વાભ્યાં સર્વાઙ્ગસ્પર્શનં ચરેત્ ॥ ૩૨॥

સ્યોનાપૃથિવિમન્ત્રેણ ભૂમ્યૈ કુર્યાત્પ્રણામકમ્ ।
યથાવિધિ ચ ગોત્રાદીનુચ્ચરેદ્દ્વિજસત્તમઃ ॥ ૩૩॥

એવં વિધાનં સન્ધ્યાયાઃ પ્રાતઃકાલે પ્રકીર્તિતમ્ ।
સન્ધ્યાકર્મ સમાપ્યાન્તેઽપ્યગ્નિહોત્રં સ્વયં હુનેત્ ॥ ૩૪॥

પઞ્ચાયતનપૂજાં ચ તતઃ કુર્યાત્સમાહિતઃ ।
શિવાં શિવં ગણપતિં સૂર્યં વિષ્ણું તથાર્ચયેત્ ॥ ૩૫॥

પૌરુષેણ તુ સૂક્તેન વ્યાહૃત્યા વા સમાહિતઃ ।
મૂલમન્ત્રેણ વા કુર્યાદ્વ્રીશ્ચ તે ઇતિ મન્ત્રતઃ ॥ ૩૬॥

ભવાનીં તુ યજેન્મધ્યે તથૈશાન્યાં તુ માધવમ્ ।
આગ્નેય્યાં ગિરિજાનાથં ગણેશં રક્ષસાં દિશિ ॥ ૩૭॥

વાયવ્યામર્ચયેત્સૂર્યમિતિ દેવસ્થિતિક્રમઃ ।
ષોડશાનુપચારાંશ્ચ ષોડશર્ગ્ભિર્હરેન્નરઃ ॥ ૩૮॥

દેવીમભ્યર્ચ્ય પુરતો યજેદન્યાનનુક્રમાત્ ।
ન દેવીપૂજનાત્પુણ્યમધિકં ક્વચિદીક્ષ્યતે ॥ ૩૯॥

અત એવ તુ સન્ધ્યાસુ સન્ધ્યોપાસ્તિઃ શ્રુતીરિતા ।
નાક્ષતૈરર્ચયેદ્વિષ્ણું ન તુલસ્યા ગણેશ્વરમ્ ॥ ૪૦॥

દૂર્વાભિર્નાર્ચયેદ્દુર્ગાં કેતકૈર્ન મહેશ્વરમ્ ।
મલ્લિકાજાતિકુસુમં કુટજં પનસં તથા ॥ ૪૧॥

કિંશુકં બકુલં કુન્દં લોધ્રં તુ કરવીરકમ્ ।
શિંશપાઽપરાજિતાપુષ્પં બબ્ધૂકાગસ્ત્યપુષ્પકે ॥ ૪૨॥

મદન્તં સિન્દુવારં ચ પાલાશકુસુમં તથા ।
દૂર્વાઙ્કુરં બિલ્વદલં કુશમઞ્જરિકાં તથા ॥ ૪૩॥

શલ્લકીમાધવીપુષ્પમર્કમન્દારપુષ્પકમ્ ।
કેતકીં કર્ણિકારં ચ કદમ્બકુસુમં તથા ॥ ૪૪॥

પુન્નાગશ્ચમ્પકસ્તદ્વદ્યૂથિકાતગરૌ તથા ।
એવમાદીનિ પુષ્પાણિ દેવીપ્રિયકરાણિ ચ ॥ ૪૫॥

ગુગ્ગુલસ્ય ભવેદ્ધૂપો દીપઃ સ્યાત્તિલતૈલતઃ ।
કૃત્વેત્થં દેવતાપૂજાં તતો મૂલમનું જપેત્ ॥ ૪૬॥

એવં પૂજાં સમાપ્યૈવ વેદાભ્યાસં ચરેદ્બુધઃ ।
તતઃ સ્વવૃત્ત્યા કુર્વીત પોષ્યવર્ગાર્થસાધનમ્ ।

તૃતીયદિનભાગે તુ નિયમેન વિચક્ષણઃ ॥ ૪૭॥

ઇતિ શ્રીમદ્દેવીભાગવતે મહાપુરાણેઽષ્ટાદશસાહસ્ર્યાં
સંહિતાયામેકાદશસ્કન્ધે
સન્ધ્યાદિકૃત્યવર્ણનં નામ સપ્તદશોઽધ્યાયઃ ॥ ૧૧.૧૭॥

## ૧૧.૧૮ અષ્ટાદશોઽધ્યાયઃ । બૃહદ્રથકથાનકમ્ ।

નારદ ઉવાચ ।
પૂજાવિશેષં શ્રીદેવ્યાઃ શ્રોતુમિચ્છામિ માનદ ।
યેનાશ્રિતેન મનુજઃ કૃતકૃત્યત્વમાવહેત્ ॥ ૧॥

શ્રીનારાયણ ઉવાચ ।
દેવર્ષે શ‍ૃણુ વક્ષ્યામિ શ્રીમત્સુ પૂજનક્રમમ્ ।
ભુક્તિમુક્તિપ્રદં સાક્ષાત્સમસ્તાપન્નિવારણમ્ ॥ ૨॥

આચમ્ય મૌની સઙ્કલ્પ્ય ભૂતશુદ્ધ્યાદિકં ચરેત્ ।
માતૃકાન્યાસપૂર્વં તુ ષડઙ્ગન્યાસમાચરેત્ ॥ ૩॥

શઙ્ખસ્ય સ્થાપનં કૃત્વા સામાન્યાર્ઘ્યં વિધાય ચ ।
પૂજાદ્રવ્યાણિ ચાસ્ત્રેણ પ્રોક્ષયેન્મતિમાન્નરઃ ॥ ૪॥

ગુરોરનુજ્ઞામાદાય તતઃ પૂજાં સમારભેત્ ।
પીઠપૂજાં પુરા કૃત્વા દેવીં ધ્યાયેત્તતઃ પરમ્ ॥ ૫॥

આસનાદ્યુપચારૈશ્ચ ભક્તિપ્રેમયુતઃ સદા ।
સ્નાપયેત્પરદેવીં તાં પઞ્ચામૃતરસાદિભિઃ ॥ ૬॥

પૌણ્ડ્રેક્ષુરસપૂર્ણૈસ્તુ કલશૈઃ શતસઙ્ખ્યકૈઃ ।
સ્નાપયેદ્યો મહેશાનીં ન સ ભૂયોઽભિજાયતે ॥ ૭॥

યશ્ચ ચૂતરસૈરેવં સ્નાપયેજ્જગદમ્બિકામ્ ।
વેદપારાયણં કૃત્વા રસેનેક્ષૂદ્ભવેન વા ॥ ૮॥

તદ્ગેહં ન ત્યજેન્નિત્યં રમા ચૈવ સરસ્વતી ।
યસ્તુ દ્રાક્ષારસેનૈવ વેદપારાયણં ચરન્ ॥ ૯॥

અભિષિઞ્ચેન્મહેશાનીં સકુટુમ્બો નરોત્તમઃ ।
રસરેણુપ્રમાણં ચ દેવીલોકે મહીયતે ॥ ૧૦॥

કર્પૂરાગુરુકાશ્મીરકસ્તૂરીપઙ્કપઙ્કિલૈઃ ।
સલિલૈઃ સ્નાપયેદ્દેવીં વેદપારાયણં ચરન્ ॥ ૧૧॥

ભસ્મીભવન્તિ પાપાનિ શતજન્માર્જિતાનિ ચ ।
યો દુગ્ધકલશૈર્દેવીં સ્તાપયેદ્વેદપાઠતઃ ॥ ૧૨॥

આકલ્પં સ વસેન્નિત્યં તસ્મિન્ વૈ ક્ષીરસાગરે ।
યસ્તુ દધ્નાભિષિઞ્ચેત્તાં દધિકુલ્યાપતિર્ભવેત્ ॥ ૧૩॥

મધુના ચ ધૃતેનૈવ તથા શર્કરયાપિ ચ ।
સ્નાપયેન્મધુકુલ્યાદિનદીનાં સ પતિર્ભવેત્ ॥ ૧૪॥

સહસ્રકલશૈર્દેવીં સ્નાપયન્ભક્તિતત્પરઃ ।
ઇહ લોકે સુખી ભૂત્વાપ્યન્યલોકે સુખી ભવેત્ ॥ ૧૫॥

ક્ષૌમં વસ્ત્રદ્વયં દત્ત્વા વાયુલોકં સ ગચ્છતિ ।
રત્નનિર્મિતભૂષાણાં દાતા નિધિપતિર્ભવેત્ ॥ ૧૬॥

કાશ્મીરચન્દનં દત્ત્વા કસ્તૂરીબિન્દુભૂષિતમ્ ।
તથા સીમન્તસિન્દૂરં ચરણેઽલક્તપત્રકમ્ ॥ ૧૭॥

ઇન્દ્રાસને સમારૂઢો ભવેદ્દેવપતિઃ પરઃ ।
પુષ્પાણિ વિવિધાન્યાહુઃ પૂજાકર્મણિ સાધવઃ ॥ ૧૮॥

તાનિ દત્ત્વા યથાલાભં કૈલાસં લભતે સ્વયમ્ ।
બિલ્વપત્રાણ્યમોઘાનિ યો દદ્યાત્પરશક્તયે ॥ ૧૯॥

તસ્ય દુઃખં કદાચિચ્ચ ક્વચિચ્ચ ન ભવિષ્યતિ ।
બિલ્વપત્રત્રયે રક્તાચન્દનેન તુ સંલ્લિખેત્ ॥ ૨૦॥

માયાબીજત્રયં યત્નાત્સુસ્ફુટં ચાતિસુન્દરમ્ ।
માયાબીજાદિકં નામ ચતુર્થ્યન્તં સમુચ્ચરેત્ ॥ ૨૧॥

નમોઽન્તં પરયા ભક્ત્યા દેવીચરણપઙ્કજે ।
સમર્પયેન્મહાદેવ્યૈ કોમલં તચ્ચ પત્રકમ્ ॥ ૨૨॥

ય એવં કુરુતે ભક્ત્યા મનુત્વં લભતે હિ સઃ ।
યસ્તુ કોટિદલૈરેવં કોમલૈરતિનિર્મલૈઃ ॥ ૨૩॥

પૂજયેદ્ભુવનેશાનીં બ્રહ્માણ્ડાધિપતિર્ભવેત્ ।
કુન્દપુષ્પૈર્નવીનૈસ્તુ લુલિતૈરષ્ટગન્ધતઃ ॥ ૨૪॥

કોટિસઙ્ખ્યૈઃ પૂજયેત્તુ પ્રાજાપત્યં લભેદ્ધ્રુવમ્ ।
મલ્લિકામાલતીપુષ્પૈરષ્ટગન્ધેન લોલિતૈઃ ॥ ૨૫॥

કોટિસઙ્ખ્યૈઃ પૂજયા તુ જાયતે સ ચતુર્મુખઃ ।
દશકોટિભિરપ્યેવં તૈરેવ કુસુમૈર્મુને ॥ ૨૬॥

વિષ્ણુત્વં લભતે મર્ત્યો યત્સુરેષ્વપિ દુર્લભમ્ ।
વિષ્ણુનૈતદ્વ્રતં પૂર્વં કૃતં સ્વપદલબ્ધયે ॥ ૨૭॥

શતકોટિભિરપ્યેવં સૂત્રાત્મત્વં વ્રજેદ્ધ્રુવમ્ ।
વ્રતમેતત્પુરા સમ્યક્કૃતં ભક્ત્યા પ્રયત્નતઃ ॥ ૨૮॥

તેન વ્રતપ્રભાવેણ હિરણ્યોદરતાં વ્રજેત્ ।
જપાકુસુમપુષ્પસ્ય બન્ધૂકકુસુમસ્ય ચ ॥ ૨૯॥

દાડિમીકુસુમસ્યાપિ વિધિરેષ ઉદીરિતઃ ।
એવમન્યાનિ પુષ્પાણિ શ્રીદેવ્યૈ વિધિનાર્પયેત્ ॥ ૩૦॥

તસ્ય પુણ્યફલસ્યાન્તં ન જાનાતીશ્વરોઽપિ સઃ ।
તત્તદૃતૂદ્ભવૈઃ પુષ્પૈર્નામસાહસ્રસઙ્ખ્યયા ॥ ૩૧॥

સમર્પયેન્મહાદેવ્યૈ પ્રતિવર્ષમતન્દ્રિતઃ ।
ય એવં કુરુતે ભક્ત્યા મહાપાતકસંયુતઃ ॥ ૩૨॥

ઉપપાતકયુક્તોઽપિ મુચ્યતે સર્વપાતકૈઃ ।
દેહાન્તે શ્રીપદામ્ભોજં દુર્લભં દેવસત્તમૈઃ ॥ ૩૩॥

પ્રાપ્નોતિ સાધકવરો મુને નાસ્ત્યત્ર સંશયઃ ।
કૃષ્ણાગુરું સકર્પૂરં ચન્દનેન સમન્વિતમ્ ॥ ૩૪॥

સિલ્હકં ચાજ્યસંયુક્તં ગુગ્ગુલેન સમન્વિતમ્ ।
ધૂપં દદ્યાન્મહાદેવ્યૈ યેન સ્યાદ્ધૂપિતં ગૃહમ્ ॥ ૩૫॥

તેન પ્રસન્ના દેવેશી દદાતિ ભુવનત્રયમ્ ।
દીપં કર્પૂરખણ્ડૈશ્ચ દદ્યાદ્દેવ્યૈ નિરન્તરમ્ ॥ ૩૬॥

સૂર્યલોકમવાપ્નોતિ નાત્ર કાર્યા વિચારણા ।
શતદીપાંસ્તથા દદ્યાત્સહસ્રાન્વા સમાહિતઃ ॥ ૩૭॥

નૈવેદ્યં પુરતો દેવ્યાઃ સ્થાપયેત્પર્વતાકૃતિમ્ ।

લેહ્યૈશ્ચોષ્યૈસ્તથા પેયૈઃ ષડ્રસૈસ્તુ સમાહિતૈઃ ॥ ૩૮॥

નાનાફલાનિ દિવ્યાનિ સ્વાદૂનિ રસવન્તિ ચ ।
સ્વર્ણપાત્રસ્થિતાન્નાનિ દદ્યાદ્દેવ્યૈ નિરન્તરમ્ ॥ ૩૯॥

તૃપ્તાયાં શ્રીમહાદેવ્યાં ભવેત્તૃપ્તં જગત્ત્રયમ્ ।
યતસ્તદાત્મકં સર્વં રજ્જૌ સર્પો યથા તથા ॥ ૪૦॥

તતઃ પાનીયકં દદ્યાચ્છુભં ગઙ્ગાજલં મહત્ ।
કર્પૂરવાલાસંયુક્તં શીતલં કલશસ્થિતમ્ ॥ ૪૧॥

તામ્બૂલં ચ તતો દેવ્યૈ કર્પૂરશકલાન્વિતમ્ ।
એલાલવઙ્ગસંયુક્તં મુખસૌગન્ધ્યદાયકમ્ ॥ ૪૨॥

દદ્યાદ્દેવ્યૈ મહાભક્ત્યા યેન દેવી પ્રસીદતિ ।
મૃદઙ્ગવીણામુરજઢક્કાદુન્દુભિનિઃસ્વનૈઃ ॥ ૪૩॥

તોષયેજ્જગતાં ધાત્રીં ગાયનૈરતિમોહનૈઃ ।
વેદપારાયણૈઃ સ્તોત્રૈઃ પુરાણાદિભિરપ્યુત ॥ ૪૪॥

છત્રં ચ ચામરે દ્વે ચ દદ્યાદ્દેવ્યૈ સમાહિતઃ ।
રાજોપચારાન્ શ્રીદેવ્યૈ નિત્યમેવ સમર્પયેત્ ॥ ૪૫॥

પ્રદક્ષિણાં નમસ્કારં કુર્યાદ્દેવ્યા અનેકધા ।
ક્ષમાપયેજ્જગદ્ધાત્રીં જગદમ્બાં મુહુર્મુહુઃ ॥ ૪૬॥

સકૃત્સ્મરણમાત્રેણ યત્ર દેવી પ્રસીદતિ ।
એતાદૃશોપચારૈશ્ચ પ્રસીદેદત્ર કઃ સ્મયઃ ॥ ૪૭॥

સ્વભાવતો ભવેન્માતા પુત્રેઽતિકરુણાવતી ।
તેન ભક્તૌ કૃતાયાં તુ વક્તવ્યં કિં તતઃ પરમ્ ॥ ૪૮॥

અત્ર તે કથયિષ્યામિ પુરાવૃત્તં સનાતનમ્ ।
બૃહદ્રથસ્ય રાજર્ષેઃ પ્રિયં ભક્તિપ્રદાયકમ્ ॥ ૪૯॥

ચક્રવાકોઽભવત્પક્ષી ક્વચિદ્દેશે હિમાલયે ।
ભ્રમન્નાનાવિધાન્દેશાન્યયૌ કાશીપુરં પ્રતિ ॥ ૫૦॥

અન્નપૂર્ણામહાસ્થાને પ્રારબ્ધવશતો દ્વિજઃ ।
જગામ લીલયા તત્ર કણલોભાદનાથવત્ ॥ ૫૧॥

કૃત્વા પ્રદક્ષિણામેકાં જગામ સ વિહાયસા ।
દેશાન્તરં વિહાયૈવ પુરીં મુક્તિપ્રદાયિનીમ્ ॥ ૫૨॥

કાલાન્તરે મમારાસૌ ગતઃ સ્વર્ગપુરીં પ્રતિ ।
બુભુજે વિષયાન્સર્વાન્ દિવ્યરૂપધરો યુવા ॥ ૫૩॥

કલ્પદ્વયં તથા ભુક્ત્વા પુનઃ પ્રાપ ભુવં પ્રતિ ।
ક્ષત્રિયાણાં કુલે જન્મ પ્રાપ સર્વોત્તમોત્તમમ્ ॥ ૫૪॥

બૃહદ્રથેતિ નામ્નાભૂત્પ્રસિદ્ધઃ ક્ષિતિમણ્ડલે ।
મહાયજ્વા ધાર્મિકશ્ચ સત્યવાદી જિતેન્દ્રિયઃ ॥ ૫૫॥

ત્રિકાલજ્ઞઃ સાર્વભૌમો યમી પરપુરઞ્જયઃ ।
પૂર્વજન્મસ્મૃતિસ્તસ્ય વર્તતે દુર્લભા ભુવિ ॥ ૫૬॥

ઇતિ શ્રુત્વા કિંવદન્તીં મુનયઃ સમુપાગતાઃ ।
કૃતાતિથ્યા નૃપેન્દ્રેણ વિષ્ટરેષૂપુરેવ તે ॥ ૫૭॥

પપ્રચ્છુર્મુનયઃ સર્વે સંશયોઽસ્તિ મહાન્નૃપ ।
કેન પુણ્યપ્રભાવેણ પૂર્વજન્મસ્મૃતિસ્તવ ॥ ૫૮॥

ત્રિકાલજ્ઞાનમેવાપિ કેન પુણ્યપ્રભાવતઃ ।
જ્ઞાનં તવેતિ તજ્જ્ઞાતુમાગતાઃ સ્મ તવાન્તિકમ્ ॥ ૫૯॥

વદ નિર્વ્યાજયા વૃત્ત્યા તદસ્માકં યથાતથમ્ ।
શ્રીનારાયણ ઉવાચ ।
ઇતિ તેષાં વચઃ શ્રુત્વા રાજા પરમધાર્મિકઃ ॥ ૬૦॥

ઉવાચ સકલં બ્રહ્મન્ ત્રિકાલજ્ઞાનકારણમ્ ।
શ્રૂયતાં મુનયઃ સર્વે મમ જ્ઞાનસ્ય કારણમ્ ॥ ૬૧॥

ચક્રવાકઃ સ્થિતઃ પૂર્વં નીચયોનિગતોઽપિ વા ।
અજ્ઞાનતોઽપિ કૃતવાનન્નપૂર્ણાપ્રદક્ષિણામ્ ॥ ૬૨॥

તેન પુણ્યપ્રભાવેણ સ્વર્ગે કલ્પદ્વયસ્થિતિઃ ।
ત્રિકાલજ્ઞાનતાપ્યસ્મિન્નભૂજ્જન્મનિ સુવ્રતાઃ ॥ ૬૩॥

કો વેદ જગદમ્બાયાઃ પદસ્મૃતિફલં કિયત્ ।
સ્મૃત્વા તન્મહિમાનં તુ પતન્ત્યશ્રૂણિ મેઽનિશમ્ ॥ ૬૪॥

ધિગસ્તુ જન્મ તેષાં વૈ કૃતઘ્નાનાં તુ પાપિનામ્ ।

યે સર્વમાતરં દેવીં સ્વોપાસ્યાં ન ભજન્તિ હિ ॥ ૬૫॥

ન શિવોપાસના નિત્યા ન વિષ્ણૂપાસના તથા ।
નિત્યોપાસ્તિઃ પરા દેવ્યા નિત્યા શ્રુત્યૈવ ચોદિતા ॥ ૬૬॥

કિં મયા બહુ વક્તવ્યં સ્થાને સંશયવર્જિતે ।
સેવનીયં પદામ્ભોજં ભગવત્યા નિરન્તરમ્ ॥ ૬૭॥

નાતઃ પરતરં કિઞ્ચિદધિકં જગતીતલે ।
સેવનીયા પરા દેવી નિર્ગુણા સગુણાથવા ॥ ૬૮॥

શ્રીનારાયણ ઉવાચ ।
ઇતિ તસ્ય વચઃ શ્રુત્વા રાજર્ષેર્ધાર્મિકસ્ય ચ ।
પ્રસન્નહૃદયાઃ સર્વે ગતાઃ સ્વસ્વનિકેતનમ્ ॥ ૬૯॥

એવમ્પ્રભાવા સા દેવી તત્પૂજાયાઃ ફલં કિયત્ ।
અસ્તીતિ કેન પ્રષ્ટવ્યં વક્તવ્યં વા ન કેનચિત્ ॥ ૭૦॥

યેષાં તુ જન્મસાફલ્યં તેષાં શ્રદ્ધા તુ જાયતે ।
યેષાં તુ જન્મસાફુર્યં તેષાં શ્રદ્ધા ન જાયતે ॥ ૭૧॥

ઇતિ શ્રીમદ્દેવીભાગવતે મહાપુરાણેઽષ્ટાદશસાહસ્ર્યાં
સંહિતાયામેકાદશસ્કન્ધે દેવીમાહાત્મ્યે
બૃહદ્રથકથાનકં નામાષ્ટાદશોઽધ્યાયઃ ॥ ૧૧.૧૮॥

## ૧૧.૧૯ એકોનવિંશોઽધ્યાયઃ । મધ્યાહ્નસન્ધ્યાવર્ણનમ્ ।

શ્રીનારાયણ ઉવાચ ।
અથાતઃ શ્રૂયતાં બ્રહ્મન્ સન્ધ્યાં માધ્યાહ્નિકીં શુભામ્ ।
યદનુષ્ઠાનતોઽપૂર્વં જાયતેઽત્યુત્તમં ફલમ્ ॥ ૧॥

સાવિત્રીં યુવતીં શ્વેતવર્ણાં ચૈવ ત્રિલોચનામ્ ।
વરદાં ચાક્ષમાલાઢ્યાં ત્રિશૂલાભયહસ્તકામ્ ॥ ૨॥

વૃષારૂઢાં યજુર્વેદસંહિતાં રુદ્રદેવતામ્ ।
તમોગુણયુતાં ચૈવ ભુવર્લોકવ્યવસ્થિતામ્ ॥ ૩॥

આદિત્યમાર્ગસઞ્ચારકર્ત્રીં માયાં નમામ્યહમ્ ।
આદિદેવીમથ ધ્યાત્વાઽઽચમનાદિ ચ પૂર્વવત્ ॥ ૪॥

અથ ચાર્ઘ્યપ્રકરણં પુષ્પાણિ ચિનુયાત્તતઃ ।
તદલાભે બિલ્વપત્રં તોયેન મિશ્રયેત્તતઃ ॥ ૫॥

ઊર્ધ્વં ચ સૂર્યાભિમુખં ક્ષિપ્ત્વાર્ઘ્યં પ્રતિપાદયેત્ ।
પ્રાતઃસન્ધ્યાદિવત્સર્વમુપસંહારપૂર્વકમ્ ॥ ૬॥

મધ્યાહ્ને કેચિદિચ્છન્તિ સાવિત્રીં તુ તદિત્યૃચમ્ ।
અસમ્પ્રદાયં તત્કર્મ કાર્યહાનિસ્તુ જાયતે ॥ ૭॥

કારણં સન્ધ્યયોશ્ચાત્ર મન્દેહા નામ રાક્ષસાઃ ।
ભક્ષિતું સૂર્યમિચ્છન્તિ કારણં શ્રુતિચોદિતમ્ ॥ ૮॥

અતસ્તુ કારણાદ્વિપ્રઃ સન્ધ્યાં કુર્યાત્પ્રયત્નતઃ ।
સન્ધ્યયોરુભયોર્નિત્યં ગાયત્ર્યા પ્રણવેન ચ ॥ ૯॥

અમ્ભસ્તુ પ્રક્ષિપેત્તેન નાન્યથા શ્રુતિઘાતકઃ ।
આકૃષ્ણેનેતિ મન્ત્રેણ પુષ્પૈર્વામ્બુવિમિશ્રિતમ્ ॥ ૧૦॥

અલાભે બિલ્વદૂર્વાદિપત્રેણોક્તેન પૂર્વકમ્ ।
અર્ઘ્યં દદ્યાત્પ્રયત્નેન સાઙ્ગં સન્ધ્યાફલં લભેત્ ॥ ૧૧॥

અત્રૈવ તર્પણં વક્ષ્યે શૃણુ દેવર્ષિસત્તમ ।
ભુવઃ પુનઃ પૂરુષં તુ તર્પયામિ નમો નમઃ ॥ ૧૨॥

યજુર્વેદં તર્પયામિ મણ્ડલં તર્પયામિ ચ ।
હિરણ્યગર્ભં ચ તથાન્તરાત્માનં તથૈવ ચ ॥ ૧૩॥

સાવિત્રીં ચ તતો દેવમાતરં સાઙ્કૃતિં તથા ।
સન્ધ્યાં તથૈવ યુવતીં રુદ્રાણીં નીમૃજાં તથા ॥ ૧૪॥

સર્વાર્થાનાં સિદ્ધિકરીં સર્વમન્ત્રાર્થસિદ્ધિદામ્ ।
ભૂર્ભુવઃ સ્વઃ પૂરુષં તુ ઇતિ મધ્યાહ્નતર્પણમ્ ॥ ૧૫॥

ઉદુત્યમિતિ સૂક્તેન સૂર્યોપસ્થાનમેવ ચ ।
ચિત્રં દેવાનામિતિ ચ સૂર્યોપસ્થાનમાચરેત્ ॥ ૧૬॥

તતો જપં પ્રકુર્વીત મન્ત્રસાધનતત્પરઃ ।
જપસ્યાપિ પ્રકારં તુ વક્ષ્યામિ શૃણુ નારદ ॥ ૧૭॥

કૃત્વોત્તાનૌ કરૌ પ્રાતઃ સાયં ચાધઃ કરૌ તથા ।
મધ્યાહ્ને હૃદયસ્થૌ તુ કૃત્વા જપમુદીરયેત્ ॥ ૧૮॥

પર્વદ્વયમનામિકાયાઃ કનિષ્ઠાદિક્રમેણ તુ ।
તર્જનીમૂલપર્યન્તં કરમાલા પ્રકીર્તિતા ॥ ૧૯॥

ગોઘ્નઃ પિતૃઘ્નો માતૃઘ્નો ભ્રૂણહા ગુરુતલ્પગઃ ।
બ્રહ્મસ્વક્ષેત્રહારી ચ યશ્ચ વિપ્રઃ સુરાં પિબેત્ ॥ ૨૦॥

સ ગાયત્ર્યા સહસ્રેણ પૂતો ભવતિ માનવઃ ।
માનસં વાચિકં પાપં વિષયેન્દ્રિયસઙ્ગજમ્ ॥ ૨૧॥

તત્કિલ્બિષં નાશયતિ ત્રીણિ જન્માનિ માનવઃ ।
ગાયત્રીં યો ન જાનાતિ વૃથા તસ્ય પરિશ્રમઃ ॥ ૨૨॥

પઠેચ્ચ ચતુરો વેદાન્ ગાયત્રીં ચૈકતો જપેત્ ।
વેદાનાં ચાવૃતેસ્તદ્વદ્ગાયત્રીજપ ઉત્તમઃ ॥ ૨૩॥

ઇતિ મધ્યાહ્નસન્ધ્યાયાઃ પ્રકારઃ કીર્તિતો મયા ।
અતઃ પરં પ્રવક્ષ્યામિ બ્રહ્મયજ્ઞવિધિક્રમમ્ ॥ ૨૪॥

ઇતિ શ્રીમદ્દેવીભાગવતે મહાપુરાણેઽષ્ટાદશસાહસ્ર્યાં
સંહિતાયામેકાદશસ્કન્ધે
મધ્યાહ્નસન્ધ્યાવર્ણનં નામૈકોનવિંશોઽધ્યાયઃ ॥ ૧૧.૧૯॥

## ૧૧.૨૦ વિંશોઽધ્યાયઃ । બ્રહ્મયજ્ઞાદિકીર્તનમ્ ।

શ્રીનારાયણ ઉવાચ ।
ત્રિરાચમ્ય દ્વિજઃ પૂર્વં દ્વિર્માર્જનમથાચરેત્ ।
ઉપસ્પૃશેત્સવ્યપાણિં પાદૌ ચ પ્રોક્ષયેત્તતઃ ॥ ૧॥

શિરસિ ચક્ષુષિ તથા નાસાયાં શ્રોત્રદેશકે ।
હૃદયે ચ તથા મૌલૌ પ્રોક્ષણં સમ્યગાચરેત્ ॥ ૨॥

દેશકાલૌ સમુચ્ચાર્ય બ્રહ્મયજ્ઞમથાચરેત્ ।
દ્વૌ દર્ભૌ દક્ષિણે હસ્તે વામે ત્રીનાસને સકૃત્ ॥ ૩॥

ઉપવીતે શિખાયાં ચ પાદમૂલે સકૃત્સકૃત્ ।
વિમુક્તયે સર્વપાપક્ષયાર્થં ચૈવમેવ હિ ॥ ૪॥

સૂત્રોક્તદેવતાપ્રીત્યૈ બ્રહ્મયજ્ઞં કરોમ્યહમ્ ।

ગાયત્રીં ત્રિર્જપેત્પૂર્વં ચાગ્નિમીળે તતઃ પરમ્ ॥ ૫॥

યદઙ્ગેતિ તતઃ પ્રોચ્ય અગ્નિર્વૈ ઇતિ કીર્તયેત્ ।
અથ મહાવ્રતં ચૈવ પન્થા એતચ્ચ કીર્તયેત્ ॥ ૬॥

અથાતઃ સંહિતાયાશ્ચ વિદા મઘવદિત્યપિ ।
મહાવ્રતસ્યેતિ તથા ઇષે ત્વોર્જે ઇતીવ હિ ॥ ૭॥

અગ્ન આયાહિ ચેત્યેવં શન્તો દેવીરિતીતિ ચ ।
અથ તસ્ય સમામ્નાયો વૃદ્ધિરાદૈજિતીવ હિ ॥ ૮॥

અથ શિક્ષાં પ્રવક્ષ્યામિ પઞ્ચસંવત્સરેતિ ચ ।
મયરસતજભનેત્યેવ ગૌર્ગ્મા ઇત્યેવ કીર્તયેત્ ॥ ૯॥

અથાતો ધર્મજિજ્ઞાસા અથાતો બ્રહ્મ ઇત્યપિ ।
તચ્છંયોરિતિ ચ પ્રોચ્ય બ્રહ્મણે નમ ઇત્યપિ ॥ ૧૦॥

તર્પણં ચૈવ દેવાનાં તતઃ કુર્યાત્પ્રદક્ષિણમ્ ।
પ્રજાપતિશ્ચ બ્રહ્મા ચ વેદા દેવાસ્તથર્ષયઃ ॥ ૧૧॥

સર્વાણિ ચૈવ છન્દાંસિ તથોઙ્કારસ્તથૈવ ચ ।
વષટ્કારો વ્યાહૃતયઃ સાવિત્રી ચ તતઃ પરમ્ ॥ ૧૨॥

ગાયત્રી ચૈવ યજ્ઞાશ્ચ દ્યાવાપૃથિવી ઇત્યપિ ।
અન્તરિક્ષં ત્વહોરાત્રાણિ ચ સાઙ્ખ્યા અતઃ પરમ્ ॥ ૧૩॥

સિદ્ધાઃ સમુદ્રા નદ્યશ્ચ ગિરયશ્ચ તતઃ પરમ્ ।
ક્ષેત્રૌષધિવનસ્પત્યો ગન્ધર્વાપ્સરસસ્તથા ॥ ૧૪॥

નાગા વયાંસિ ગાવશ્ચ સાધ્યા વિપ્રાસ્તથૈવ ચ ।
યક્ષા રક્ષાંસિ ભૂતાનીત્યેવમન્તાનિ કીર્તયેત્ ॥ ૧૫॥

અથો નિવીતી ભૂત્વા ચ ઋષીન્સન્તર્પયેદપિ ।
શતર્ચિનો માધ્યમાશ્ચ ગૃત્સમદસ્તથૈવ ચ ॥ ૧૬॥

વિશ્વામિત્રો વામદેવોऽત્રિર્ભરદ્વાજ એવ ચ ।
વસિષ્ઠશ્ચ પ્રગાથશ્ચ પાવમાન્યસ્તતઃ પરમ્ ॥ ૧૭॥

ક્ષુદ્રસૂક્તા મહાસૂક્તાઃ સનકશ્ચ સનન્દનઃ ।
સનાતનસ્તથૈવાત્ર સનત્કુમાર એવ ચ ॥ ૧૮॥

કપિલાસુરિનામાનૌ વોહલિઃ પઞ્ચશીર્ષકઃ ।
પ્રાચીનાવીતિના તચ્ચ કર્તવ્યમથ તર્પણમ્ ॥ ૧૯॥

સુમન્તુર્જૈમિનિર્વૈશમ્પાયનઃ પૈલસૂત્રયુક્ ।
ભાષ્યભારતપૂર્વં ચ મહાભારત ઇત્યપિ ॥ ૨૦॥

ધર્માચાર્યા ઇમે સર્વે તૃપ્યન્ત્વિતિ ચ કીર્તયેત્ ।
જાનન્તિ બાહવિગાર્ગ્યગૌતમાશ્ચૈવ શાકલઃ ॥ ૨૧॥

બાભ્રવ્યમાણ્ડવ્યયુતોમાણ્ડૂકેયસ્તતઃ પરમ્ ।
ગાર્ગી વાચક્નવી ચૈવ વડવા પ્રાતિથેયિકા ॥ ૨૨॥

સુલભાયુક્તમૈત્રેયી કહોલશ્ચ તતઃ પરમ્ ।
કૌષીતકં મહાકૌષીતકં વૈ તર્પયેત્તતઃ ॥ ૨૩॥

ભારદ્વાજં ચ પૈઙ્ગ્યં ચ મહાપૈઙ્ગ્યં સુયજ્ઞકમ્ ।
સાઙ્ખ્યાયનમૈતરેયં મહૈતરેયમેવ ચ ॥ ૨૪॥

બાષ્કલં શાકલં ચૈવ સુજાતવક્ત્રમેવ ચ ।
ઔદવાહિં ચ સૌજામિં શૌનકં ચાશ્વલાયનમ્ ॥ ૨૫॥

યે ચાન્યે સર્વ આચાર્યાસ્તે સર્વે તૃપ્તિમાપ્નુયુઃ ।
યે કે ચાસ્મત્કુલે જાતા અપુત્રા ગોત્રિણો મૃતાઃ ॥ ૨૬॥

તે ગૃહ્ણન્તુ મયા દત્તં વસ્ત્રનિષ્પીડનોદકમ્ ।
એવં તે બ્રહ્મયજ્ઞસ્ય વિધિરુક્તો મહામુને ॥ ૨૭॥

યશ્ચાયં કુરુતે બ્રહ્મયજ્ઞસ્ય વિધિમુત્તમમ્ ।
સર્વવેદાઙ્ગપાઠસ્ય ફલમાપ્નોતિ સાધકઃ ॥ ૨૮॥

વૈશ્વદેવં તતઃ કુર્યાન્નિત્યશ્રાદ્ધં તથૈવ ચ ।
અતિથિભ્યોઽન્નદાનં ચ નિત્યમેવ સમાચરેત્ ॥ ૨૯॥

ગોગ્રાસં ચ તતો દત્ત્વા ભુઞ્જીત બ્રાહ્મણૈઃ સહ ।
અહ્નસ્તુ પઞ્ચમે ભાગે પ્રકુર્યાદિતદુત્તમમ્ ॥ ૩૦॥

ઇતિહાસપુરાણાદ્યૈઃ ષષ્ઠસપ્તમકૌ નયેત્ ।
અષ્ટમે લોકયાત્રા તુ બહિઃ સન્ધ્યાં તતઃ પુનઃ ॥ ૩૧॥

અથ સાયન્તનીં સન્ધ્યાં પ્રવક્ષ્યામિ મહામુને ।
યદનુષ્ઠાનમાત્રેણ મહામાયા પ્રસીદતિ ॥ ૩૨॥

આચમ્ય પ્રાણાનાયમ્ય સાધકઃ સ્થિરમાનસઃ ।
બદ્ધપદ્માસનો યોગી સાયઙ્કાલે સ્થિરો ભવેત્ ॥ ૩૩॥

શ્રુતિસ્મૃત્યાદિકર્માદૌ સગર્ભઃ પ્રાણસંયમઃ ।
અગર્ભો ધ્યાનમાત્રં તુ સ ચામન્ત્રઃ પ્રકીર્તિતઃ ॥ ૩૪॥

ભૂતશુદ્ધ્યાદિકં કૃત્વા નાન્યથા કર્મ કીર્તિતમ્ ।
સલક્ષો દેવતાં ધ્યાત્વા પૂરકુમ્ભકરેચકૈઃ ॥ ૩૫॥

ધ્યાનં પ્રકુર્યાત્સન્ધ્યાયાં સાયઙ્કાલે વિચક્ષણઃ ।
વૃદ્ધાં સરસ્વતીં દેવીં કૃષ્ણાઙ્ગીં કૃષ્ણવાસસમ્ ॥ ૩૬॥

શઙ્ખચક્રગદાપદ્મહસ્તાં ગરુડવાહનામ્ ।
નાનારત્નલસદ્ભૂષાં ક્વણન્મઞ્જીરમેખલામ્ ॥ ૩૭॥

અનર્ઘ્યરત્નમુકુટાં તારહારાવલીયુતામ્ ।
તાટઙ્કબદ્ધમાણિક્યકાન્તિશોભિકપોલકામ્ ॥ ૩૮॥

પીતામ્બરધરાં દેવીં સચ્ચિદાનન્દરૂપિણીમ્ ।
સામવેદેન સહિતાં સંયુતાં સત્ત્વવર્ત્મના ॥ ૩૯॥

વ્યવસ્થિતાં ચ સ્વર્લોકે આદિત્યપથગામિનીમ્ ।
આવાહયામ્યહં દેવીમાયાન્તીં સૂર્યમણ્ડલાત્ ॥ ૪૦॥

એવં ધ્યાત્વા ચ તાં દેવીં સન્ધ્યાસઙ્કલ્પમાચરેત્ ।
આપો હિ ષ્ઠેતિ મન્ત્રેણ અગ્નિશ્ચેતિ તથૈવ ચ ॥ ૪૧॥

વિદધ્યાદાચમનકં શેષં પૂર્વવદીરિતમ્ ।
ગાયત્રીમન્ત્રમુચ્ચાર્ય શ્રીનારાયણપ્રીતયે ॥ ૪૨॥

અર્ઘ્યં દદ્યાચ્ચ સૂર્યાય સાધકઃ શુદ્ધમાનસઃ ।
ઉભૌ પાદૌ સમૌ કૃત્વા હસ્તે ધૃત્વા જલાઞ્જલિમ્ ॥ ૪૩॥

દેવં ધ્યાત્વા મણ્ડલસ્થં ક્ષિપેદર્ઘ્યં તતઃ ક્રમાત્ ।
અર્ઘ્યં દદ્યાત્તુ યો નીરે મૂઢાત્મા જ્ઞાનવર્જિતઃ ॥ ૪૪॥

ઉલ્લઙ્ઘ્ય સ્મૃતિમન્ત્રાંશ્ચ પ્રાયશ્ચિત્તી ભવેદ્દ્વિજઃ ।
તતઃ સૂર્યમુપસ્થાયાપ્યસાવાદિત્યમન્ત્રતઃ ॥ ૪૫॥

ગાયત્ર્યાશ્ચ જપં કુર્યાદુપવિશ્ય તતો બૃસીમ્ ।

સહસ્રં વા તદર્ધં વા શ્રીદેવીધ્યાનપૂર્વકમ્ ॥ ૪૬॥

યથા પ્રાતઃ પુનસ્તદ્વદુપસ્થાનાદિકં ચરેત્ ।
સાયં સન્ધ્યાતર્પણે ચ ક્રમેણ પરિકીર્તયેત્ ॥ ૪૭॥

વસિષ્ઠો ઋષિરેવાત્ર સરસ્વત્યાઃ પ્રકીર્તિતઃ ।
દેવતા વિષ્ણુરૂપા સા છન્દશ્ચૈવ સરસ્વતી ॥ ૪૮॥

સાયઙ્કાલીનસન્ધ્યાયાસ્તર્પણે વિનિયોગકઃ ।
સ્વરિત્યુક્ત્વા ચ પુરુષં સામવેદં તથૈવ ચ ॥ ૪૯॥

મણ્ડલં ચેતિ સમ્પ્રોચ્ય હિરણ્યગર્ભકં તથા ।
તથૈવ પરમાત્માનં તતોઽપિ ચ સરસ્વતીમ્ ॥ ૫૦॥

વેદમાતરમેવાત્ર સઙ્કૃતિં તદ્વદેવ ચ ।
સન્ધ્યાં વૃદ્ધાં તથા વિષ્ણુરૂપિણીમુષસીં તથા ॥ ૫૧॥

નિર્મૃજીં ચ તથા સર્વસિદ્ધીનાં કારિણીં તથા ।
સર્વમન્ત્રાધિપતિકાં ભૂર્ભુવઃ સ્વશ્ચ પૂરુષમ્ ॥ ૫૨॥

ઇત્યેવં તર્પણં કાર્યં સન્ધ્યાયાઃ શ્રુતિસમ્મતમ્ ।
સાયં સન્ધ્યાવિધાનં ચ કથિતં પાપનાશનમ્ ॥ ૫૩॥

સર્વદુઃખહરં વ્યાધિનાશકં મોક્ષદં તથા ।
સદાચારેષુ સન્ધ્યાયાઃ પ્રાધાન્યં મુનિપુઙ્ગવ ।
સન્ધ્યાચરણતો દેવી ભક્તાભીષ્ટં પ્રયચ્છતિ ॥ ૫૪॥

ઇતિ શ્રીમદ્દેવીભાગવતે મહાપુરાણેઽષ્ટાદશસાહસ્ર્યાં
સંહિતાયામેકાદશસ્કન્ધે
બ્રહ્મયજ્ઞાદિકીર્તનં નામ વિંશોઽધ્યાયઃ ॥ ૧૧.૨૦॥

## ૧૧.૨૧ એકવિંશોઽધ્યાયઃ । ગાયત્રીપુરશ્ચરણવિધિકથનમ્ ।

શ્રીનારાયણ ઉવાચ ।
અથાતઃ શ્રૂયતાં બ્રહ્મન્ ગાયત્ર્યા પાપનાશનમ્ ।
પુરશ્ચરણકં પુણ્યં યથેષ્ટફલદાયકમ્ ॥ ૧॥

પર્વતાગ્રે નદીતીરે બિલ્વમૂલે જલાશયે ।
ગોષ્ઠે દેવાલયેઽશ્વત્થે ઉદ્યાને તુલસીવને ॥ ૨॥

પુણ્યક્ષેત્રે ગુરોઃ પાર્શ્વે ચિત્તૈકાગ્ર્યસ્થલેઽપિ ચ ।
પુરશ્ચરણકૃન્મન્ત્રી સિધ્યત્યેવ ન સંશયઃ ॥ ૩॥

યસ્ય કસ્યાપિ મન્ત્રસ્ય પુરશ્ચરણમારભેત્ ।
વ્યાહૃતિત્રયસંયુક્તાં ગાયત્રીં ચાયુતં જપેત્ ॥ ૪॥

નૃસિંહાર્કવરાહાણાં તાન્ત્રિકં વૈદિકં તથા ।
વિના જપ્ત્વા તુ ગાયત્રીં તત્સર્વં નિષ્ફલં ભવેત્ ॥ ૫॥

સર્વે શાક્તા દ્વિજાઃ પ્રોક્તા ન શૈવા ન ચ વૈષ્ણવાઃ ।
આદિશક્તિમુપાસન્તે ગાયત્રીં વેદમાતરમ્ ॥ ૬॥

મન્ત્રં સંશોધ્ય યત્નેન પુરશ્ચરણતત્પરઃ ।
મન્ત્રશોધનપૂર્વાઙ્ગમાત્મશોધનમુત્તમમ્ ॥ ૭॥

આત્મતત્ત્વશોધનાય ત્રિલક્ષં પ્રજપેદ્બુધઃ ।
અથવા ચૈકલક્ષં તુ શ્રુતિપ્રોક્તેન વર્ત્મના ॥ ૮॥

આત્મશુદ્ધિં વિના કર્તુર્જપહોમાદિકાઃ ક્રિયાઃ ।
નિષ્ફલાસ્તાસ્તુ વિજ્ઞેયાઃ કારણં શ્રુતિચોદિતમ્ ॥ ૯॥

તપસા તાપયેદ્દેહં પિતૃદેવાંશ્ચ તર્પયેત્ ।
તપસા સ્વર્ગમાપ્નોતિ તપસા વિન્દતે મહત્ ॥ ૧૦॥

ક્ષત્રિયો બાહુવીર્યેણ તરેદાપદ આત્મનઃ ।
ધનેન વૈશ્યઃ શૂદ્રસ્તુ જપહોમૈર્દ્વિજોત્તમઃ ॥ ૧૧
અતએવ તુ વિપ્રેન્દ્ર તપઃ કુર્યાત્પ્રયત્નતઃ ।
શરીરશોષણં પ્રાહુસ્તાપસાસ્તપ ઉત્તમમ્ ॥ ૧૨
શોધયેદ્વિધિમાર્ગેણ કૃચ્છ્રચાન્દ્રાયણાદિભિઃ ।
અથાન્નશુદ્ધિકરણં વક્ષ્યામિ શ◌ૃણુ નારદ ॥ ૧૩
અયાચિતોઞ્છશુક્લાખ્યભિક્ષાવૃત્તિચતુષ્ટયમ્ ।
તાન્ત્રિકૈર્વૈદિકૈશ્ચૈવં પ્રોક્તાન્નસ્ય વિશુદ્ધતા ॥ ૧૪
ભિક્ષાન્નં શુદ્ધમાનીય કૃત્વા ભાગચતુષ્ટયમ્ ।
એકં ભાગં દ્વિજેભ્યસ્તુ ગોગ્રાસસ્તુ દ્વિતીયકઃ ॥ ૧૫
અતિથિભ્યસ્તૃતીયસ્તુ તદૂર્ધ્વં તુ સ્વભાર્યયોઃ ।
આશ્રમસ્ય યથા યસ્ય કૃત્વા ગ્રાસવિધિં ક્રમાત્ ॥ ૧૬
આદૌ ક્ષિપ્ત્વા તુ ગોમૂત્રં યથાશક્તિ યથાક્રમમ્ ।

તદૂર્ધ્વં ગ્રાસસઙ્ખ્યા સ્યાદ્વાનપ્રસ્થગૃહસ્થયોઃ ॥ ૧૭
કુક્કુટાણ્ડપ્રમાણં તુ ગ્રાસમાનં વિધીયતે ।
અષ્ટૌ ગ્રાસા ગૃહસ્થસ્ય વનસ્થસ્ય તદર્ધકમ્ ॥ ૧૮
બ્રહ્મચારી યથેષ્ટં ચ ગોમૂત્રં વિધિપૂર્વકમ્ ।
પ્રોક્ષણં નવવારં ચ ષડ્વારં ચ ત્રિવારકમ્ ॥ ૧૯
નિશ્છિદ્રં ચ કરં કૃત્વા સાવિત્રીં ચ તદિત્યૃચમ્ ।
મન્ત્રમુચ્ચાર્ય મનસા પ્રોક્ષણે વિધિરુચ્યતે ॥ ૨૦
ચૌરો વા યદિ ચાણ્ડાલો વૈશ્યઃ ક્ષત્રસ્તથૈવ ચ ।
અન્નં દદ્યાત્તુ યઃ કશ્ચિદધમો વિધિરુચ્યતે ॥ ૨૧
શૂદ્રાન્નં શૂદ્રસમ્પર્કં શૂદ્રેણ ચ સહાશનમ્ ।
તે યાન્તિ નરકં ઘોરં યાવચ્ચન્દ્રદિવાકરૌ ॥ ૨૨
ગાયત્રીચ્છન્દો મન્ત્રસ્ય યથાસઙ્ખ્યાક્ષરાણિ ચ ।
તાવલ્લક્ષાણિ કર્તવ્યં પુરશ્ચરણકં તથા ॥ ૨૩
દ્વાત્રિંશલ્લક્ષમાનં તુ વિશ્વામિત્રમતં તથા ।
જીવહીનો યથા દેહઃ સર્વકર્મસુ ન ક્ષમઃ ॥ ૨૪
પુરશ્ચરણહીનસ્તુ તથા મન્ત્રઃ પ્રકીર્તિતઃ ।
જ્યેષ્ઠાષાઢૌ ભાદ્રપદં પૌષં તુ મલમાસકમ્ ॥ ૨૫
અઙ્ગારં શનિવારં ચ વ્યતીપાતં ચ વૈધૃતિમ્ ।
અષ્ટમીં નવમીં ષષ્ઠીં ચતુર્થીં ચ ત્રયોદશીમ્ ॥ ૨૬
ચતુર્દશીમમાવાસ્યાં પ્રદોષં ચ તથા નિશામ્ ।
યમાગ્નિરુદ્રસર્પેન્દ્રવસુશ્રવણજન્મભમ્ ॥ ૨૭
મેષકર્કતુલાકુમ્ભાન્મકરં ચૈવ વર્જયેત્ ।
સર્વાણ્યેતાનિ વર્જ્યાનિ પુરશ્ચરણકર્મણિ ॥ ૨૮
ચન્દ્રતારાનુકૂલે ચ શુક્લપક્ષે વિશેષતઃ ।
પુરશ્ચરણકં કુર્યાન્મન્ત્રસિદ્ધિઃ પ્રજાયતે ॥ ૨૯
સ્વસ્તિવાચનકં કુર્યાન્નાન્દીશ્રાદ્ધં યથાવિધિ ।
વિપ્રાન્સન્તર્પ્ય યત્નેન ભોજનાચ્છાદનાદિભિઃ ॥ ૩૦
આરભેત્તુ તતઃ પશ્ચાદનુજ્ઞાનપુરઃસરમ્ ।
પ્રત્યઙ્મુખઃ શિવસ્થાને દ્વિજશ્ચાન્યતમે જપેત્ ॥ ૩૧
કાશીપુરી ચ કેદારો મહાકાલોઽથ નાસિકમ્ ।
ત્ર્યમ્બકં ચ મહાક્ષેત્રં પઞ્ચ દીપા ઇમે ભુવિ ॥ ૩૨
સર્વત્રૈવ હિ દીપસ્તુ કૂર્માસનમિતિ સ્મૃતમ્ ।

પ્રારમ્ભદિનમારભ્ય સમાપ્તિદિવસાવધિ ॥ ૩૩
ન ન્યૂનં નાતિરિક્તં ચ જપં કુર્યાદ્દિને દિને ।
નૈરન્તર્યેણ કુર્વન્તિ પુરશ્ચર્યાં મુનીશ્વરાઃ ॥ ૩૪
પ્રાતરારભ્ય વિધિવજ્જપેન્મધ્યદિનાવધિ ।
મનઃસંહરણં શૌચં ધ્યાનં મન્ત્રાર્થચિન્તનમ્ ॥ ૩૫
ગાયત્રીચ્છન્દો મન્ત્રસ્ય યથાસઙ્ખ્યાક્ષરાણિ ચ ।
તાવલ્લક્ષાણિ કર્તવ્યં પુરશ્ચરણકં તથા ॥ ૩૬
જુહુયાત્તદ્દશાંશેન સઘૃતેન પયોઽન્ધસા ।
તિલૈઃ પત્રૈઃ પ્રસૂનૈશ્ચ યવૈશ્ચ મધુરાન્વિતૈઃ ॥ ૩૭
કુર્યાદ્દશાંશતો હોમં તતઃ સિદ્ધો ભવેન્મનુઃ ।
ગાયત્રી ચૈવ સંસેવ્યા ધર્મકામાર્થમોક્ષદા ॥ ૩૮
નિત્યે નૈમિત્તિકે કામ્યે ત્રિતયે તુ પરાયણઃ ।
ગાયત્ર્યાસ્તુ પરં નાસ્તિ ઇહ લોકે પરત્ર ચ ॥ ૩૯
મધ્યાહ્નમિતભુઙ્ મૌની ત્રિઃસ્નાનાર્ચનતત્પરઃ ।
જલે લક્ષત્રયં ધીમાનનન્યમાનસક્રિયઃ ॥ ૪૦
કર્મણા યો જપેત્પશ્ચાત્કર્મભિઃ સ્વેચ્છયાપિ વા ।
યાવત્કાર્યં ન સિધ્યેત્તુ તાવત્કુર્યાજ્જપાદિકમ્ ॥ ૪૧
સામાન્યકામ્યકર્માદૌ યથાવદ્વિધિરુચ્યતે ।
આદિત્યસ્યોદયે સ્નાત્વા સહસ્રં પ્રત્યહં જપેત્ ॥ ૪૨
આયુરારોગ્યમૈશ્વર્યં ધનં ચ લભતે ધ્રુવમ્ ।
ષણ્માસં વા ત્રિમાસં વા વર્ષાન્તે સિદ્ધિમાપ્નુયાત્ ॥ ૪૩
પદ્માનાં લક્ષહોમેન ઘૃતાક્તાનાં હુતાશને ।
પ્રાપ્નોતિ નિખિલં મોક્ષં સિધ્યત્યેવ ન સંશયઃ ॥ ૪૪
મન્ત્રસિદ્ધિં વિના કર્તુર્જપહોમાદિકાઃ ક્રિયાઃ ।
કામ્યં વા યદિ વા મોક્ષઃ સર્વં તનિષ્ફલં ભવેત્ ॥ ૪૫
પઞ્ચવિંશતિલક્ષેણ દધ્ના ક્ષીરેણ વા હુતાત્ ।
સ્વદેહે સિધ્યતે જન્તુર્મહર્ષીણાં મતં તથા ॥ ૪૬
અષ્ટાઙ્ગયોગસિદ્ધ્યા ચ નરઃ પ્રાપ્નોતિ યત્ફલમ્ ।
તત્ફલં સિદ્ધિમાપ્નોતિ નાત્ર કાર્યા વિચારણા ॥ ૪૭
શક્તો વાપિ ત્વશક્તો વા આહારં નિયતં ચરેત્ ।
ષણ્માસાત્તસ્ય સિદ્ધિઃ સ્યાદ્ગુરુભક્તિરતઃ સદા ॥ ૪૮
એકાહં પઞ્ચગવ્યાશી ચૈકાહં મારુતાશનઃ ।

એકાહં બ્રાહ્મણાન્નાશી ગાયત્રીજપકૃદ્ભવેત્ ॥ ૪૯
સ્નાત્વા ગઙ્ગાદિતીર્થેષુ શતમન્તર્જલે જપેત્ ।
શતેનાપસ્તતઃ પીત્વા સર્વપાપૈઃ પ્રમુચ્યતે ॥ ૫૦
ચાન્દ્રાયણાદિકૃચ્છ્રસ્ય ફલં પ્રાપ્નોતિ નિશ્ચિતમ્ ।
રાજા વા યદિ વા વિપ્રસ્તપઃ કુર્યાત્સ્વકે ગૃહે ॥ ૫૧
ગૃહસ્થો બ્રહ્મચારી વા વાનપ્રસ્થોઽથવાપિ ચ ।
અધિકારપરત્વેન ફલં યજ્ઞાદિપૂર્વકમ્ ॥ ૫૨
શ્રૌતસ્માર્તાદિકં કર્મ ક્રિયતે મોક્ષકાઙ્ક્ષિભિઃ ।
સાગ્નિકશ્ચ સદાચારો વિદ્વદ્ભિશ્ચ સુશિક્ષિતઃ ॥ ૫૩
તતઃ કુર્યાત્પ્રયત્નેન ફલમૂલોદકાદિભિઃ ।
ભિક્ષાન્નં શુદ્ધમશ્નીયાદષ્ટૌ ગ્રાસાન્સ્વયં ભુજેત્ ॥ ૫૪
એવં પુરશ્ચરણકં કૃત્વા મન્ત્રસિદ્ધિમવાપ્નુયાત્ ।
દેવર્ષે યદનુષ્ઠાનાદ્દારિદ્ર્યં વિલયં વ્રજેત્ ।
યચ્છ્રુત્વાપિ ચ પુણ્યાનાં મહતીં સિદ્ધિમાપ્નુયાત્ ॥ ૫૫

ઇતિ શ્રીમદ્દેવીભાગવતે મહાપુરાણેઽષ્ટાદશસાહસ્ર્યાં
સંહિતાયામેકાદશસ્કન્ધે
ગાયત્રીપુરશ્ચરણવિધિકથનં નામૈએકવિંશોઽધ્યાયઃ ॥ ૧૧.૨૧॥

## ૧૧.૨૨ દ્વાવિંશોઽધ્યાયઃ । વૈશ્વદેવાદિવિધિનિરુપણમ્ ।

શ્રીનારાયણ ઉવાચ ।
અથાતઃ શ્રૂયતાં બ્રહ્મન્ વૈશ્વદેવવિધાનકમ્ ।
પુરશ્ચર્યાપ્રસઙ્ગેન મમાપિ સ્મૃતિમાગતમ્ ॥ ૧॥

દેવયજ્ઞો બ્રહ્મયજ્ઞો ભૂતયજ્ઞસ્તથૈવ ચ ।
પિતૃયજ્ઞો મનુષ્યસ્ય યજ્ઞશ્ચૈવ તુ પઞ્ચમઃ ॥ ૨॥

પઞ્ચસૂના ગૃહસ્થસ્ય ચુલ્લી પેષણ્યુપસ્કરઃ ।
કણ્ડણી ચોદકુમ્ભશ્ચ તેષાં પાપસ્ય શાન્તયે ॥ ૩॥

ન ચુલ્લ્યાં નાયસે પાત્રે ન ભૂમૌ ન ચ ખર્પરે ।
વૈશ્વદેવં પ્રકુર્વીત કુણ્ડે વા સ્થણ્ડિલેઽપિ વા ॥ ૪॥

ન પાણિના ન શૂર્પેણ ન ચ મેધ્યાજિનાદિભિઃ ।

મુખેનોપધમેદગ્નિં મુખાદેવ વ્યજાયત ॥ ૫॥

પટકેન ભવેદ્વ્યાધિઃ શૂર્પેણ ધનનાશનમ્ ।
પાણિના મૃત્યુમાપ્નોતિ કર્મસિદ્ધિર્મુખેન તુ ॥ ૬॥

ફલૈર્દધિઘૃતૈઃ કુર્યાન્મૂલશાકોદકાદિભિઃ ।
અલાભે યેન કેનાપિ કાષ્ઠમૂલતૃણાદિભિઃ ॥ ૭॥

જુહુયાત્સર્પિષાભ્યક્તં તૈલક્ષારવિવર્જિતમ્ ।
દધ્યક્તં વા પાયસાક્તં તદભાવેઽમ્ભસાપિ વા ॥ ૮॥

શુષ્કૈઃ પર્યુષિતૈઃ કુષ્ઠી ઉચ્છિષ્ટેન દ્વિષાં વશી ।
રુક્ષૈર્દ્રરિદ્રતાં યાતિ ક્ષારં હુત્વા વ્રજત્યધઃ ॥ ૯॥

અઙ્ગારાન્ભસ્મમિશ્રાંસ્તુ નિર્હૃત્યોત્તરતોઽનલાત્ ।
જુહુયાદ્વૈશ્વદેવં તુ ન ક્ષારાદિવિમિશ્રિતમ્ ॥ ૧૦॥

અકૃત્વા વૈશ્વદેવં તુ યો ભુઙ્ક્તે મૂઢધીર્દ્વિજઃ ।
સ મૂઢો નરકં યાતિ કાલસૂત્રમવાક્શિરાઃ ॥ ૧૧॥

શાકં વા યદિ વા પત્રં મૂલં વા યદિ વા ફલમ્ ।
સઙ્કલ્પયેદ્યદાહારં તેનાગ્નૌ જુહુયાદપિ ॥ ૧૨॥

અકૃતે વૈશ્વદેવે તુ ભિક્ષૌ ભિક્ષાર્થમાગતે ।
ઉદ્ધૃત્ય વૈશ્વદેવાર્થં ભિક્ષાં દત્ત્વા વિસર્જયેત્ ॥ ૧૩॥

વૈશ્વદેવકૃતં દોષં શક્તો ભિક્ષુર્વ્યપોહિતુમ્ ।
ન તુ ભિક્ષુકૃતં દોષં વૈશ્વદેવો વ્યપોહતિ ॥ ૧૪॥

યતિશ્ચ બ્રહ્મચારી ચ પક્વાન્નસ્વામિનાવુભૌ ।
તયોરન્નમદત્ત્વા તુ ભુક્ત્વા ચાન્દ્રાયણં ચરેત્ ॥ ૧૫॥

વૈશ્વદેવાનન્તરં ચ ગોગ્રાસં પ્રતિપાદયેત્ ।
તદ્વિધાનં પ્રવક્ષ્યામિ શ ૃણુ દેવર્ષિપૂજિત ॥ ૧૬॥

સુરભિર્વૈષ્ણવી માતા નિત્યં વિષ્ણુપદે સ્થિતા ।
ગોગ્રાસં ચ મયા દત્તં સુરભે પ્રતિગૃહ્યતામ્ ॥ ૧૭॥

ગોભ્યશ્ચ નમ ઇત્યેવ પૂજાં કૃત્વા ગવેઽર્પયેત્ ।
ગોગ્રાસેન તુ ગોમાતા સુરભિઃ સમ્પ્રસીદતિ ॥ ૧૮॥

તતો ગોદોહનં કાલં તિષ્ઠેચ્ચૈવ ગૃહાઙ્ગણે ।
અતિથિર્યસ્ય ભગ્નાશો ગૃહાત્પ્રતિનિવર્તતે ॥ ૧૯॥

સ તસ્મૈ દુષ્કૃતં દત્ત્વા પુણ્યમાદાય ગચ્છતિ ।
માતા પિતા ગુરુર્ભ્રાતા પ્રજા દાસઃ સમાશ્રિતઃ ॥ ૨૦॥

અભ્યાગતોઽતિથિશ્ચાગ્નિરેતે પોષ્યા ઉદાહૃતાઃ ।
એવં જ્ઞાત્વા તુ યો મોહાન્ન કરોતિ ગૃહાશ્રમમ્ ॥ ૨૧॥

તસ્ય નાયં તુ ન પરો લોકો ભવતિ ધર્મતઃ ।
યત્ફલં સોમયાગેન પ્રાપ્નોતિ ધનવાન્દ્વિજઃ ॥ ૨૨॥

સમ્યક્ પઞ્ચમહાયજ્ઞૈર્દરિદ્રસ્તેન ચાપ્નુયાત્ ।
અથ પ્રાણાગ્નિહોત્રં તુ વક્ષ્યામિ મુનિપુઙ્ગવ ॥ ૨૩॥

યજ્જ્ઞાત્વા મુચ્યતે જન્તુર્જન્મમૃત્યુજરાદિભિઃ ।
પરિજ્ઞાનેન મુચ્યન્તે નરાઃ પાતકકિલ્બિષૈઃ ॥ ૨૪॥

વિધિના ભુજ્યતે યેન મુચ્યેત સ ઋણત્રયાત્ ।
કુલાન્યુદ્ધરતે વિપ્રો નરકાનેકવિંશતિમ્ ॥ ૨૫॥

સર્વયજ્ઞફલપ્રાપ્તિઃ સર્વલોકેષુ ગચ્છતિ ।
હૃત્પુણ્ડરીકમરણિર્મનો મન્થાનસંજ્ઞકમ્ ॥ ૨૬॥

વાયુરજ્જ્વા મથેદગ્નિં ચક્ષુરધ્વર્યુરેવ ચ ।
તર્જનીમધ્યમાઙ્ગુષ્ઠૈઃ પ્રાણસ્યૈવાહુતિં ક્ષિપેત્ ॥ ૨૭॥

મધ્યમાનામિકાઙ્ગુષ્ઠૈરપાનસ્યાહુતિં ક્ષિપેત્ ।
કનિષ્ઠાનામિકાઙ્ગુષ્ઠૈર્વ્યાનસ્ય તદનન્તરમ્ ॥ ૨૮॥

કનિષ્ઠાતર્જન્યઙ્ગુષ્ઠૈરુદાનસ્યાહુતિં ક્ષિપેત્ ।
સર્વાઙ્ગુલૈર્ગૃહીત્વાન્નં સમાનસ્યાહુતિં ક્ષિપેત્ ॥ ૨૯॥

સ્વાહાન્તાન્પ્રણવાદ્યાંશ્ચ નામમન્ત્રાંશ્ચ વૈ પઠેત્ ।
મુખે ચાહવનીયસ્તુ હૃદયે ગાર્હપત્યકઃ ॥ ૩૦॥

નાભૌ ચ દક્ષિણાગ્નિઃ સ્યાદધઃ સભ્યાવસથ્યકૌ ।
વાગ્ઘોતા પ્રાણ ઉદ્ગાતા ચક્ષુરધ્વર્યુરેવ ચ ॥ ૩૧॥

મનો બ્રહ્મા ભવેચ્છ્રોત્રમાગ્નીધ્રસ્થાન એવ ચ ।
અહઙ્કારઃ પશુશ્ચાત્ર પ્રણવઃ પય ઈરિતમ્ ॥ ૩૨॥

બુદ્ધિશ્ચ પત્ની સમ્પ્રોક્તા યદધીનો ગૃહાશ્રમી ।
ઉરો વેદિસ્તુ રોમાણિ દર્ભાઃ સ્યુઃ સ્રુક્સ્રુવૌ કરૌ ॥ ૩૩॥

પ્રાણમન્ત્રસ્ય ચ ઋષી રુક્મવર્ણઃ ક્ષુધાગ્નિકઃ ।
દેવતાદિત્ય એવાત્ર ગાયત્રીચ્છન્દ ઉચ્યતે ॥ ૩૪॥

પ્રાણાય ચ તથા સ્વાહા મન્ત્રાન્તે કીર્તયેદપિ ।
ઇદમાદિત્યદેવાય ન મમેતિ વદેદપિ ॥ ૩૫॥

અપાનમન્ત્રસ્ય તથા ગોક્ષીરધવલાકૃતિઃ ।
શ્રદ્ધાગ્નિઋષિરેવાત્ર સોમો વૈ દેવતા સ્મૃતા ॥ ૩૬॥

ઉષ્ણિક્છન્દસ્તથાપાનાય સ્વાહેત્યપિ કીર્તયેત્ ।
સોમાયેદં ચ ન મમેત્યત્રોહઃ પરિકીર્તિતઃ ॥ ૩૭॥

વ્યાનમન્ત્રસ્ય ચાખ્યાતોઽમ્બુજવર્ણહુતાશનઃ ।
ઋષિરુક્તો દેવતાગ્નિરનુષ્ટુપ્ છન્દ ઈરિતમ્ ॥ ૩૮॥

વ્યાનાય ચ તથા સ્વાહાગ્નયેદં ન મમેત્યપિ ।
ઉદાનમન્ત્રસ્ય તથા શક્રગોપસવર્ણકઃ ॥ ૩૯॥

ઋષિરગ્નિઃ સમાખ્યાતો વાયુર્વૈ દેવતા સ્મૃતા ।
બૃહતીચ્છન્દ આખ્યાતમુદાનાય ચ પૂર્વવત્ ॥ ૪૦॥

વાયવે ચેદં ન મમ એવં ચૈવોચ્ચરેદ્ દ્વિજઃ ।
સમાનવાયુમન્ત્રસ્ય વિદ્યુદ્વર્ણો વિરૂપકઃ ॥ ૪૧॥

ઋષિરગ્નિઃ સમાખ્યાતઃ પર્જન્યો દેવતા મતા ।
પઙ્ક્તિશ્છન્દઃ સમાખ્યાતં સમાનાય ચ પૂર્વવત્ ॥ ૪૨॥

પર્જન્યાયેદમિત્યુક્ત્વા ષષ્ઠીં ચૈવાહુતિં ક્ષિપેત્ ।
વૈશ્વાનરો મહાનગ્નિરૃષિર્વૈ પરિકીર્તિતઃ ॥ ૪૩॥

ગાયત્રીચ્છન્દ આખ્યાતં દેવસ્ત્વાત્મા ભવેદપિ ।
સ્વાહાન્તો મન્ત્ર આખ્યાતઃ પરમાત્મન ઉચ્ચરેત્ ॥ ૪૪॥

ઇદં ન મમ ચેત્યેવં જાતં પ્રાણાગ્નિહોત્રકમ્ ।
એતજ્જ્ઞાત્વા વિધિં કૃત્વા બ્રહ્મભૂયાય કલ્પતે ।
પ્રાણાગ્નિહોત્રવિધેયં સઙ્ક્ષેપાત્કથિતા હિ તે ॥ ૪૫॥

ઇતિ શ્રીમદ્દેવીભાગવતે મહાપુરાણેઽષ્ટાદશસાહસ્ર્યાં
સંહિતાયામેકાદશસ્કન્ધે
વૈશ્વદેવાદિવિધિનિરૂપણં નામ દ્વાવિંશોઽધ્યાયઃ ॥ ૧૧.૨૨॥

## ૧૧.૨૩ ત્રયોવિંશોઽધ્યાયઃ । તપ્તકૃચ્છ્રાદિલક્ષણવર્ણનમ્ ।

શ્રીનારાયણ ઉવાચ ।
અમૃતાપિધાનમિત્યેવમુચ્ચાર્ય સાધકોત્તમઃ ।
ઉચ્છિષ્ટભાગ્ભ્યઃ પાત્રાન્નં દદ્યાદન્તે વિચક્ષણઃ ॥ ૧॥

યે કે ચાસ્મત્કુલે જાતા દાસદાસ્યોઽનકાઙ્ક્ષિણઃ ।
તે સર્વે તૃપ્તિમાયાન્તુ મયા દત્તેન ભૂતલે ॥ ૨॥

રૌરવેઽપુણ્યનિલયે પદ્માર્બુદનિવાસિનામ્ ।
અર્થિનામુદકં દત્તમક્ષય્યમુપતિષ્ઠતુ ॥ ૩॥

પવિત્રગ્રન્થિમુત્સૃજ્ય મણ્ડલે ભુવિ નિક્ષિપેત્ ।
પાત્રે તુ નિક્ષિપેદ્યસ્તુ સ વિપ્રઃ પઙ્ક્તિદૂષકઃ ॥ ૪॥

ઉચ્છિષ્ટસ્તેન સંસ્પૃષ્ટઃ શુના શૂદ્રેણ ચ દ્વિજઃ ।
ઉપોષ્ય રજનીમેકાં પઞ્ચગવ્યેન શુધ્યતિ ॥ ૫॥

અનુચ્છિષ્ટેન સંસ્પૃષ્ટૈઃ સ્નાનમેવ વિધીયતે ।
એકાહુતિપ્રદાનેન કોટિયજ્ઞફલં લભેત્ ॥ ૬॥

પઞ્ચભિઃ પઞ્ચકોટીનાં તદનન્તફલં સ્મૃતમ્ ।
પ્રાણાગ્નિહોત્રવેત્રે યો હ્યન્નદાનં કરોતિ ચ ॥ ૭॥

દાતુશ્ચૈવ તુ યત્પુણ્યં ભોક્તુશ્ચૈવ તુ યત્ફલમ્ ।
પ્રાપ્નુતસ્તૌ તદેવ દ્વાવુભૌ તૌ સ્વર્ગગામિનૌ ॥ ૮॥

સપવિત્રકરો ભુઙ્ક્તે યસ્તુ વિપ્રો વિધાનતઃ ।
ગ્રાસે ગ્રાસે ફલં તસ્ય પઞ્ચગવ્યસમં ભવેત્ ॥ ૯॥

પૂજાકાલત્રયે નિત્યં જપસ્તર્પણમેવ ચ ।
હોમો બ્રાહ્મણભુક્તિશ્ચ પુરશ્ચરણમુચ્યતે ॥ ૧૦॥

અધઃશયાનો ધર્માત્મા જિતક્રોધો જિતેન્દ્રિયઃ ।
લઘુમિષ્ટહિતાશી ચ વિનીતઃ શાન્તચેતસા ॥ ૧૧॥

નિત્યં ત્રિષવણસ્નાયી નિત્યં સ શુભભાષણઃ ।
સ્ત્રીશૂદ્રપતિતવ્રાત્યનાસ્તિકોચ્છિષ્ટભાષણમ્ ॥ ૧૨॥

ચાણ્ડાલભાષણં ચૈવ ન કુર્યાન્મુનિસત્તમ ।
નત્વા નૈવ ચ ભાષેત જપહોમાર્ચનાદિષુ ॥ ૧૩॥

મૈથુનસ્ય તથાલાપં તદ્ગોષ્ઠીમપિ વર્જયેત્ ।
કર્મણા મનસા વાચા સર્વાવસ્થાસુ સર્વદા ॥ ૧૪॥

સર્વત્ર મૈથુનત્યાગો બ્રહ્મચર્યં પ્રચક્ષતે ।
રાજ્ઞશ્ચૈવ ગૃહસ્થસ્ય બ્રહ્મચર્યમુદાહૃતમ્ ॥ ૧૫॥

ઋતુસ્તાતેષુ દારેષુ સઙ્ગતિર્યા વિધાનતઃ ।
સંસ્કૃતાયાં સવર્ણાયામૃતું દૃષ્ટ્વા પ્રયત્નતઃ ॥ ૧૬॥

રાત્રૌ તુ ગમનં કાર્યં બ્રહ્મચર્યં હરેન્ન તત્ ।
ઋણત્રયમસંશોધ્ય ત્વનુત્પાદ્ય સુતાનપિ ॥ ૧૭॥

તથા યજ્ઞાનનિષ્ટ્વા ચ મોક્ષમિચ્છન્વ્રજત્યધઃ ।
અજાગલસ્ય યજ્જન્મ તજ્જન્મ શ્રુતિચોદિતમ્ ॥ ૧૮॥

અતઃ કાર્યં તુ વિપ્રેન્દ્ર ઋણત્રયવિશોધનમ્ ।
તે દેવાનામૃષીણાં ચ પિતૃણામૃણિનસ્તથા ॥ ૧૯॥

ઋષિભ્યો બ્રહ્મચર્યેણ પિતૃભ્યસ્તુ તિલોદકૈઃ ।
મુચ્યેદ્યજ્ઞેન દેવેભ્યઃ સ્વાશ્રમં ધર્મમાચરેત્ ॥ ૨૦॥

ક્ષીરાહારી ફલાશી વા શાકાશી વા હવિષ્યભુક્ ।
ભિક્ષાશી વા જપેદ્વિદ્વાન્કૃચ્છ્રચાન્દ્રાયણાદિકૃત્ ॥ ૨૧॥

લવણં ક્ષારમમ્લં ચ ગૃઞ્જનં કાંસ્યભોજનમ્ ।
તામ્બૂલં ચ દ્વિભુક્તં ચ દુષ્ટવાસઃ પ્રમત્તનમ્ ॥ ૨૨॥

શ્રુતિસ્મૃતિવિરોધં ચ જપં રાત્રૌ વિવર્જયેત્ ।
વૃથા ન કાલં ગમયેદ્દ્યૂતસ્ત્રીસ્વાપવાદતઃ ॥ ૨૩॥

ગમયેદ્દેવતાપૂજાસ્તોત્રાગમવિલોકનૈઃ ।
ભૂશય્યા બ્રહ્મચારિત્વં મૌનચર્યા તથૈવ ચ ॥ ૨૪॥

નિત્યં ત્રિષવણસ્નાનં શૂદ્રકર્મવિવર્જનમ્ ।
નિત્યપૂજા નિત્યદાનમાનન્દસ્તુતિકીર્તનમ્ ॥ ૨૫॥

નૈમિત્તિકાર્ચનં ચૈવ વિશ્વાસો ગુરુદેવયોઃ ।
જપનિષ્ઠસ્ય ધર્મા યે દ્વાદશૈતે સુસિદ્ધિદાઃ ॥ ૨૬॥

નિત્યં સૂર્યમુપસ્થાય તસ્ય ચાભિમુખો જપેત્ ।
દેવતાપ્રતિમાદૌ વા વહ્નૌ વાભ્યર્ચ્ય તન્મુખઃ ॥ ૨૭॥

સ્નાનપૂજાજપધ્યાનહોમતર્પણતત્પરઃ ।
નિષ્કામો દેવતાયાં ચ સર્વકર્મનિવેદકઃ ॥ ૨૮॥

એવમાદીંશ્ચ નિયમાન્પુરશ્ચરણકૃચ્ચરેત્ ।
તસ્માદ્વિજઃ પ્રસન્નાત્મા જપહોમપરાયણઃ ॥ ૨૯॥

તપસ્યધ્યયને યુક્તો ભવેદ્ભૂતાનુકમ્પકઃ ।
તપસા સ્વર્ગમાપ્નોતિ તપસા વિન્દતે મહત્ ॥ ૩૦॥

તપોયુક્તસ્ય સિધ્યન્તિ કર્માણિ નિયતાત્મનઃ ।
વિદ્વેષણં સંહરણં મારણં રોગનાશનમ્ ॥ ૩૧॥

યેન યેનાથ ઋષિણા યદર્થં દેવતાઃ સ્તુતાઃ ।
સ સ કામઃ સમૃદ્ધ્યેત તેષાં તેષાં તથા તથા ॥ ૩૨॥

તાનિ કર્માણિ વક્ષ્યામિ વિધાનાનિ ચ કર્મણામ્ ।
પુરશ્ચરણમાદૌ ચ કર્મણાં સિદ્ધિકારકમ્ ॥ ૩૩॥

સ્વાધ્યાયાભ્યસનસ્યાદૌ પ્રાજાપત્યં ચરેદ્વિજઃ ।
કેશશ્મશ્રુલોમનખાન્ વાપયિત્વા તતઃ શુચિઃ ॥ ૩૪॥

તિષ્ઠેદહનિ રાત્રૌ તુ શુચિરાસીત વાગ્યતઃ ।
સત્યવાદી પવિત્રાણિ જપેદ્વ્યાહૃતયસ્તથા ॥ ૩૫॥

જ્યેકારાદ્યાસ્તુ તા જપ્ત્વા સાવિત્રીં ચ તદિત્યૃચમ્ ।
આપો હિ ષ્ઠેતિ સૂક્તં ચ પવિત્રં પાપનાશનમ્ ॥ ૩૬॥

પુનન્ત્યઃ સ્વસ્તિમત્યશ્ચ પાવમાન્યસ્તથૈવ ચ ।
સર્વત્રૈતત્પ્રયોક્તવ્યમાદાવન્તે ચ કર્મણામ્ ॥ ૩૭॥

આસહસ્રાદાશતાદ્વાપ્યાદશાદથવા જપેત્ ।
અકારં વ્યાહૃતીસ્તિસ્રઃ સાવિત્રીમથવાયુતમ્ ॥ ૩૮॥

તર્પયિત્વાદ્ભિરાચાર્યાનૃષીંશ્છન્દાંસિ દેવતાઃ ।

અનાર્યેણ ન ભાષેત શૂદ્રેણાપિ ન ગર્હિતૈઃ ॥ ૩૯॥

નાપિ ચોદક્યયા વધ્વા પતિતૈર્નાન્ત્યજૈર્નૃભિઃ ।
ન દેવબ્રાહ્મણદ્વિષ્ટૈર્નાચાર્યગુરુનિન્દકૈઃ ॥ ૪૦॥

ન માતૃપિતૃવિદ્વિષ્ટૈર્નાવમન્યેત કઞ્ચન ।
કૃચ્છ્રાણામેષ સર્વેષાં વિધિરુક્તોઽનુપૂર્વશઃ ॥ ૪૧॥

પ્રાજાપત્યસ્ય કૃચ્છ્રસ્ય તથા સાન્તપનસ્ય ચ ।
પરાકસ્ય ચ કૃચ્છ્રસ્ય વિધિશ્ચાન્દ્રાયણસ્ય ચ ॥ ૪૨॥

પઞ્ચભિઃ પાતકૈઃ સર્વૈર્દુષ્કૃતૈશ્ચ પ્રમુચ્યતે ।
તપ્તકૃચ્છ્રેણ સર્વાણિ પાપાનિ દહતિ ક્ષણાત્ ॥ ૪૩॥

ત્રિભિશ્ચાન્દ્રાયણૈઃ પૂતો બ્રહ્મલોકં સમશ્નુતે ।
અષ્ટભિર્દેવતાઃ સાક્ષાત્પશ્યેત વરદાસ્તદા ॥ ૪૪॥

છન્દાંસિ દશભિર્જ્ઞાત્વા સર્વાન્કામાન્સમશ્નુતે ।
ત્ર્યહં પ્રાતસ્ત્ર્યહં સાયં ત્ર્યહમદ્યાદયાચિતમ્ ॥ ૪૫॥

ત્ર્યહં પરં ચ નાશ્નીયાત્પ્રાજાપત્યં ચરેદ્દ્વિજઃ ।
ગોમૂત્રં ગોમયં ક્ષીરં દધિ સર્પિઃ કુશોદકમ્ ॥ ૪૬॥

એકરાત્રોપવાસશ્ચ કૃચ્છ્રં સાન્તપનં સ્મૃતમ્ ।
એકૈકં ગ્રાસમશ્નીયાદહાનિ ત્રીણિ પૂર્વવત્ ॥ ૪૭॥

ત્ર્યહં ચોપવસેદિત્થમતિકૃચ્છ્રં ચરેદ્દ્વિજઃ ।
એવમેવ ત્રિભિર્યુક્તં મહાસાન્તપનં સ્મૃતમ્ ॥ ૪૮॥

તપ્તકૃચ્છ્રં ચરન્વિપ્રો જલક્ષીરઘૃતાનિલાન્ ।
પ્રતિત્ર્યહં પિબેદુષ્ણાન્સકૃત્સ્નાયી સમાહિતઃ ॥ ૪૯॥

નિયતસ્તુ પિબેદાપઃ પ્રાજાપત્યવિધિઃ સ્મૃતઃ ।
યતાત્મનોઽપ્રમત્તસ્ય દ્વાદશાહમભોજનમ્ ॥ ૫૦॥

પરાકો નામ કૃચ્છ્રોઽયં સર્વપાપપ્રણોદનઃ ।
એકૈકં તુ ગ્રસેત્પિણ્ડં કૃષ્ણે શુક્લે ચ વર્ધયેત્ ॥ ૫૧॥

અમાવાસ્યાં ન ભુઞ્જીત એવં ચાન્દ્રાયણે વિધિઃ ।
ઉપસ્પૃશ્ય ત્રિષવણમેતચ્ચાન્દ્રાયણં સ્મૃતમ્ ॥ ૫૨॥

ચતુરઃ પ્રાતરશ્નીયાદ્વિપ્રઃ પિણ્ડાત્કૃતાહ્નિકઃ ।
ચતુરોઽસ્તમિતે સૂર્યે શિશુચાન્દ્રાયણં સ્મૃતમ્ ॥ ૫૩॥

અષ્ટાવષ્ટૌ સમશ્નીયાત્પિણ્ડાન્મધ્યન્દિને સ્થિતે ।
નિયતાત્મા હવિષ્યસ્ય યતિચાન્દ્રાયણં વ્રતમ્ ॥ ૫૪॥

એતદ્રુદ્રાસ્તથાદિત્યા વસવશ્ચ ચરન્તિ હિ ।
સર્વે કુશલિનો દેવા મરુતશ્ચ ભુવા સહ ॥ ૫૫॥

એકૈકં સપ્તરાત્રેણ પુનાતિ વિધિવત્કૃતમ્ ।
ત્વગસૃક્પિશિતાસ્થીનિ મેદોમજ્જાવસાસ્તથા ॥ ૫૬॥

એકૈકં સપ્તરાત્રેણ શુધ્યત્યેવ ન સંશયઃ ।
એભિર્વ્રતૈર્વિપૂતાત્મા કર્મ કુર્વીત નિત્યશઃ ॥ ૫૭॥

એવં શુદ્ધસ્ય કર્માણિ સિધ્યન્ત્યેવ ન સંશયઃ ।
શુદ્ધાત્મા કર્મ કુર્વીત સત્યવાદી જિતેન્દ્રિયઃ ॥ ૫૮॥

ઇષ્ટાન્કામાંસ્તતઃ સર્વાન્સમ્પ્રાપ્નોતિ ન સંશયઃ ।
ત્રિરાત્રમેવોપવસેદ્રહિતઃ સર્વકર્મણા ॥ ૫૯॥

ત્રીણિ નક્તાનિ વા કુર્યાત્તતઃ કર્મ સમારભેત્ ।
એવં વિધાનં કથિતં પુરશ્ચર્યાફલપ્રદમ્ ॥ ૬૦॥

ગાયત્ર્યાશ્ચ પુરશ્ચર્યાં સર્વકામપ્રદાયિની ।
કથિતા તવ દેવર્ષે મહાપાપવિનાશિની ॥ ૬૧॥

આદૌ કુર્યાદ્વ્રતં મન્ત્રી દેહશોધનકારકમ્ ।
પુરશ્ચર્યાં તતઃ કુર્યાત્સમસ્તફલભાગ્ભવેત્ ॥ ૬૨॥

ઇતિ તે કથિતં ગુહ્યં પુરશ્ચર્યાવિધાનકમ્ ।
એતત્પરસ્મૈ નો વાચ્યં શ્રુતિસારં યતઃ સ્મૃતમ્ ॥ ૬૩॥

ઇતિ શ્રીમદ્દેવીભાગવતે મહાપુરાણેઽષ્ટાદશસાહસ્ર્યાં
સંહિતાયામેકાદશસ્કન્ધે
તપ્તકૃચ્છ્રાદિલક્ષણવર્ણનં નામ ત્રયોવિંશોઽધ્યાયઃ ॥ ૧૧.૨૩॥

## ૧૧.૨૪ ચતુર્વિંશોઽધ્યાયઃ । પ્રાતશ્ચિન્તનમ્ ।

નારદ ઉવાચ ।
નારાયણ મહાભાગ ગાયત્ર્યાસ્તુ સમાસતઃ ।
શાન્ત્યાદિકાન્પ્રયોગાંસ્તુ વદસ્વ કરુણાનિધે ॥ ૧॥

શ્રીનારાયણ ઉવાચ ।
અતિગુહ્યમિદં પૃષ્ટં ત્વયા બ્રહ્મતનૂદ્ભવ ।
ન કસ્યાપિ ચ વક્તવ્યં દુષ્ટાય પિશુનાય ચ ॥ ૨॥

અથ શાન્તિઃ પયોઽક્તાભિઃ સમિદ્ભિર્જુહુયાદ્ દ્વિજઃ ।
શમીસમિદ્ભિઃ શામ્યન્તિ ભૂતરોગગ્રહાદયઃ ॥ ૩॥

આર્દ્રાભિઃ ક્ષીરવૃક્ષસ્ય સમિદ્ભિર્જુહુયાદ્ દ્વિજઃ ।
જુહુયાચ્છકલૈર્વાપિ ભૂતરોગાદિશાન્તયે ॥ ૪॥

જલેન તર્પયેત્સૂર્યં પાણિભ્યાં શાન્તિમાપ્નુયાત્ ।
જાનુદઘ્ને જલે જપ્ત્વા સર્વાન્દોષાઞ્છમં નયેત્ ॥ ૫॥

કણ્ઠદઘ્ને જલે જપ્ત્વા મુચ્યેત્પ્રાણાન્તિકાદ્ભયાત્ ।
સર્વેભ્યઃ શાન્તિકર્મભ્યો નિમજ્યાપ્સુ જપઃ સ્મૃતઃ ॥ ૬॥

સૌવર્ણે રાજતે વાપિ પાત્રે તામ્રમયેઽપિ વા ।
ક્ષીરવૃક્ષમયે વાપિ નિર્વ્રણે મૃણ્મયેઽપિ વા ॥ ૭॥

સહસ્રં પઞ્ચગવ્યેન હુત્વા સુજ્વલિતેઽનલે ।
ક્ષીરવૃક્ષમયૈઃ કાષ્ઠૈઃ શેષં સમ્પાદયેચ્છનૈઃ ॥ ૮॥

પ્રત્યાહુતિં સ્પૃશઞ્જપ્ત્વા સહસ્રં પાત્રસંસ્થિતમ્ ।
તેન તં પ્રોક્ષયેદ્દેશં કુશૈર્મન્ત્રમનુસ્મરન્ ॥ ૯॥

બલિં કિરંસ્તતસ્તસ્મિન્ધ્યાયેત્તુ પરદેવતામ્ ।
અભિચારસમુત્પન્ના કૃત્યા પાપં ચ નશ્યતિ ॥ ૧૦॥

દેવભૂતપિશાચાદ્યાન્ યદ્યેવં કુરુતે વશે ।
ગૃહં ગ્રામં પુરં રાષ્ટ્રં સર્વં તેભ્યો વિમુચ્યતે ॥ ૧૧॥

નિખને મુચ્યતે તેભ્યો લિખને મધ્યતોઽપિ ચ ।
મણ્ડલે શૂલમાલિખ્ય પૂર્વોક્તે ચ ક્રમેઽપિ વા ॥ ૧૨॥

અભિમન્ત્ર્ય સહસ્રં તન્નિખનેત્સર્વશાન્તયે ।

સૌવર્ણં રાજતં વાપિ કુમ્ભં તામ્રમયં ચ વા ॥ ૧૩॥

મૃણ્મયં વા નવં દિવ્યં સૂત્રવેષ્ટિતમવ્રણમ્ ।
સ્થણ્ડિલે સૈકતે સ્થાપ્ય પૂરયેન્મન્ત્રવિજ્જલૈઃ ॥ ૧૪॥

દિગ્ભ્ય આહૃત્ય તીર્થાનિ ચતસૃભ્યો દ્વિજોત્તમૈઃ ।
એલાચન્દનકર્પૂરજાતીપાટલમલ્લિકાઃ ॥ ૧૫॥

બિલ્વપત્રં તથા ક્રાન્તાં દેવીં વ્રીહિયવાંસ્તિલાન્ ।
સર્ષપાન્ક્ષીરવૃક્ષાણાં પ્રવાલાનિ ચ નિક્ષિપેત્ ॥ ૧૬॥

સર્વાણ્યભિવિધાયૈવ કુશકૂર્ચસમન્વિતમ્ ।
સ્નાતઃ સમાહિતો વિપ્રઃ સહસ્રં મન્ત્રયેદ્ બુધઃ ॥ ૧૭॥

દિક્ષુ સૌરાનધીયીરન્મન્ત્રાન્વિપ્રાસ્ત્રયીવિદઃ ।
પ્રોક્ષયેત્પાયયેદેનં નીરં તેનાભિષિઞ્ચયેત્ ॥ ૧૮॥

ભૂતરોગાભિચારેભ્યઃ સ નિર્મુક્તઃ સુખી ભવેત્ ।
અભિષેકેણ મુચ્યેત મૃત્યોરાસ્યગતો નરઃ ॥ ૧૯॥

અવશ્યં કારયેદ્વિદ્વાન્રાજા દીર્ઘં જિજીવિષુઃ ।
ગાવો દેયાશ્ચ ઋત્વિગ્ભ્ય અભિષેકે શતં મુને ॥ ૨૦॥

દક્ષિણા યેન વા તુષ્ટિર્યથાશક્ત્યાથવા ભવેત્ ।
જપેદશ્વત્થમાલભ્ય મન્દવારે શતં દ્વિજઃ ॥ ૨૧॥

ભૂતરોગાભિચારેભ્યો મુચ્યતે મહતો ભયાત્ ।
ગુડૂચ્યાઃ પર્વવિચ્છિન્નાઃ પયોઽક્તા જુહુયાદ્ દ્વિજઃ ॥ ૨૨॥

એવં મૃત્યુઞ્જયો હોમઃ સર્વવ્યાધિવિનાશનઃ ।
આમ્રસ્ય જુહુયાત્પત્રૈઃ પયોઽક્તૈર્જ્વરશાન્તયે ॥ ૨૩॥

વચાભિઃ પયસાક્તાભિઃ ક્ષયં હુત્વા વિનાશયેત્ ।
મધુત્રિતયહોમેન રાજયક્ષ્મા વિનશ્યતિ ॥ ૨૪॥

નિવેદ્ય ભાસ્કરાયાન્નં પાયસં હોમપૂર્વકમ્ ।
રાજયક્ષ્માભિભૂતં ચ પ્રાશયેચ્છાન્તિમાપ્નુયાત્ ॥ ૨૫॥

લતાઃ પર્વસુ વિચ્છિદ્ય સોમસ્ય જુહુયાદ્ દ્વિજઃ ।
સોમે સૂર્યેણ સંયુક્તે પયોઽક્તાઃ ક્ષયશાન્તયે ॥ ૨૬॥

કુસુમૈઃ શઙ્ખવૃક્ષસ્ય હુત્વા કુષ્ઠં વિનાશયેત્ ।
અપસ્મારવિનાશઃ સ્યાદપામાર્ગસ્ય તણ્ડુલૈઃ ॥ ૨૭॥

ક્ષીરવૃક્ષસમિદ્ધોમાદુન્માદોઽપિ વિનશ્યતિ ।
ઔદુમ્બરસમિદ્ધોમાદતિમેહઃ ક્ષયં વ્રજેત્ ॥ ૨૮॥

પ્રમેહં શમયેદ્ધુત્વા મધુનેક્ષુરસેન વા ।
મધુત્રિતયહોમેન નયેચ્છાન્તિં મસૂરિકામ્ ॥ ૨૯॥

કપિલાસર્પિષા હુત્વા નયેચ્છાન્તિં મસૂરિકામ્ ।
ઉદુમ્બરવટાશ્વત્થૈર્ગોગજાશ્વામયં હરેત્ ॥ ૩૦॥

પિપીલિમધુવલ્મીકે ગૃહે જાતે શતં શતમ્ ।
શમીસમિદ્ભિરન્નેન સર્પિષા જુહુયાદ્ દ્વિજઃ ॥ ૩૧॥

તદુત્થં શાન્તિમાયાતિ શેષૈસ્તત્ર બલિં હરેત્ ।
અભ્રસ્તનિતભૂકમ્પાલક્ષ્યાદૌ વનવેતસઃ ॥ ૩૨॥

સપ્તાહં જુહુયાદેવં રાષ્ટ્રે રાજ્યં સુખી ભવેત્ ।
યાં દિશં શતજપ્તેન લોષ્ઠેનાભિપ્રતાડયેત્ ॥ ૩૩॥

તતોઽગ્નિમારુતારિભ્યો ભયં તસ્ય વિનશ્યતિ ।
મનસૈવ જપેદેનાં બદ્ધો મુચ્યેત બન્ધનાત્ ॥ ૩૪॥

ભૂતરોગવિષાદિભ્યઃ સ્પૃશઞ્જપ્ત્વા વિમોચયેત્ ।
ભૂતાદિભ્યો વિમુચ્યેત જલં પીત્વાભિમન્ત્રિતમ્ ॥ ૩૫॥

અભિમન્ત્ર્ય શતં ભસ્મ ન્યસેદ્ભૂતાદિશાન્તયે ।
શિરસા ધારયેદ્ભસ્મ મન્ત્રયિત્વા તદિત્યૃચા ॥ ૩૬॥

સર્વવ્યાધિવિનિર્મુક્તઃ સુખી જીવેચ્છતં સમાઃ ।
અશક્તઃ કારયેચ્છાન્તિં વિપ્રં દત્ત્વા તુ દક્ષિણામ્ ॥ ૩૭॥

અથ પુષ્ટિં શ્રિયં લક્ષ્મીં પુષ્પૈર્હુત્વાપ્નુયાદ્ દ્વિજઃ ।
શ્રીકામો જુહુયાત્પદ્મૈ રક્તૈઃ શ્રિયમવાપ્નુયાત્ ॥ ૩૮॥

હુત્વા શ્રિયમવાપ્નોતિ જાતીપુષ્પૈર્નવૈઃ શુભૈઃ ।
શાલિતણ્ડુલહોમેન શ્રિયમાપ્નોતિ પુષ્કલામ્ ॥ ૩૯॥

સમિદ્ભિર્બિલ્વવૃક્ષસ્ય હુત્વા શ્રિયમવાપ્નુયાત્ ।
બિલ્વસ્ય શકલૈર્હુત્વા પત્રૈઃ પુષ્પૈઃ ફલૈરપિ ॥ ૪૦॥

શ્રિયમાપ્નોતિ પરમાં મૂલસ્ય શકલૈરપિ ।
સમિદ્ભિર્બિલ્વવૃક્ષસ્ય પાયસેન ચ સર્પિષા ॥ ૪૧॥

શતં શતં ચ સપ્તાહં હુત્વા શ્રિયમવાપ્નુયાત્ ।
લાજૈસ્ત્રિમધુરોપેતૈર્હોમે કન્યામવાપ્નુયાત્ ॥ ૪૨॥

અનેન વિધિના કન્યા વરમાપ્નોતિ વાઞ્છિતમ્ ।
રક્તોત્પલશતં હુત્વા સપ્તાહં હેમ ચાપ્નુયાત્ ॥ ૪૩॥

સૂર્યબિમ્બે જલં હુત્વા જલસ્થં હેમ ચાપ્નુયાત્ ।
અન્નં હુત્વાપ્નુયાદન્નં વ્રીહીન્વ્રીહિપતિર્ભવેત્ ॥ ૪૪॥

કરીષચૂર્ણૈર્વત્સસ્ય હુત્વા પશુમવાપ્નુયાત્ ।
પ્રિયઙ્ગુપાયસાજ્યૈશ્ચ ભવેદ્ધોમાદિભિઃ પ્રજા ॥ ૪૫॥

નિવેદ્ય ભાસ્કરાયાન્નં પાયસં હોમપૂર્વકમ્ ।
ભોજયેત્તદૃતુસ્નાતાં પુત્રં પરમવાપ્નુયાત્ ॥ ૪૬॥

સપ્રરોહાભિરાર્દ્રાભિરાયુર્હુત્વા સમાપ્નુયાત્ ।
સમિદ્ભિઃ ક્ષીરવૃક્ષસ્ય હુત્વાયુષમવાપ્નુયાત્ ॥ ૪૭॥

સપ્રરોહાભિરાર્દ્રાભી રક્તાભિર્મધુરત્રયૈઃ ।
વ્રીહીણાં ચ શતં હુત્વા હેમ ચાયુરવાપ્નુયાત્ ॥ ૪૮॥

સુવર્ણકુઙ્મલં હુત્વા શતમાયુરવાપ્નુયાત્ ।
દૂર્વાભિઃ પયસા વાપિ મધુના સર્પિષાપિ વા ॥ ૪૯॥

શતં શતં ચ સપ્તાહમપમૃત્યું વ્યપોહતિ ।
શમીસમિદ્ભિરન્નેન પયસા વા ચ સર્પિષા ॥ ૫૦॥

શતં શતં ચ સપ્તાહમપમૃત્યું વ્યપોહતિ ।
ન્યગ્રોધસમિધો હુત્વા પાયસં હોમયેત્તતઃ ॥ ૫૧॥

શતં શતં ચ સપ્તાહમપમૃત્યું વ્યપોહતિ ।
ક્ષીરાહારો જપેન્મૃત્યોઃ સપ્તાહાદ્વિજયી ભવેત્ ॥ ૫૨॥

અનશ્નન્વાગ્યતો જપ્ત્વા ત્રિરાત્રં મુચ્યતે યમાત્ ।
નિમજ્જ્યાપ્સુ જપેદેવં સદ્યો મૃત્યોર્વિમુચ્યતે ॥ ૫૩॥

જપેદ્ બિલ્વં સમાશ્રિત્ય માસં રાજ્યમવાપ્નુયાત્ ।

બિલ્વં હુત્વાપ્નુયાદ્રાજ્યં સમૂલફલપલ્લવમ્ ॥ ૫૪॥

હુત્વા પદ્મશતં માસં રાજ્યમાપ્નોત્યકણ્ટકમ્ ।
યવાગૂં ગ્રામમાપ્નોતિ હુત્વા શાલિસમન્વિતમ્ ॥ ૫૫॥

અશ્વત્થસમિધો હુત્વા યુદ્ધાદૌ જયમાપ્નુયાત્ ।
અર્કસ્ય સમિધો હુત્વા સર્વત્ર વિજયી ભવેત્ ॥ ૫૬॥

સંયુક્તૈઃ પયસા પત્રૈઃ પુષ્પૈર્વા વેતસસ્ય ચ ।
પાયસેન શતં હુત્વા સપ્તાહં વૃષ્ટિમાપ્નુયાત્ ॥ ૫૭॥

નાભિદઘ્ને જલે જપ્ત્વા સપ્તાહં વૃષ્ટિમાપ્નુયાત્ ।
જલે ભસ્મશતં હુત્વા મહાવૃષ્ટિં નિવારયેત્ ॥ ૫૮॥

પાલાશાભિરવાપ્નોતિ સમિદ્ભિર્બ્રહ્મવર્ચસમ્ ।
પલાશકુસુમૈર્હુત્વા સર્વમિષ્ટમવાપ્નુયાત્ ॥ ૫૯॥

પયો હુત્વાઽઽપ્નુયાન્મેધામાજ્યં બુદ્ધિમવાપ્નુયાત્ ।
અભિમન્ત્ર્ય પિબેદ્ બ્રાહ્મં રસં મેધામવાપ્નુયાત્ ॥ ૬૦॥

પુષ્પહોમે ભવેદ્વાસસ્તન્તુભિસ્તદ્વિધં પટમ્ ।
લવણં મધુસમ્મિશ્રં હુત્વેષ્ટં વશમાનયેત્ ॥ ૬૧॥

નયેદિષ્ટં વશં હુત્વા લક્ષ્મીપુષ્પૈર્મધુપ્લુતૈઃ ।
નિત્યમઞ્જલિનાઽઽત્માનમભિષિઞ્ચેજ્જલે સ્થિતઃ ॥ ૬૨॥

મતિમારોગ્યમાયુષ્યમગ્ર્યં સ્વાસ્થ્યમવાપ્નુયાત્ ।
કુર્યાદ્વિપ્રોઽન્યમુદ્દિશ્ય સોઽપિ પુષ્ટિમવાપ્નુયાત્ ॥ ૬૩॥

અથ ચારુવિધિર્માસં સહસ્રં પ્રત્યહં જપેત્ ।
આયુષ્કામઃ શુચૌ દેશે પ્રાપ્નુયાદાયુરુત્તમમ્ ॥ ૬૪॥

આયુરારોગ્યકામસ્તુ જપેન્માસદ્વયં દ્વિજઃ ।
ભવેદાયુષ્યમારોગ્યં શ્રિયૈ માસત્રયં જપેત્ ॥ ૬૫॥

આયુઃ શ્રીપુત્રદારાદ્યાશ્ચતુર્ભિશ્ચ યશો જપાત્ ।
પુત્રદારાયુરારોગ્યં શ્રિયં વિદ્યાં ચ પઞ્ચભિઃ ॥ ૬૬॥

એવમેવોત્તરાન્કામાન્ માસૈરેવોત્તરૈર્વ્રજેત્ ।
એકપાદો જપેદૂર્ધ્વબાહુઃ સ્થિત્વા નિરાશ્રયઃ ॥ ૬૭॥

માસં શતત્રયં વિપ્રઃ સર્વાન્કામાનવાપ્નુયાત્ ।
એવં શતોત્તરં જપ્ત્વા સહસ્રં સર્વમાપ્નુયાત્ ॥ ૬૮॥

રુદ્ધ્વા પ્રાણમપાનં ચ જપેન્માસં શતત્રયમ્ ।
યદિચ્છેત્તદવાપ્નોતિ સહસ્રાત્પરમાપ્નુયાત્ ॥ ૬૯॥

એકપાદો જપેદૂર્ધ્વબાહૂ રુદ્ધ્વાનિલં વશઃ ।
માસં શતમવાપ્નોતિ યદિચ્છેદિતિ કૌશિકઃ ॥ ૭૦॥

એવં શતત્રયં જપ્ત્વા સહસ્રં સર્વમાપ્નુયાત્ ।
નિમજ્જ્યાપ્સુ જપેન્માસં શતમિષ્ટમવાપ્નુયાત્ ॥ ૭૧॥

એવં શતત્રયં જપ્ત્વા સહસ્રં સર્વમાપ્નુયાત્ ।
એકપાદો જપેદૂર્ધ્વબાહૂ રુદ્ધ્વા નિરાશ્રયઃ ॥ ૭૨॥

નક્તમશ્નન્ હવિષ્યાન્નં વત્સરાદૃષિતામિયાત્ ।
ગીરમોઘા ભવેદેવં જપ્ત્વા સંવત્સરદ્વયમ્ ॥ ૭૩॥

ત્રિવત્સરં જપેદેવં ભવેત્ત્રૈકાલદર્શનમ્ ।
આયાતિ ભગવાન્દેવશ્ચતુઃસંવત્સરં જપેત્ ॥ ૭૪॥

પઞ્ચભિર્વત્સરૈરેવમણિમાદિગુણો ભવેત્ ।
એવં ષડ્વત્સરં જપ્ત્વા કામરૂપિત્વમાપ્નુયાત્ ॥ ૭૫॥

સપ્તભિર્વત્સરૈરેવમમરત્વમવાપ્નુયાત્ ।
મનુત્વં નવભિઃ સિદ્ધમિન્દ્રત્વં દશભિર્ભવેત્ ॥ ૭૬॥

એકાદશભિરાપ્નોતિ પ્રાજાપત્યં સુવત્સરૈઃ ।
બહ્મત્વં પ્રાપ્નુયાદેવં જપ્ત્વા દ્વાદશવત્સરાન્ ॥ ૭૭॥

એતેનૈવ જિતા લોકાસ્તપસા નારદાદિભિઃ ।
શાકમન્યે પરે મૂલં ફલમન્યે પયઃ પરે ॥ ૭૮॥

ઘૃતમન્યે પરે સોમમપરે ચરુવૃત્તયઃ ।
ઋષયઃ પક્ષમશ્નન્તિ કેચિદ્ભૈક્ષ્યાશિનોઽહનિ ॥ ૭૯॥

હવિષ્યમપરેઽશ્નન્તઃ કુર્વન્ત્યેવ પરં તપઃ ।
અથ શુદ્ધ્યૈ રહસ્યાનાં ત્રિસહસ્રં જપેદ્ દ્વિજઃ ॥ ૮૦॥

માસં શુદ્ધો ભવેત્સ્તેયાત્સુવર્ણસ્ય દ્વિજોત્તમઃ ।
જપેન્માસં ત્રિસાહસ્રં સુરાપઃ શુદ્ધિમાપ્નુયાત્ ॥ ૮૧॥

માસં જપેત્ ત્રિસાહસ્રં શુચિઃ સ્યાદ્ ગુરુતલ્પગઃ ।
ત્રિસહસ્રં જપેન્માસં કુટીં કૃત્વા વને વસન્ ॥ ૮૨॥

બ્રહ્મહા મુચ્યતે પાપાદિતિ કૌશિકભાષિતમ્ ।
દ્વાદશાહં નિમજ્જ્યાપ્સુ સહસ્રં પ્રત્યહં જપેત્ ॥ ૮૩॥

મુચ્યેરન્નંહસઃ સર્વે મહાપાતકિનો દ્વિજાઃ ।
ત્રિસાહસ્રં જપેન્માસં પ્રાણાનાયમ્ય વાગ્યતઃ ॥ ૮૪॥

મહાપાતકયુક્તો વા મુચ્યતે મહતો ભયાત્ ।
પ્રાણાયામસહસ્રેણ બ્રહ્મહાપિ વિશુધ્યતિ ॥ ૮૫॥

ષટ્કૃત્વસ્ત્વભ્યસેદૂર્ધ્વં પ્રાણાપાનૌ સમાહિતઃ ।
પ્રાણાયામો ભવેદેષ સર્વપાપપ્રણાશનઃ ॥ ૮૬॥

સહસ્રમભ્યસેન્માસં ક્ષિતિપઃ શુચિતામિયાત્ ।
દ્વાદશાહં ત્રિસાહસ્રં જપેદ્ધિ ગોવધે દ્વિજઃ ॥ ૮૭॥

અગમ્યાગમનસ્તેયહનનાભક્ષ્યભક્ષણે ।
દશસાહસ્રમભ્યસ્તા ગાયત્રી શોધયેદ્ દ્વિજમ્ ॥ ૮૮॥

પ્રાણાયામશતં કૃત્વા મુચ્યતે સર્વકિલ્વિષાત્ ।
સર્વેષામેવ પાપાનાં સઙ્કરે સતિ શુદ્ધયે ॥ ૮૯॥

સહસ્રમભ્યસેન્માસં નિત્યજાપી વને વસન્ ।
ઉપવાસસમં જપ્યં ત્રિસહસ્રં તદિત્યૃચમ્ ॥ ૯૦॥

ચતુર્વિંશતિસાહસ્રમભ્યસ્તાત્કૃચ્છ્રસંજ્ઞિતા ।
ચતુઃષષ્ટિસહસ્રાણિ ચાન્દ્રાયણસમાનિ તુ ॥ ૯૧॥

શતકૃત્વોઽભ્યસેન્નિત્યં પ્રાણાનાયમ્ય સન્ધ્યયોઃ ।
તદિત્યૃચમવાપ્નોતિ સર્વપાપક્ષયં પરમ્ ॥ ૯૨॥

નિમજ્જ્યાપ્સુ જપેન્નિત્યં શતકૃત્વસ્તદિત્યૃચમ્ ।
ધ્યાયન્દેવીં સૂર્યરૂપાં સર્વપાપૈઃ પ્રમુચ્યતે ॥ ૯૩॥

ઇતિ તે સમ્યગાખ્યાતાઃ શાન્તિશુદ્ધ્યાદિકલ્પનાઃ ।
રહસ્યાતિરહસ્યાશ્ચ ગોપનીયાસ્ત્વયા સદા ॥ ૯૪॥

ઇતિ સઙ્ક્ષેપતઃ પ્રોક્તઃ સદાચારસ્ય સઙ્ગ્રહઃ ।

વિધિનાઽઽચરણાદસ્ય માયા દુર્ગા પ્રસીદતિ ॥ ૯૫॥

નૈમિત્તિકં ચ નિત્યં ચ કામ્યં કર્મ યથાવિધિ ।
આચરેન્મનુજઃ સોઽયં ભુક્તિમુક્તિફલાપ્તિભાક્ ॥ ૯૬॥

આચારઃ પ્રથમો ધર્મો ધર્મસ્ય પ્રભુરીશ્વરી ।
ઇત્યુક્તં સર્વશાસ્ત્રેષુ સદાચારફલં મહત્ ॥ ૯૭॥

આચારવાન્સદા પૂતઃ સદૈવાચારવાન્મસુખી ।
આચારવાન્સદા ધન્યઃ સત્યં સત્યં ચ નારદ ॥ ૯૮॥

દેવીપ્રસાદજનકં સદાચારવિધાનકમ્ ।
યદપિ શૃણુયાન્મર્ત્યો મહાસમ્પત્તિસૌખ્યભાક્ ॥ ૯૯॥

સદાચારેણ સિદ્ધેચ્ચ ઐહિકામુષ્મિકં સુખમ્ ।
તદેવ તે મયા પ્રોક્તં કિમન્યચ્છ્રોતુમિચ્છસિ ॥ ૧૦૦॥

ઇતિ શ્રીમદ્દેવીભાગવતે મહાપુરાણેઽષ્ટાદશસાહસ્ર્યાં
સંહિતાયામેકાદશસ્કન્ધે
સદાચારનિરૂપણં નામ ચતુર્વિંશોઽધ્યાયઃ ॥ ૧૧.૨૪॥

॥ ઇતિ શ્રીમદ્દેવીભાગવતે મહાપુરાણે એકાદશસ્કન્ધઃ સમાપ્તઃ ॥

Encoded and proofread by Vishwas Bhide

*11 Shrimaddevibhagavatamahapurane Ekadashah Skandhah*
pdf was typeset on March 31, 2024

Please send corrections to *sanskrit@cheerful.com*